MANJUSHA 1953 G.K.V.

11125
Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Approved by the Directors of Public Instruction, Madras, Bihar and Mysore.

श्रीशिवः शरणम्

सप्तम-वर्ष] January, 1953 [पञ्चमी संख्या

मञ्जूषा

सम्पादकः—श्रीक्षितीशचन्द्र-चट्टोपाध्यायः

Special Articles in this number.

The nature of the Gods acc. to the Mīmaṅsakas—Free will *versus* Determinism.
Proverbs and Sayings.
ग्रसित *versus* ग्रस्त.
Different interpretations of षष्ठी चानादरे.
Dhammapada—the wages of sin.
"The Last Rose of Summer"—Sanskrit Translation.
Simple stories in prose and verse.
Kālidāsa and Bhavabhūti—a critical and comparative study.
Critical observations on the text of the Mahābhāṣya.
Sāyaṇa's commentary on the Rigveda—a critical study.

1111|25

Next Month

Mahābhāṣya with English Translation, notes, extracts from various commentaries.

On the correct interpretation of a rule of Pāṇini.

Vol. V of the Mañjūṣa contains 300+32+32 pages including "Mahābhāṣya" "Critical studies on the text of S'āyaṇa's commentary on the Rigveda" etc. etc. Rs. 6/8/-

Office : 81, Shyambazar Street, Calcutta--4
Annual Subscription : Rupees Six only.
Single number—Twelve annas.
Foreign—Rupees Nine

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मञ्जूषाया नियमावली

१। मञ्जूषाया वार्षिकं मूल्यं रूपकषट्कम्। ग्राहकैर्वर्षस्य प्रथमसंख्यात एव ग्रहीतव्यम्।

२। प्रतिसौरमासं दशमदिने (आङ्लमासस्य चतुर्विंशे दिवसे) 81, Shyambazar Street, Calcutta 4 इत्यतो मञ्जूषा प्रकाश्यते।

३। मञ्जूषायास्तावद् भागत्रितयं वर्तते। तत्र प्रथमे भागे देवभाषां प्रविविक्षूणां कृते सरलाः श्लोकाः, आभाणकाः, कथाः, आख्यानानि च सन्निवेश्यन्ते, द्वितीये भागे दार्शनिकाः प्रबन्धाः, व्याकरणालङ्कारादीनां विमर्शाः, पाठविचारः, जिज्ञासा मीमांसा च पुस्तकपरिचयादयश्च प्रकाश्यन्ते ; तृतीय भागे सानुवादाः पारसीकानां गाथाः, ससंस्कृतानुवादं धम्मपदम्, महाभाष्यम्, समूला भाषावृत्त्यर्थ-विवृतिर्मुद्रयन्ते।

काव्यालङ्कारसूत्रवृत्तिः (वामनविरचिता ५।१)

अभिनवविग्रहविस्तृतटीकोपेता Rs. 2/-

Convocation Address in Ancient India -12-

स्त्रीप्रशंसा—The original slokas of Varāhamihira with a splendid Sanskrit commentary. 1/-

Popular Etymology— Re. 1/-

Homer's Iliad, Book I, Edited with Literal English translation, Sanskrit parallels for students of Sanskrit.

By Dr. Kshitish Chandra Chatterji.

In the Press

শব্দকথা—সরস সরল ভাষাতত্ত্ব— ২৲

ঊষার আলো—ছোট ছোট হাসির গল্পের সমষ্টি— ৸০

দক্ষতত্ত্বমালা—ধর্মবিষয়ক শ্লোক ও অনুবাদ— ।৴০

Several complete sets of Vols. IV, V and VI of the Manjusha are still available for Rs. 6/8/- per set and only a few sets of Vols. I-III are available at Rs. 5/12/- for the lot.

श्रीविश्वनाथ-चट्टोपाध्यायः।

८१ श्यामबाजार ष्ट्रीट, कलिकाता ४।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

RT-0889

शरणं तरुणेन्दुशेखरः शरणं मे गिरिराजकन्यका ।
शरणं पुनरेव तावुभौ शरणं नान्यदुपैमि दैवतम् ॥

मञ्जूषा

January, 1953.	१८७४-शकीय-माघस्य ७म-वर्षस्य पञ्चमी संख्या	Vol. VII No. 5

सुभाषितादीनि

१। (वङ्गीय) मन्, तुमि कृषिकाज् जान ना ;
साधेर् मानव् जनम् रइल पतित्,
आवाद् कर्ले फल्त सोना ॥
न जानासि मनो [मूढ] कृषिकर्म [सनातनम्] ।
काङ्क्षितं मानवं जन्म पतितं समवस्थितम् ।
कृतेऽत्र कर्षणे [भूरि] सुवर्णमुदपत्स्यत ॥

२। (व) जीव दियाछेन् यिनि आहार् दिवेन् तिनि ।
God never sendeth mouth but He sendeth meat.
येन विश्राणिता जीवाः स आहार्यं प्रदास्यति ।
"येन शुक्लीकृता हंसाः शुकाश्च हरितीकृताः ।
मयूराश्चित्रिता येन स ते वृत्तिं विधास्यति ॥"

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

3. He that is not handsome at twenty, nor strong at thirty, nor rich at forty, nor wise at fifty, will never be handsome, strong, rich or wise.

यो हि विंशतिवर्षीयः सौन्दर्यं नाधिगच्छति ।
न वा त्रिंशत्तमे वर्षे बलं वीर्यं च विन्दति ॥
चत्वारिंशे न वाढ्यो यो न पञ्चाशत्तमे सुधीः ।
मरणान्तं स नैव स्याद् आढ्यः सुश्रीः सुधीर्बली ॥

४। दाँत थाकृते लोके दाँतेर मर्यादा बोझे ना ।

'We never know the worth of teeth so long as we have them.'

दन्तेषु विद्यमानेषु तन्माहात्म्यं न बुध्यते ॥

"We rarely do find the true value of a thing until we lose it."

"We never know the worth of water till the well is dry."

न जानामो जलोत्कर्षं यावत् कूपो न शुष्यति ।

५। (ग्री) Heis anēr, oudeis anēr.
(ला) Unus vir nullus vir.
One man no man.

एको नरः अनरः । एको नरो नरत्वेन न परिगण्यते ।

६। Hoplon toi logos andri tomōteron esti siderou.
"The tongue is a sharper weapon than the sword."
"The tongue is not steel, yet it cuts".

जिह्वा नामासेरपि तीक्ष्णतरमस्त्रम् ।
"रोहते सायकैर्विद्धं वनं परशुना हतम् ।
वाचा दुरुक्तं बीभत्सं न संरोहति वाक्क्षतम् ॥"

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

111125

निष्पत्तिः

[श्रीअनन्तकुमार-शास्त्री ज्योतिषाचार्यः]

कस्मिंश्चिदधिष्ठाने निला वला च सोदरौ प्रतिवसतः स्म । तयोः पित्र्यदेयविभजने सुमहान् कलहः सञ्जातः । यतो द्रव्यजातविभाग-शेषयोर्लवित्रकुठारयोर्वण्टनं कथमपि सुष्ठु न समभूत् । लवित्रात् कुठारो गरीयानिति उभावेव कुठारं जिघृक्षू विवदमानावास्ताम् । सुहृद्भिर्बन्धुभिश्च दात्रकुठारयोरवक्रयविभागेन समाधातुं यतितम् । किन्तु सर्वेऽपि तेषां प्रयासा विफलतामुपगताः । प्रत्युत धीमतामुपदेशा-दिभिर्हविषा हुतवह इवोभयोरमर्षानलो देदीप्यते स्म, तौ च प्रहरण-प्रहृत्या मिथो जिघांसन्तौ महासमरप्रवृत्तौ मत्तमातङ्गाविव संवृत्तौ इत्याकर्ण्य पुरोधास्तत्रागत्य सक्रोधमाह—अरे मूढौ किमर्थं विवदेथे युवाम् ? पुरा किल भगवत्या चण्डिकया दात्रकुठारयोर्यथाविधि विभागो विहितः । तत् कथं महामायावाक्यमनादृत्य कलहः क्रियते ? इति । उक्तं देवीमाहात्म्ये "वला दा कृष्य मोहाय महामाया प्रयच्छति" इति । दाशब्देनात्र दात्रं लक्ष्यते, अतो वला दात्रं लभेत । पारिशेष्यात् निला कुठारं प्राप्नुयात् । कुठारलाभेऽप्यस्य योग्यता वर्ण्यते तत्रैव "श्वासा निला स्ताः शतशो निपेतुर्नभसोऽचलाः" इति । निला प्रतिश्वासं शतशः चलाः काष्ठखण्डानि निपातयेत्, अत एवास्य कुठारेण प्रयोजनम् । किं चण्डिकाविहितविधिमनादृत्य विवदमानयोर्युवयोः प्रत्यवायभयमपि नास्ति ? विरमाचिराद् विवादात्, अन्यथा देव्याः क्रोधेन वां सर्वनाशो भवेत् । इत्याकर्ण्य भयेनानतशीर्षौ चण्डीं नमस्कृत्य मनसा देव्यै पूजां प्रतिश्रुत्य पुरोहितमभिनन्द्य च वला दात्रं निला च कुठारं प्रगृह्य स्वस्थमानसौ स्वस्वगृहान् प्राविशताम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुत्रः पित्रोः

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

मोहनमहोदयो बाल्य एव कर्णीसुतप्रहिते पथि मतिमकरोत्। प्रथमतस्तावदापणाभिमुखं गच्छतां बालकानां हस्तान्मुद्रादिकमाच्छिद्यते स्म ; तत्र च समधिगतपाटवेन सतीर्थ्यानां कञ्चुककोषाल्लेखन्यादिकमपह्रियते स्म ; तत्रापि च लब्धप्रतिष्ठेनानवधानपथिकजनानां ग्रन्थिभेदने पाणिलाघवं परीक्ष्यते स्म। क्रमेण च भारतीयग्रन्थिभेदकानां वरणीयमाचार्यपदं तेनाधिष्ठितम्।

एकदासौ मनोहरतरं वेषं बिभ्राणो वैद्युतशकटकमारूढः को यात्रिको द्रव्यभारापसारणेन स्वस्थो विधेय इति विमृशन् सहसा स्वस्मिन्नेव कञ्चुककोषे सूक्ष्मतममालोडनमनुभूतवान्। ततश्च तत्र पाणिं प्रवेश्यार्थपत्रादिसनाथां चर्मभस्त्रिकां विलुप्तामुपलेभे। इतस्ततश्च दत्तदृष्टिः पार्श्वत एव समुपविष्टां परमरमणीयां कन्यकामपश्यत्। भवत्यैवापहृता मदीया चर्मभस्त्रिकेति वदंस्तस्या हस्तात् क्रीडाभस्त्रिकामाच्छिद्योद्घाट्य च निष्काशयामास तां चर्मभस्त्रिकाम्। आरोहिणः सर्वे सुन्दरीगृह्या अपि लोप्त्रेण गृहीतायास्तस्याः कथं वोद्धरणं विधेयमिति चिन्ताकुला अतिष्ठन्। मोहनेनोक्तम्, आगच्छ, राजद्वारं गच्छावेति। ततश्च तां पाणौ गृहीत्वा वैद्युतशकटादवातरत्। अवतीर्णश्चापृच्छत् तरुणीम्। का त्वं भद्रे? अहं तावत् पाटच्चराणां मूर्ध्नि तिष्ठामि, भवत्या प्रायेण ममापि चक्षुषोर्धूलिर्निक्षिप्तेति। ततस्तयोक्तं—भवन्तं तत्त्वतो ज्ञातुमिच्छामीति। तेनोक्तम्—किं न श्रुतं भवत्या मोहनस्य नामेति? तयोक्तम्—भवानेव मोहनो ननु? इदानीं नास्ति मे क्षोभकारणम्। ममापि नामधेयं कदाचिद् भवतः श्रुतिपथमापतितं स्यात्। अहं तावन्मोहिनीति। मोहनेनोक्तम्। अहो, अद्य प्रसन्ना मयि देवताः। सहस्रशः श्रुतं मया भवत्या नाम चावदानं च। इदानीं श्रीमत्याः सन्दर्शनेन कृतार्थमात्मानमाकलयामि।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मोहिनीमोहनयोरुद्वाहबन्धनं कथं वा भवत्यै रोचते इति। तच्छ्रुत्वा मोहिनी साध्वसादानतवदना तूष्णीमतिष्ठत्।

व्यतीतेषु च द्वित्रेषु दिवसेषु शुभेऽह्नि विनिर्वृत्तस्तयोरुद्वाहमहोत्सवः। पाटच्चरशिरोमणिना साकं पाटच्चरीणां धुरि कीर्तनीयायाः परिणय इति प्रहर्षस्य परां काष्ठामुपारूढाः सर्वे पाटच्चराः। 'समानयंस्तुल्यगुणं वधूवरं चिरस्य वाच्यं न गतः प्रजापतिरि'ति सर्वैरुच्चैरुद्घोषितम्। कालक्रमेण च मोहिनीमोहनयोर्मदनो नामात्मजः सम्भूतः। परमसुकुमारोऽसौ कुमारः शशिकलेव दिने दिने वर्धते स्म। परं जन्मनोऽनन्तरं तस्य दक्षिणः पाणिर्बद्धमुष्टिरेवातिष्ठत्, प्रयत्नसहस्रेणापि पित्रा वा मात्रा वा स्वजनेन वा मुष्टेः शैथिल्यमापादयितुं न पारितम्। बहवो भिषजः समानीताः—होमियोप्याथिन आलोपाथिन आयुर्वेदनिष्णाताश्च। बहूनि च भेषजानि मदनाय प्रदत्तानि, सूचीमुखेनापि शरीरे प्रवेशितानि, मुष्टिः पुनर्यथावदेवावतस्थे।

ततश्च मानसचिकित्सकः (psychiatrist) कश्चित् समाहूतः। तेना मूलात् सर्वमुपश्रुत्य सुचिरं चिन्तयित्वोक्तम्—बहुमूल्यं किमपि वस्तु समानीयताम् इति। तस्मिन्नेव दिने प्रातर्मोहनेन स्वर्णमयमेकं घटिकायन्त्रं स्वर्णशृङ्खलावलम्बि चोरितम्। तदेव चिकित्सकस्य हस्ते प्रदत्तम् तेन च शृङ्खलामवलम्ब्य विसृत्वरशिखासम्भारभासुरं घटिकायन्त्रं शिशोः पुरतो दोलायितम्। शिशुनापि पञ्चषान् निमेषान् स्तिमितमवलोक्य मुष्टिरीषत् सञ्चालिता, ततश्च शिथिलीकृता, ततश्चाङ्गुलीः प्रसार्य घटिकायन्त्राभिमुखं नीताः। तदात्व एव मुष्टेरभ्यन्तरादङ्गुलीयकमेकं शय्यायां निपतितम्। यया च धात्र्या प्रसूतिकर्म सम्पादितं तस्या एवेदमङ्गुलीयकम्!!!

पाटच्चरः पिता यस्य माता चापि मलिम्लुचा।
चौर्यविद्यातिनैपुण्यं जन्मतस्तस्य सिध्यति।

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सायणभाष्यविमर्शः

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

ऋक्संहितायाः प्रथममण्डलस्य १३४-तम-सूक्तस्य द्वितीयमन्त्र इरध्यैपदमुपलभ्यते। तच्च व्याख्यातं सायणाचार्येण—इरध्यै प्रापयितुं परिचरितुं वा। ईर गतौ। तुमर्थे कध्यैप्रत्ययः। ह्रस्वश्छान्दसः। इरध्यतिः परिचरणकर्मा। "इरध्यति विधेम" इति तन्नामसूक्तत्वात्। इति॥ अत्र ह्रस्वश्छान्दसः इत्यस्यानन्तरं "यद्वा" इति परिभ्रष्टमिति प्रतिभाति। कदाचिच्च "तन्नामसूक्तत्वात्" इत्यस्य चानन्तरम् "तस्मात् कध्यैप्रत्ययः। छान्दसो धकाराकारलोपः" इति पतितं स्यात्।

ततश्च भाष्ये 'कीदृशास्ताः' इति वर्तते। अत्र पाठान्तरम्—कीदृशा अश्वा इति। कीदृश्यस्ताः इति च। कीदृशास्ता इति व्यक्तमेव प्रामादिकम्। पूर्वं कीदृशाः सोमा इत्युक्तम्। अत एवात्रापि "कीदृशा अश्वाः" इति केषुचित् पुस्तकेषूपलभ्यमानो व्याकरणानुगुणः पाठ उपादेय इति प्रतिभाति।

१।११२।२-मन्त्रव्याख्याने दृश्यते—धियः। ध्यायन्तीति धियः स्तोतारः। ध्यै चिन्तायाम्। क्विप् च इति क्विप्। चशब्देन दृशिग्रहणानुकर्षणात् सम्प्रसारणम्। इति। एतत् सर्वम् "अन्येभ्योऽपि दृश्यते" [३।२।१७८] इति सूत्रस्य "ध्यायतेः सम्प्रसारणं च" इति तद्गतवार्त्तिकस्य च विस्मरणमूलकमिति प्रतिभाति।

———

दशाविपाकः

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

सहृदयाः, मनुजानामिव शब्दानामपि वर्तन्ते दशान्तराणि। दृश्यन्ते केचन शब्दा ये बाल्ये सुखसौभाग्यादीन्यनुभूय तारुण्ये दुःख-दौर्गत्यादिकं भजन्ते वार्धके च स्थानान्तराण्युपगताः पुनरपि सौख्येन

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संयुज्यन्ते। विनिक्षिप्यतां तावद् ग्रसधातौ दृष्टिः। धातुरयमहिंसा-नीतिविरोधीत्यात्मनेपद्येव। क्रमेण नीतेस्तस्याः प्राबल्यादन्तरान्तरागतिकतया परस्मैपदेष्वात्मानं व्यापारयति स्म। निष्ठायां चेकारोऽप्येतेनात्मसात् कृतः। अथ गच्छता कालेन नूनं दुर्वृत्तेनानेन निष्ठायामिकारमधिगम्य मदोन्मत्तेन पूर्वतोऽप्यधिकतरं हिंसनं विधास्यते इत्याशङ्केकारेण वियोजितोऽयं तपस्वी। अत एव वेदादिषु ग्रसितमिति पदमुपलभ्यते, लोके पुनर्महर्षिणा पाणिनिना यस्य विभाषेतिसूत्रबलेन भ्रंशितोऽस्येकारः, अत एवामरकोषे—"अभ्यवहृतान्नजग्धग्रस्तग्लस्ताशितं भुक्ते" इत्यत्र ग्रस्तशब्द एव सन्निविष्टो न पुनर्ग्रसितशब्दोऽपि। ततश्च व्यतीते बहुतिथे काले वङ्गभाषायां ग्रसितशब्दस्य पुनरभ्युदयः सञ्जातः। ग्रस्तः कालेन वर्णोऽयं कालेनैव प्ररोहति।

ऋग्वेदे द्विर्ग्रसितशब्दस्य प्रयोग उपलभ्यते—

याभिर्वर्तिकां ग्रसिताममुञ्चतम् [१।११२।८] इति।

वृकस्य चिद्वर्त्तिकामन्तरास्याद् यवं शचीभिर्ग्रसिताममुञ्चतम् [१०।३९।१३] इति च।

मन्येऽश्विभ्यां देवताभ्यां न केवलं वृकेण ग्रसिता वर्तिका विमोचिता ग्रसितशब्दस्येकारोऽप्यत्यन्ताय प्रणाशितः। अत एव निरुक्ते दृश्यते—आदित्योऽपि वृक उच्यते। यदावृङ्क्ते। अजोहवीदश्विना वर्तिका वामास्नो यत् साममुञ्चतं वृकस्य। आह्वयदुषा अश्विनावादित्येनाभिग्रस्ता तमश्विनौ प्रमुमुचतुरित्याख्यानमिति [५।२१।२]।

इकारस्य वियोजने किं बीजमिति विचारे प्रथमतस्तावदिदमेव प्रतिभाति यत् इकारस्यार्थो मदन इति। तस्य चाङ्लः प्रतिशब्दः Cupid इति। अहमर्थकस्य च इगोशब्दस्य प्रतीकमयम् इकारः। अत एव यथा शब्दोऽयं सर्वथा egotism-cupidity-भ्याम्—लोभाहङ्काराभ्यां विमुक्त आत्माराम एव विराजेत तदर्थं भ्रंशितोऽयमिकारेणेति शिवम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिवमाधवकथा

(२)

याते कतिपयाहे च तं शय्योपान्तवर्तिनम् ।
पुरोहितं स वक्ति स्म धूर्तराजोऽल्पया गिरा ॥
मम तावच्छरीरेऽस्मिन् वर्तते विषमा दशा ।
तद् विप्रवर कञ्चित् त्वं ब्राह्मणोत्तममानय ॥
यस्मै दास्यामि सर्वस्वमिहामुत्र च शर्मणे ।
अस्थिरे जीविते ह्यास्था का धनेषु मनस्विनः ॥
इत्युक्तः स पुरोधाश्च तेन दानोपजीवकः ।
एवं करोमीत्याह स्म सोऽपतच्चास्य पादयोः ॥
ततः स ब्राह्मणं यं यमानिनाय पुरोहितः ।
विशेषेच्छानिभात् तं तं श्रद्दधे न स माधवः ॥
तद् दृष्ट्वा तस्य पार्श्वस्थो धूर्त एकोऽब्रवीदिदम् ।
न तावदस्मै सामान्यो विप्रः प्रायेण रोचते ॥
तद् य एष शिवो नाम शिप्रातीरे महातपाः ।
स्थितः सम्प्रति भात्यस्य न वेत्येतन्निरूप्यताम् ॥
तच्छ्रुत्वा माधवोऽवादीत् कृतार्तिस्तं पुरोहितम् ।
हन्त प्रसीदानयैतं विप्रो नान्यो हि तादृशः ॥
इत्युक्तस्तेन च ययौ स शिवस्यान्तिकं ततः ।
पुरोधास्तमपश्यच्च रचितध्याननिश्चलम् ॥
उपाविशच्च तस्याग्रे ततः कृत्वा प्रदक्षिणम् ।
तत्क्षणं सोऽपि धूर्तोऽभूच्छनैरुन्मीलितेक्षणः ॥
ततः प्रणम्य तं प्रह्वः स उवाच पुरोहितः ।
न चेत् कुप्यसि तत् किञ्चित् प्रभो विज्ञापयाम्यहम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तन्निशम्य च तेनोष्ठपुटोन्नमनसंज्ञया ।
अनुज्ञातः शिवेनैवं तमवादीत् पुरोहितः ।।
इह स्थितो दाक्षिणात्यो राजपुत्रो महाधनः ।
माधवाख्यः स चास्वस्थः सर्वस्वं दातुमुद्यतः ।।
मन्यसे यदि तत्तुभ्यं स सर्वं तत् प्रयच्छति ।
नानानर्घ्यमहारत्नमयालङ्करणोज्ज्वलम् ।।
तच्छ्रुत्वा स शनैर्मुक्तमौनः किल शिवोऽब्रवीत् ।
ब्रह्मन् भिक्षाशनस्यार्थैः कोऽर्थो मे ब्रह्मचारिणः ।।
ततः पुरोहितोऽप्येवं स तं पुनरभाषत ।
मैवं वादीर्महाब्रह्मन् किं न वेत्स्याश्रमक्रमम् ।।
कृतदारो गृहे कुर्वन् देवपित्रतिथिक्रियाः ।
धनैस्त्रिवर्गं प्राप्नोति गृही ह्याश्रमिणां वरः ।।
ततः सोऽपि शिवोऽवादीत् कुतो मे दारसंग्रहः ।
न ह्यहं परिणेष्यामि कुलाद् यादृशतादृशात् ।।
तच्छ्रुत्वा सुखभोग्यं च मत्वा तस्य तथा धनम् ।
स प्राप्तावसरो लुब्धः पुरोधास्तमभाषत ।।
अस्ति तर्हि सुता कन्या विनयस्वामिनीति मे ।
अतिरूपवती सा च तां च तुभ्यं ददाम्यहम् ।।
यच्च प्रतिग्रहधनं तस्मात् प्राप्नोषि माधवात् ।
तदहं तव रक्षामि तद्भजस्व गृहाश्रमम् ।।
इत्याकर्ण्य स सम्पन्नयथेष्टार्थः शिवोऽब्रवीत् ।
ब्रह्मन् ग्रहस्तवायं चेत् तत् करोमि वचस्तव ।।
हेमरत्नस्वरूपे तु मुग्ध एवास्मि तापसः ।
त्वद्वाचैव प्रवर्त्तेऽहं यथा वेत्सि तथा कुरु ।।
एतच्छिववचः श्रुत्वा परितुष्टस्तथेति तम् ।
मूढो निनाय गेहं स्वं तथैव स पुरोहितः ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सन्निवेश्य च तत्रैनं शिवाख्यमशिवं ततः ।
यथाकृतं शशंसैतन्माधवायाभिनन्दते ॥ (क्रमशः)

And after a few days had passed, that prince of rogues said with weak voice to the chaplain who was at his bedside, "My condition is miserable in this body, so bring, good Brahman, some distinguished man of your caste, in order that I may bestow my wealth upon him for my happiness here and hereafter ; for, life being unstable, what care can a wise man have for riches ? "The chaplain,who was devoted to presents, when addressed in this way, said, "I will do so", and Mādhava fell at his feet. Then whatever Brahman the chaplain brought Mādhava refused to receive, pretending that he wanted a more distinguished one. One of the rogues in attendance upon Mādhava, when he saw this, said, "Probably an ordinary Brahman does not please him. So it will be better now to find out whether the strict ascetic on the banks of the S'iprā named S'iva pleases him or not. When Mādhava heard that, he said plaintively to that chaplain : "Yes, be kind and bring him, for there is no other Brahman like him."

The chaplain, thus entreated, went near S'iva, and beheld him immovable, pretending to be engaged in meditation. And then he walked round him, keeping him on his right hand, and sat down in front of him : and immediately the rascal slowly opened his eyes. Then the family priest, standing before him, said with bowed head, "My Lord, if it will not make you angry, I will prefer a petition to you. There is dwelling here a very rich Rajput from the Deccan, named Mādhava, and he, being ill, is desirous of giving away his whole property : if you consent, he will give you that treasure which glitters with many ornaments made out of priceless gems." When S'iva heard that, he slowly broke silence, and said "O Brahman, since I live on alms, and bserve perpetual chastity, of what use are riches to me ?"

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Then that chaplain went on to say to him, "Do not say that, great Brahman, do you not know the due order of the periods in the life of a Brahman? By marrying a wife, and performing in his house offerings to the Manes, sacrifices to the Gods and hospitality to guests, he uses his property to obtain the three objects of life. The stage of the householder is the most useful of all." Then S'iva said, "How can I take a wife, for I will not marry a woman from any low family?" When the covetous chaplain heard that, he thought that he would be able to enjoy his wealth at will, and catching at the opportunity, he said to him, "I have an unmarried daughter, named Vinaysvāminī, and she is very beautiful. I will bestow her in marriage on you. And I will keep for you all the wealth which you receive as a donation from Mādhava, so enter on the duties of a house-holder." When S'iva heard this, having got the very thing he wanted, he said, "Brahman, if your heart is set on this, I will do what you say. But I am an ascetic who knows nothing about gold and jewels: I shall act as you advise; do as you think best." When the chaplain heard that speech of S'iva, he was delighted, and the fool said, "Agreed" and conducted S'iva to his house. And when he had introduced there that inauspicious guest named S'iva (lit. the auspicious or friendly one), he told Mādhava what he had done and was applauded by him.

कालिदासभवभूती

[स्वर्गत-द्विजेन्द्रलाल-रायः]

कालिदासीय-दुष्यन्तस्य प्रधानगुणेष्वन्यतमम् धर्मभीरुतामुपलक्षयामः । किं बहुना यः किल तस्य प्रधानं कलङ्कः सोऽपि प्रत्याख्यानवृत्तान्तो धर्मभयमूलक इति कविना निर्दिष्टम् । पञ्चमेऽङ्के शकुन्तलां

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रत्याचक्षाणेन तेनोच्यते—भोस्तपस्विनः! चिन्तयन्नपि न खलु स्वीकरणमत्रभवत्याः स्मरामि। तत् कथमिमामभिव्यक्तसत्त्वलक्षणां प्रत्यात्मानं क्षेत्रियमाशङ्कमानः प्रतिपत्स्ये। इति। परमेतावता न खलु तस्य चारित्रमाहात्म्यं विशेषतोऽभिवर्धते। भद्रजनमात्रेणैव-माचरितव्यम्। यस्य खलु रम्यरमणीदर्शं कामोद्रको भवति, यश्च तमुद्रिक्तं कामं दमयितुं न प्रभवति, न खलु स मनुष्यपदवाच्यः, सर्वथा पशुरेवासौ। कालिदासस्य मतेन रघुवंशीयानां सर्वेषामेव नरपतीनां 'मनः परस्त्रीविमुखप्रवृत्ति'। न खल्वत्राहङ्कारकारणं किमपि विद्यते। बायरणवर्णितो डन् जुयान् विरल एव लोके। प्रायेण सर्व एव सभ्या जनाः परपत्नीं मातरमाकलयन्ति। एतस्यान्यथाभावो निन्दाबीजं सद्भावः पुनः सविशेषं प्रशंसाकारणं न भवति।

कालिदासेन तावत् स्वीयो दुष्यन्तः कतिपयैर्मनोहरैः सद्गुणैः परिमण्डितः। प्रथमतस्तावत् कालिदासो दुष्यन्तं चित्रकरप्रवेकरूपे-णाङ्कितवान्। षष्ठेऽङ्के राजा स्वचित्रितं शकुन्तलाचित्रं निर्वर्णयन् विदूषकायोत्कृष्टचित्रलक्षणमुपवर्णयति—

अस्यास्तुङ्गमिव स्तनद्वयमिदं निम्नेव नाभिः स्थिता
दृश्यन्ते विषमोन्नताश्च वलयो भित्तौ समायामपि।
अङ्गे च प्रतिभाति मार्दवमिदं स्निग्धप्रभावाच्चिरं
प्रेम्णा मन्मुखमीषदीक्षत इव स्मेरा च वक्तीव माम्॥

चित्रस्यैतस्य सन्दर्शनेन चित्रार्पितामेव शकुन्तलां मिश्रकेशी भ्रमेण पारमार्थिकीं शकुन्तलां मन्यते। अन्ततश्च चित्रं निरीक्षमाणस्य स्वयं चित्रकरस्यापि भ्रमोन्मादः प्रादुर्भूतः। स च शकुन्तलावदनकमलाभि-लाषिणं चित्रन्यस्तं मधुकरं विलोक्य ब्रवीति—

अयि भोः कुसुमलताप्रियातिथे, किमत्र परिपतनखेदमनुभवसि।
एषा कुसुमनिषण्णा तृषितापि सती भवन्तमनुरक्ता।
प्रतिपालयति मधुकरी न खलु मधु विना त्वया पिबति॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तथापि मधुकरो नोत्पतित इति सन्दृश्य राज्ञा क्रोधस्य वशं गतेनोच्यते—

भो न मे शासने तिष्ठसि। श्रूयतां तर्हि। सम्प्रति हि—

अक्लिष्टबालतरुपल्लवलोभनीयं
पीतं मया सदयमेव मह्रोत्सवेन।
बिम्बाधरं दशसि चेद् भ्रमर प्रियाया-
स्त्वां कारयामि कमलोदरबन्धनस्थम्॥ इति।

विदूषकेणोपलक्षितं राज्ञश्चित्तविभ्रमः सञ्जात इति। तेन च भीतोऽसौ राजानं प्रतिबोधयति—भोः! चित्रं खल्विदम्। इति। तदानीमपगतो राज्ञो मोहः—कथं चित्रम्!

यस्य खल्वेवंविधं चित्रनैपुण्यं न खलु सः प्राकृतश्चित्रकरः।

पञ्चमेऽङ्के कस्मिंश्चनापूर्वमधुरे श्लोके राज्ञश्चरित्रस्य विभागान्तरं प्रेक्षामहे। शकुन्तलां परिणीय राजधानीं समागतो नरपतिस्तां विस्मृतवान्। स खलु राजसभायां समासीनः नेपथ्यगतं गीतध्वनिं शृण्वन्नासीत्, शृण्वंश्चासौ विह्वलः सञ्जातः। स खलु चिन्तयति—

रम्याणि वीक्ष्य मधुरांश्च निशम्य शब्दान्
पर्युत्सुको भवति यत् सुखितोऽपि जन्तुः।
तच्चेतसा स्मरति नूनमबोधपूर्वं
भावस्थिराणि जननान्तरसौहृदानि॥ इति।

किमपि राज्ञः स्मृतिपथमुपारोहति, अथच नैवोपारोहति। स खलु निरवधिसुखे कमपि निरवधिविषादमनुभवति, किमेवमिति नैवावबुध्यते। एकस्मिन्नेवास्मिन् श्लोके शकुन्तलां प्रति तस्य समाच्छन्नं प्रेम तस्य च सङ्गीततत्त्वविज्ञानं सममेव सम्मिलितं सम्पश्यामः। इदं प्रेम दुर्वाससोऽभिशापमपि संप्लाव्येव समुत्तिष्ठति, इदं सङ्गीततत्त्वविज्ञानं कवेः कवित्वमपि संप्लाव्येव समुत्तिष्ठति। चिन्ता चैवानुभूतिश्च, विरहश्चैव मिलनञ्च, स्थैर्यञ्चैवोच्छ्वासश्चात्रा-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गत्य सम्मिलितानि। मन्ये तरङ्गायितनीलसागरोपरि निपतिताः प्राभातिकस्वर्णमरीचयः, निबिडनीलनीरदानामुपरि विहसितः पूर्णचन्द्रः, ललितायाः कौमुद्या उपरि संलग्नारण्यान्याश्छाया।

शेक्षपीयरेणैकत्रोक्तम्—

If music be the food of love, play on,
Give me excess of it; that surfeiting
The appetite may sicken and so die.—
That strain again;—it had a dying fall;
O, it came over my ear like the sweet south,
That breathes upon a bank of violets,
Stealing, and giving odour.

यदि सङ्गीतं भोज्यं प्रेम्णः, कुरु सङ्गीतानुबन्धम्। दीयतां मेऽस्य प्राचुर्यं यथातिभोजनेन बुभुक्षा परिग्लाना म्रियेत। पुनरपि सैव स्वरलहरी [विधीयताम्], अवसानमस्या मुमूर्षदिवासीत् [चिरायमाणम्]। अहो, समुपागच्छदियं मे श्रवणविवरं मधुर इव दक्षिणानिलः, यः खलु वहति मन्दं मन्दं नीलकमलमण्डितस्य सरस्तटस्योपरि मुष्णंश्च प्रयच्छंश्च सौरभ्यम्।

एतदतीव सुन्दरम्। परमेतदपि श्लोकस्यास्य पुरतो निष्प्रभमेव। न खल्वेतावानर्थस्तत्रास्ति। युगपदेव पूर्वजन्म चेह जन्म च तत्र नास्ति। युगपदेवाप्सरसां नृत्यं मर्त्यस्य च रुदितम्, प्रभातस्याशा सन्ध्यायाश्च विषादः, मातूरोदनं शिशोश्च हासस्तत्र नास्ति। श्लोकस्यास्य तुला नास्ति।

षष्ठेऽङ्के राज्ञः परमार्थत एव राजकीयः सद्गुणः कश्चिदस्माकं दृष्टिपथमुपयाति। स्वयमेवासौ राजकार्याणि पर्यवेक्षते। अङ्कस्यास्य विष्कम्भके राज्ञो राज्यशासनप्रथाया निदर्शनमेकमुपलभामहे।

नगरपालश्यालकेन रक्षियुगलेन च धीवरः कश्चिद् बद्ध्वानीतः। क्व तावल्लब्धं धीवरेण राजनामाङ्कितमङ्गुलीयकम्? धीवरो बोधयति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कस्यचन रोहितमत्स्यस्योदराभ्यन्तरे समधिगतं तेनाङ्गुलीयकमिति। नगरपालश्यालकेनाङ्गुलीयकमाघ्राय प्रतीतम्, "बाढम्, काममत्र वर्तत एव मत्स्यस्य गन्धः"। इत्युक्त्वा तेनाङ्गुलीयकं गृहीत्वा राजसमीपे प्रस्थितम्। अवसरे तस्मिन् धीवरस्य ताडनाय रक्षित्रोः पाणयः शुडशुडायन्ते स्म। (अयं तावद्रक्षिणां सनातनः स्वभाव इति प्रतीयते।) ततश्च नगरपालश्यालकेन पुनः प्रविश्योक्तम्—उपपन्नमिदम्। इति। श्रुत्वा धीवरेणोक्तम्, हा हतोऽस्मीति। ततश्च नगरपालश्यालकेन धीवरस्य बन्धनमोचनमादिष्टम्, प्रदत्तं च तस्मै राजदत्तं पारितोषिकम्। रक्षिणोक्तम्—दास्याः पुत्रो यमसदनं प्रविश्य प्रतिनिवृत्त इति। एवमुक्त्वानिच्छन्निव धीवरं मोचितवान्। धीवरेण शूलदण्डान्निष्कृतिर्लब्धेति दृष्ट्वा सविशेषो विक्षोभः समुत्पन्नो रक्षिणोर्मानसे इत्यनुपदमेव संपश्यामः। ततश्च धीवरेण पारितोषिकस्यार्धे मद्यपानाय रक्षिभ्यां प्रदत्ते सत्यभिनिर्वृत्तं तेषां सख्यम्।

एतस्माच्च स्पष्टीभवति—तदानीमपि रक्षिणां प्रभावः साम्प्रतिककालाल्लेशतोऽपि न्यूनो नासीत्, तदानीमपि धृतस्य ताडनाय तेषां पाणयः शुडशुडायन्ते स्म। प्रकृतिरियं मनुजानाम्। नीचेषु शक्तिः, बालकस्य पाणौ खड्गः, घातके च बलम्..प्रायेणैतेषां फलं समानमेव। ततश्च तदानीन्तनानां रक्षिणां न केवलं ताडनाय परमुत्कोचग्रहणायापि पाणयः स्फुरन्ति स्मेत्येतदपि दृश्योऽस्मिन् दृष्टिप्रथमवतरति। परं दुर्दान्तः पशुकल्पोऽप्ययं जनः दुष्यन्तस्य राज्यो दूरादप्यप्रियं राजादेशं पालयितुं न द्वैधं प्रकटयति। ईदृशं तावद् दृढं कठोरञ्च राज्ञः शासनम्।

नाटकेऽस्मिन् राज्ञः कोमलं गुणान्तरं प्रत्यक्षीभवति। पश्यामस्तावत् स खलु विशेषतो राज्ञीभ्यो बिभेति। चित्रं निगहृति, राज्ञीभ्यो भयेन वितथमेव वदति वयस्यं—स्ववर्णितः शकुन्तलावृत्तान्त आन्तं परिहासविजल्पित इति, विरहे च राज्ञीनां पुरस्तात् प्रमादेन सहसा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शकुन्तलाया नामोच्चारयन्नेव लज्जयाधोमुखो भवति। न जानीमो दोषमिमं व्यपदिशामो गुणं वेति। समयविशेषे गुणोऽयं समयविशेषे च दोषः।

दुष्यन्तस्य चित्रकर्मणि नैपुण्यं सङ्गीतशास्त्रे च व्युत्पत्तिः कलाविद्यायां पारदर्शितामात्रम्, न खलु चरित्रस्य गुणौ तौ भवितुमर्हतः। न खलु तस्य चरित्रे विशेषतः कापि गुणराजिर्विलसति यस्या बलेन सर्वगुणसम्पन्नत्वेनासौ वर्ण्येत। कामं कालिदासेन महाभारतीयदुष्यन्तचरित्रस्योत्कर्षः संसाधितस्तथापि न खल्वसौ दुष्यन्तचरित्रं सर्वजनानुसरणीयं विधातुं प्रयतितवान्, अथवा यदि प्रयतितवांस्तर्हि तस्य प्रयासस्य वैयर्थ्यं स्फुटमेव। न खलु तथाविधोऽतिथिः कस्यापि गृहे वाञ्छनीयः। न खलु कापि बालिका तथाविधं पतिं शिवस्य सविधे वरं वृणुयात्। तथाविधो वीरः कस्मिन्नपि देशे वरणीयो न स्यात्। तथाविधो नरपतिरस्माकमस्त्विति कापि प्रजा परमेश्वरस्य सविधे मस्तकं न ताडयेत्।

अयमेव पुरुषस्त्रिभुवनविख्यातस्यास्य नाटकस्य नायकः। वाचकेनोच्येत– तर्हि किमिदं संवृत्तम्? यदि दुष्यन्तचरित्रस्य कोऽपि विशेषो नास्ति तर्हि कथं नाम नाटकमिदं जगद्विख्यातं सञ्जातम्? तस्योत्तरेणेदमेवोच्यते—कामं दुष्यन्त एवमेव प्राकृतः पुरुषः, तथापि कालिदासेनासौ सुमनोहरं विक्रीडितः। तदेवेदानीं प्रदर्शयिष्यते।

(क्रमशः)

मीमांसकाभिमतं देवतास्वरूपम्

[पट्टाभिरामशास्त्री विद्यासागरः]

सर्वसंविदितमिदम्—यज्जगतीतले दैवं पुरुषकारश्चेति द्वयं स्वस्वाभिलषितं मनोरथं पुरुषार्थं वा सम्पिपादयिषूणां मानवानां प्रधानतमं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

साधनमिति। परस्परं मिलितयोरनयोस्साधनत्वम् ? आहोस्वित् पार्थक्येन ? तत्रापि देवतायाः प्राबल्यम् ? पुरुषकारस्य वा ? इति चिरन्तनात्कालादनादौ संसारेऽस्मिन् वादिनो विप्रतिपन्नाः। तेऽपि सुमतयो महर्षयः, ये दर्शनस्मृतिपुराणप्रवर्तकाः, विषयेऽस्मिन् द्वैविध्यं प्रतिपन्ना विलोक्यन्ते। तत्तत्सम्प्रदायप्रवर्तका अप्याचार्या मिथो विवदन्ते। अत्र प्राधान्येन चत्वारः पक्षा भवन्ति। केचन दैवं पुरस्कृत्य तदुपरि सर्वमपि भारं निक्षिपन्तः पुरुषकारं तदङ्गत्वेनास्थिषत। अपरे पुरुषकारस्य प्राधान्यमभिप्रयन्तस्तदुपसर्जनत्वेन दैवममंसत। अन्ये दैवं दूरीकुर्वन्तः पुरुषकारमेव स्वीचक्रुः। तरे तु पुरुषकारं तुच्छं मन्वाना दैवमेवैकं प्रधानतमं कारणं प्राहुः।

तत्र—"अथो खल्वाहुः काममय एवायं पुरुषः, स यथाकामो भवति तथाक्रतुर्भवति, यथाक्रतुर्भवति तथा तत्कर्म कुरुते, यत्कर्म कुरुते तदभिसम्पद्यते।"

"करोतु नाम नीतिज्ञो व्यवसायमितस्ततः।
फलं पुनस्तदेवास्य यद्विधेर्मनसि स्थितम्॥"
"न दैवमिति सञ्चिन्त्य त्यजेदुद्योगमात्मनः।
अनुद्यमेन कस्तैलं तिलेभ्यः प्राप्तुमिच्छति॥"
"दैवे समर्प्य चिरसञ्चितकर्मजालं
सुस्थास्सुखं वसत किं परयाचनाभिः।"
"विहाय पौरुषं यो हि दैवमेवावलम्बते।
प्रासादसिंहवत्तस्य मूर्ध्नि तिष्ठन्ति वायसाः॥"

त्यादिश्रुतिपुराणकाव्यवचनेषु सर्वेऽपि पक्षा युक्ता इवावभान्ति। कोऽत्र पक्षः श्रेयान् ? इति निर्णयो नैव सुकरः। प्रश्नोऽयमतिगम्भीरः, तथापि मीमांसकमतमनुसृत्य तदुन्नीतं पन्थानमवलम्ब्यान्तरा देवतास्वरूपमपि मीमांसकसम्मतं किञ्चिदिव निरूपयामः।

मातापितृसहस्रादप्यधिकं वात्सल्यं मानवेष्वादधानाः श्रुत्याम्नायाद्यपरनामधेया वेदाः तत्तदभिलषितं फलं सुखेन सम्पादयितुं नैक

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रकाराणि क्लेशायाससाध्यानि कर्माणि तत्तद्वर्णाश्रमानुगुण्येन विदधति, येषु च कर्मसु स्वनुष्ठितेषु कर्तारः स्वस्वाभिलषितफलोपभोगयोग्या भवन्तीति शब्दप्रामाण्याभ्युपगन्तृभिस्सर्वैरेव निर्विचिकित्सं स्वीक्रियते। तत्र योग्यतेयं कर्तृषु कथं समवैति? किं यागदानहोमपूजादिभिर्वेद-विहितैः कर्मभिः सम्यगाराधिता इन्द्रादयो देवताः तत्तत्कर्मकर्तृभ्यो योग्यतां वितरन्ति? उत देवताप्रसादनैरपेक्ष्येण तत्तत्कर्माण्येव स्वजन्या-पूर्वद्वारा कर्तॄन् तत्तत्फलोपभोगयोग्यान् विदधतीति। यदि देवता-प्रसादनैरपेक्ष्येण कर्मणामेवापूर्वद्वारा फलप्रदत्वम्, तर्हि पुरुषकारस्य प्राधान्यम्, देवतायाश्चोपसर्जनत्वम्। यदि च कर्मणां देवताराधनद्वारा तत्प्रसादजनकत्वमेव तर्हि तैः स्वनुष्ठितैः प्रसन्ना देवता एव फलदायिका इति तासां प्राधान्यं पुरुषकारस्य चोपसर्जनत्वमिति फलफलिभावः। तदत्र किं प्रतिपत्तव्यम्? इति चिरन्तनोऽयं संशयप्रवाहः।

तत्र चारुचेतसः केचनैवमूचुः—यथा हि गृहान् समागतवद्भ्योऽतिथिभ्यः पाद्यार्घ्यभोजनादिप्रदानेन तेषां तृप्तिं प्रसादञ्च सम्पादयन्ति गृहस्थाः, तथैव यागादिक्रिया अपि तृप्तिद्वारा देवताप्रसादं सञ्जिघृक्षूणां साधनतया विहिता वेदेन। तत्र यागो नाम—'यज देवपूजा-सङ्गतिकरणदानेषु' इत्यभियुक्योक्त्या देवतापूजात्मकः। पूजा च पूजनीयापेक्षया उपसर्जनीभूतैवेति न विप्रतिपन्नमिदम्। अतः पूजा-स्थानापन्नस्य यागादिकर्मणोऽपि पूजनीयदेवतापेक्षया गुणत्वमेष्टव्यम्। यागे हि सन्ति त्रयः पदार्थाः—द्रव्यं देवता त्यागश्चेति। तत्र त्यज्यमान-हविरुद्देश्यत्वं देवतात्वम्। तथाच हविर्दाने देवतायास्सम्प्रदानत्वं समायाति। सम्प्रदानस्य च 'कर्मणा यमभिप्रैति स सम्प्रदानम्' इति कर्मकारकापेक्षयाप्यभिप्रेयमाणत्वेन प्राधान्यं स्वीकर्तव्यम्। स्वीकृते च तस्याः प्राधान्ये पूजायाः पूज्यमानप्रीतिकरत्वं गुर्वादौ दृष्टमिति यागस्य पूजारूपस्य देवतार्थत्वाश्रयेण लौकिकी रीतिरप्यनुसृता भवति। एवञ्च "ते देवा हविरदन्तु" "देवान् यजते यः स देवानां भोगाय भवति" "तृप्तः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एवैनमिन्द्रः प्रजया पशुभिश्च तर्पयति" "आहुतिभिर्वै देवान् प्रीणाति" "देवान् भावयतानेन ते देवा भावयन्तु वः । परस्परं भावयन्तः श्रेयः परमवाप्स्यथ ।।" इत्यादिमन्त्रार्थवादेतिहासपुराणान्यप्यनुसृतानि भवन्तीति यागस्य देवताप्रसादजनकत्वम्, तत्प्रसादस्य फलजनकत्वमित्यभ्युपगन्तव्यम् । देवताप्रसादश्च विग्रहभोगादिव्यतिरेकेणानुपपन्न इति तासां विग्रहः, हविषां भोगः, ऐश्वर्यं, प्रसन्नता, फलदातृत्वञ्चेति विग्रहादिकं पञ्चकमवगमयति । स्पष्टञ्चैतत्—"ऋष्वा त इन्द्र स्थविरस्य बाहू उपस्थेयाम शरणा बृहन्ता" "आ द्वाभ्यां हरिभ्यामिन्द्र याह्या चातुर्भिरा षड्भिर्हूयमानः । आष्टाभिर्दशभिः सोमपेयमयं सुतः सुमखमा मृधस्कः ।।" "तुभ्यं सुतो मघवन् तुभ्यं पक्वोऽद्धीन्द्र पिब च प्रस्थितस्य" इत्यादिषु मन्त्रवर्णेष्वर्थतः पर्यालोच्यमानेषु इन्द्रादीनां देवतानां विग्रहवत्त्वम्, हविर्भोक्तृत्वम्, पुरुषविधत्वञ्चेति । तथा च यागाराधिताश्चेतना देवता यागीयं हविरश्नत्यः, तेन च तृप्तास्सत्यो यजमानाय फलं वितरन्तीति प्रधानीभूतदेवताप्रसादस्यैव फलप्रयोजकत्वे सम्भवति नाश्रुतापूर्वकल्पनाद्वारा गुणभूतस्य यागस्य फलजनकत्वं स्वीकर्तव्यम् । अतश्च पुरुषकारापेक्षया दैवस्य प्राधान्यमेष्टव्यमिति ।

तदिदं न्यायविदो नानुमन्यन्ते—"यजेत स्वर्गकामः" इतीदमधिकारवाक्यं यागस्य स्वर्गः फलमित्याह । यागश्चायं "यदाग्नेयोऽष्टाकपालः अमावास्यायां पौर्णमास्याञ्चाच्युतो भवति" इत्याद्युत्पत्तिवाक्यैर्विहितः । अत्र च 'आग्नेय' इत्यनेन पदेनाग्निदेवताकपुरोडाश इत्यर्थकेन पुरोडाशापेक्षया अग्नेर्देवताया गुणत्वं प्रतीयते । द्रव्यदेवतासम्बन्धाच्च कल्प्यमानो यागस्तदनुगुण एव कल्पनीयः—अग्निदेवताकाष्टाकपालपुरोडाशद्रव्यको याग इति । एवंविध एव यागोऽधिकारवाक्ये यजिना परामृश्यत इति देवताया उपसर्जनत्वमेव युक्तम्, न तु प्राधान्यम्, अन्यथा उत्पत्तिवाक्यगतगुणभावविरोधात् । उत्पत्तिवाक्ये देवतायास्त्यागांशं प्रति गुणभावः, अधिकारवाक्ये तु त्यागात्मकयागस्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

देवतां प्रति गुणभाव इति न युक्तमिदम्। अतो या रीतिरुत्पत्तिवाक्ये सैव सर्वत्रापि वाक्यान्तरेषु स्वीकर्तव्येति न्याय्यः पन्थाः। तत्रापि— 'अस्मिन् कर्मणि इयं देवता' इति ज्ञानं विधिनैव भवितुमर्हति। विधिमन्तरा नान्यः कश्चनोपायो विलोक्यते। अत एवोक्तं भट्टपादैः—

विधिनैव हि देवत्वं प्रतिकर्मावधार्यते।
न जात्या देवतात्वं हि क्वचिदस्ति व्यवस्थितम्॥ इति।
(तं० वा० पृ० २३७, पु० सं०)

अयञ्च विषयः—'विधिशब्दस्य मन्त्रत्वे भावस्स्यात् तेन चोदना' (जै० सू० १०।४।२३) इति दाशमिकाधिकरणे सुविशदं प्रत्यपादि भाष्यवार्त्तिककारादिभिः। तत्र हि—"आग्नेयोऽष्टाकपालः" इत्यादिविधिगतदेवताशब्द एव निगमेषु त्यागादौ च प्रयोक्तव्यः, उत पर्यायशब्दोऽपि प्रयोक्तुं शक्यते? इति सन्दिह्यैवं पूर्वपक्षः कृतः—यदि शब्दस्यैव केवलं कर्मसु देवतात्वम्, तर्हि भवेदपि विधिगतस्यैव तस्य निगमादिषु नियमः। शब्दस्य देवतात्वे तस्यार्थोऽस्ति न वा? यदि नास्ति, तर्हि लोकवेदयोरग्न्यादिशब्दानामर्थपरत्वप्रसिद्धेर्व्याहृतिस्स्यात्। यद्यस्ति, तर्हि तस्यैव देवतात्वोपपत्तौ निगमेष्वग्न्यादिपदनियमे प्रमाणाभावः। यद्यपि त्यज्यमानद्रव्योद्देश्यत्वरूपदेवतात्वस्यार्थेऽसम्भव एव, तथापि—उद्देश्यत्वस्योच्चारणघटितत्वे प्रमाणाभावेन द्रव्यत्यागकालीनज्ञानकर्मत्वरूपस्य देवतात्वस्यार्थेऽप्युपपत्तेर्न कोऽपि दोषः। अतोऽर्थमङ्गीकृत्य यदि देवतात्वं शब्दस्येष्यते, तर्ह्यर्थस्यैव प्राधान्यं देवतात्वञ्च स्वीकर्तव्यम्। तदिदमुक्तं भट्टपादैः—'शब्दोऽर्थं प्रत्यत्यन्तगुणभूतः। अर्थ एव कार्योपयोगी, प्रधानत्वात्। अग्निशब्दो न स्वयं कार्येण द्रव्येण सह सम्बध्यते। किं तर्हि? अर्थेन सम्बध्यते। अर्थपरत्वाच्च निर्देशस्य पर्यायशब्दानामनिवृत्तिः.......। तस्मादग्निशब्दो न शक्यो नियन्तुम्' (तं० वा० पृ० १९२६ पु० सं०) इति। अतश्चार्थस्यैव देवतात्वात् न क्वापि निगमेषु विधिगतशब्दनियम इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सिद्धान्तस्तु—उच्चारणमन्तरेण केवलं ज्ञानमात्रेणार्थस्य देवतात्वं न युक्तियुक्तम्। तथा सति "अग्नये पावकाय, अग्नये शुचये" इत्यादावेकेनापि पदेनार्थस्य विधानसम्भवे पदद्वयवैयर्थ्यापत्तेः। यद्यप्यत्र पावकपदं पुराणादिपर्यालोचनयाऽग्निविशेषवाचि, तथापि तेनैवाग्नित्वसमानाधिकरणविशेषधर्मोपस्थित्युपपत्तेरग्निपदवैयर्थ्यापत्तिः। देवतोद्देश्यकद्रव्यत्यागकाले शब्दोच्चारणमवश्यं कर्तव्यमिति शिष्टाचारसमयः। अत एव—

> नामगोत्र समुच्चार्य सम्यक् श्रद्धान्वितो ददेत्।
> सङ्कीर्त्य देशकालादि तुभ्यं सम्प्रददे इति॥
> न ममेति स्वसत्ताया निवृत्तिमपि कीर्तयेत्।
> दानहोमादिकं कुर्यादेवं श्रद्धासमन्वितः॥

इति वृद्धवसिष्ठवचनमपि सङ्गतार्थं भवति। अतः केवलार्थस्य देवतात्वपक्षे देवतास्वरूपमिदमेव—द्रव्यत्यागकालीनोच्चारणकर्मीभूतशब्दप्रतिपाद्यत्वमिति, तच्च "अग्नये पावकाय" इत्यादावेकेनापि पदेनार्थस्य विधानसम्भवे पदद्वयवैयर्थ्यापत्तेर्दुष्टमित्युक्तमेव। तथाच त्यज्यमानद्रव्योद्देश्यत्वं देवतात्वमित्यत्रोद्देश्यत्वमात्रं देवतात्वमित्यङ्गीकारे प्रतिनिधीयमानस्यापि देवतात्वसम्भवेन 'न देवताग्निशब्दक्रियमन्यार्थत्वात्' इति षष्ठोक्तस्य देवताप्रतिनिध्यभावस्यानुपपत्तिप्रसङ्गात् विधेरपि तत्रोपलक्षणत्वमङ्गीकर्तव्यम्—शब्दविशेषेण या उद्देश्यतया विधीयते सा देवतेति। न चैवं विधानाद्देवतात्वं, देवतायाश्च विधानमितीतरेतराश्रयत्वं शङ्क्यम्; न हि देवतायास्सत्या विधानम्, किन्तु शब्दोद्देश्यतामात्रेण विहिता पश्चाद्देवतात्वं प्रतिपद्यत इति न कोऽपि दोषः।

एवञ्च लाघवाद्धविस्त्यागकालीनविहितशब्दोच्चारणकर्मत्वमेव देवतात्वम्, न तु निरुक्तज्ञानकर्मत्वम्, नापि त्यागकालीनोच्चारणकर्मीभूतशब्दप्रतिपाद्यत्वम्, गौरवात्। एतादृशदेवतात्वमेव 'आग्नेयः'

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इत्यत्र तद्धितार्थः। अतः प्रधानभूततदर्थानुरोधेनाग्न्यादिप्रातिपदिके शब्दलक्षणामङ्गीकृत्य तस्यैव देवतात्वं विधिना विधीयते, अर्थस्य त्वानुषङ्गिकतया प्रतीतेः तादृशशब्दप्रतिपाद्यत्वरूपं भाक्तं देवतात्वमिति न तच्छास्त्रेण विधीयते । सति चैवं सर्वत्र शब्द एव वाक्यार्थान्वयीति नान्यशब्दप्रयोगस्त्यागकाल इति सिध्यति। अत एव देवतास्वरूपं विशदयितुमारब्धा भाष्यकाराः शबरस्वामिनः 'का पुनरियं देवता नाम' इत्यारभ्य 'एकं तावन्मतम्' 'अपरं मतम्' इत्यादिना मतद्वयं प्रतिपाद्य तत्रारुचिञ्चोद्भाव्यान्ते एवमुपसमाहार्षुः—'किन्तर्हि! शब्द एव हविषा सम्बध्यते। तत्सम्बन्धादर्थोऽपि देवता भविष्यति। यस्यां हि शब्दो हविषा तादर्थ्येन सम्बध्यते सा देवता। शब्दे कार्यस्यासम्भवादर्थे कार्यं भविष्यति। इह तु शब्द एव कार्यं सम्भवति। तस्मान्नार्थप्रत्यायनार्थः शब्दः' (शा० भा० १०।४।१२) इति। इदञ्च भाष्यं वार्त्तिककारा एवं व्याचख्युः—'अग्निशब्द एवाष्टाकपालेन सम्बध्यमानोऽर्थात्तस्य देवतात्वं प्रतिपादयति। यथा 'वैष्णवीमनुब्रूयात्' इति ऋगुच्यमाना ऋगर्थं प्रतिपादयति। न च विवक्षित ऋगर्थः कार्ययोगेन। एवमिहाप्यग्न्यर्थो न कार्ययोगेन विवक्षितः। अपि तु योऽर्थमष्टाकपालेन सम्बन्धयितुमिच्छति तस्यापि वाचिका श्रुतिरुच्चारयितव्या।......यस्य पुनरग्निश्रुतिरेवाष्टाकपालेन सम्बध्यते, तदुच्चारणमेव विधीयते—अग्नय इत्युच्चार्याष्टाकपालं त्यजेदिति, तस्याग्न्यर्थो देवतेत्यनुवाद एव' इति। (तं० वा०, पृ १९२८पु० सं०)।

एवमेव खण्डदेवाचार्या अपि 'न देवताग्निशब्दक्रियम्' इत्यत्र षष्ठे देवतानां प्रतिनिध्यभावमुपपाद्यान्ते एवं प्रत्यपादयन्—'यदा तु दाशमिकाधिकरणवक्ष्यमाणरीत्या विधिगतशब्दविशिष्टस्यार्थस्य तादृशशब्दमात्रस्य वा देवतात्वम्, तदा कः प्रसङ्गः शब्दान्तरस्य? न हि हविस्त्यागकालीनोच्चारणकर्मत्वविशिष्टविधिगतशब्दत्वसमनियतमखण्डोपाधिरूपं वृद्धव्यवहारसिद्धं देवतात्वं समस्ति। यदि त्वर्थस्यापि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

देवतात्वं कथञ्चिदङ्गीक्रियते, ततस्तत्रापि तादृशविधिगतशब्द-प्रतिपाद्यत्वसमनियतमेव तदङ्गीकृत्य प्रतिनिध्यभावः समर्थनीयः' इति।

एतेन प्रमाणजातेनेदमत्र निर्गलितं यच्छब्दविशिष्टस्यार्थस्य देवतात्वम्, शब्दमात्रस्य वा, न त्वर्थस्य। विधिरेव च देवतास्वरूपावगमे शरणम्, देवता च यागादिक्रियां प्रति गुणभूतैव न प्रधानभूतेति। एवञ्चार्थवादमन्त्रपुराणानां देवताविग्रहादिकं पुरुषविधत्वञ्च प्रतिपादयतां यथा विध्यानुगुण्यं भवेत्तथा शक्यार्थपरित्यागपुरस्सरं तात्पर्यं वर्णनीयम्, अन्यथा तेषां प्रामाण्यस्यैव भङ्गस्स्यात्। अतश्च देवताप्रसादनैरपेक्ष्येण सम्यगनुष्ठितानि कर्माण्येव मानवेभ्यः फलं वितरन्ति स्वजन्यापूर्वद्वारेति पुरुषकारस्यैव प्राबल्यं दैवापेक्षया स्वीकर्तव्यमिति॥

धम्मपदं

[पूर्वतोऽनुवर्तते]

न तं कम्मं कतं साधु यं कत्वा अनुतप्पति।
यस्स अस्सुमुखो रोदं विपाकं पटिसेवति॥८॥
न तत् कर्म कृतं साधु यत् कृत्वा ह्यनुतप्यते।
यस्य चाश्रुमुखो रुदन् विपाकं प्रतिसेवते॥

That deed is not done well, which having done one is filled with repentance, whose fruit one receives weeping and with face bathed in tears.

तञ्च कम्मं कतं साधु यं कत्वा नानुतप्पति।
यस्स पतीतो सुमनो विपाकं पटिसेवति॥९॥
तच्च कर्म कृतं साधु यत् कृत्वा नानुतप्यते।
येन प्रतीतः सुमना विपाकं प्रतिसेवते॥

But that deed is done well, which having done one is

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

not filled with repentance, whose fruit one enjoys with pleasure and peace of mind.

मधुवा मञ्ञाती बालो याव पापं न पच्चति ।
यदा च पच्चती पापं अथ दुक्खं निगच्छति ॥१०॥
मधुवन्मन्यते बालो यावत् पापं न पच्यते ।
यदा च पच्यते पापमथ दुःखं निगच्छति ॥

A fool thinks his evil deed (sweet) as honey, so long as it does not bear fruit. When, however, the evil deed bears fruit, then he suffers grief.

[पापोपि पस्सति भद्रं याव पापं न पच्चति ।
यदा च पच्चति पापं पापो पापानि पस्सति ॥
पापोऽपि पश्यति भद्रं यावत् पापं न पच्यते ।
यदा च पच्यते पापं पापः पापानि पश्यति ॥]
मासे मासे कुशग्गेन बालो भुञ्जेथ भोजनम् ।
न सो सङ्खतधम्मानं कलं अग्घति सोलसिं ॥११॥
मासे मासे कुशाग्रेण बालो भुञ्जीत भोजनम् ।
न स संख्यातधर्माणां कलामर्हति षोडशीम् ॥

Month after month the fool may eat his food with the tip of the Kus'a, grass, still he is not worth the sixteenth part of those who have well understood the law.

न हि पापं कतं कम्मं सज्भु खीरं व मुच्चति ।
डहं तं बालमन्वेति भस्मच्छन्नो व पावको ॥१२॥
न हि पापं कृतं कर्म सद्यः क्षीरं व मुच्यते ।
दहंस्तं बालमन्वेति भस्माच्छन्नो व पावकः ॥

An evil deed when perpetrated does not turn sour straightaway like (new-drawn) milk, but like smouldering fire follows the fool and burns him.

[नाधर्मश्चरितो लोके सद्यः फलति गौरिव ।
शनैरावर्तमानस्तु कर्तुर्मूलानि कृन्तति ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यदि नात्मनि पुत्रेषु न चेत् पुत्रेषु नप्तृषु ।
न त्वेव तु कृतोऽधर्मः कर्तुर्भवति निष्फलः ॥
अधर्मेणैधते तावत् ततो भद्राणि पश्यति ।
ततः सपत्नाञ्जयति समूलस्तु विनश्यति ॥ मनु ४।२७२

Unrighteousness, when perpetrated in this world does not bear fruit forthwith, even as a cow, when grazed gives milk forthwith, but revolving slowly it cuts off the roots of the perpetrator. If unrighteousness is not visited on the doer, it is visited on his sons, if not on his sons on his grandsons, but unrighteousness never fails to bear fruit in respect to the perpetrator. Man prospers through unrighteousness, then he sees (gets) the good things of life, then he conquers his antagonists and at last he is destroyed root and branch.

नाधर्मश्चरितो राजन् सद्यः फलति गौरिव ।
शनरावर्त्यमानो हि कर्तुर्मूलानि कृन्तति ॥
पुंत्रेषु वा नप्तृषु वा न चेदात्मनि पश्यति ।
फलत्येव ध्रवं पापं गुरुभुक्तमिवोदरे ॥ महाभा० २।८०।२३
यदि नात्मनि पुत्रेषु न चेत् पुत्रेषु नप्तृषु ।
न हि पापं कृतं कर्म सद्यः फलति गौरिव ॥ महा० १२।६१।२१

Gr. Opse theōn aleousi muloi, aleousi de lepta.

The mills of the Gods grind slowly, but they grind exceeding small.

"Punishment is lame, but it comes."

"Gottes Mühlen mahlen langsam
mahlen aber trefflich klein,
Ob aus Langmuth er sich säumet
bringt mit Schärf' er alles eïn."

FRIEDRICH VON LOGAU.

'Though the mills of God grind slowly,
Yet they grind exceeding small;

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Though with patience He stands waiting,
With exactness grinds He all.'
LONGFELLOW.

The Last Rose of Summer,

'T is the last rose of summer left blooming alone,
All her lovely companions are faded and gone,
No flower of her kindred, no rosebud is nigh
To reflect back her blushes or give sigh for sigh.
I'll not leave thee, thou lone one, to pine on the stem ;
Since the lovely are sleeping, go sleep thou with them :
Thus kindly I scatter thy leaves o'er the bed
Where thy mates of the garden lie scentless and dead.
So soon may I follow when friendships decay,
And from love's shining circle the gems drop away,
When true hearts lie withered and fond ones are flown,
Oh who would inhabit this black world alone ?
THOMAS MOORE.

मल्लिकाकुसुमम्

[स्वर्गताप्पाशास्त्री विद्यावाचस्पतिः]

पुष्पाकरस्यावसितौ कदाचित्
कश्चिद् युवाराममुपेत्य कञ्चित् ।
ददर्श मल्लीं कुसुमैर्विहीनां
नारीं विमुक्तामिव यौवनेन ।।

न तत्र पुष्पाणि मनोहराणि
न कोरका मौक्तिकसप्रभा वा ।
नासंश्च पत्राण्यपि कोमलानि
येनाप्नुयान्नाम मनो विनोदम् ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मूले च तस्याः कुसुमोत्करस्य
विष्वग्विकीर्णानि दलानि रेजुः ।
उपस्थिते भाग्यवशेन मृत्या-
वध्यासितानीव परेतशय्याम् ॥

तस्याश्च कस्याञ्चन शाखिकाया-
मवाशिषत् पुष्पमनन्यशोभम् ।
तिरोहितेषूडुषु भानुभाभि-
र्व्योमाङ्गने शिष्टमिवोडुबिम्बम् ॥

वनश्रियं दृष्टवतोऽस्य यूनो
यदृच्छयास्मिन्निपपात चक्षुः ।
ततस्तदभ्यर्णमुपागतासा-
वुद्वीक्ष्य तद् वाचमिमामुवाच ॥

प्रसून सा श्रीर्नहि सेवते त्वां
या सत्सु जायेत सुमान्तरेषु ।
किमेकमात्रः समुपैति कान्तिं
दिवं गते रागिणि बन्धुवर्गे ॥

समूलनाशं कुसुमान्तराणि
भवत्सवर्ग्याणि ननु व्यनश्यन् ।
इयं च शुष्यत्यधुनोर्ध्वशोषं
शुचेव वीरुद्भवतः सवित्री ॥

स्वजीवपोषं किल यः पुपोष
विकासयामास च मानसं यः ।
तस्मिन् सखे बन्धुजने विनष्टे
कश्चेतना कामयिता जनेषु ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तज्जीवितं भारमिवावतार्य
श्रितां गतिं बन्धुभिराश्रय त्वम् ।
याते दिवं प्रेयसि जीवितं यत्
तत् कालकूटाक्तमिवाङ्ग शल्यम् ॥

न चेदहं त्वामनुभावयामि
दशां भवद्बन्धुजनानुभूताम् ।
यशोऽवशेषेषु ममापि बन्धु-
ष्वनुप्रयास्यामि गतिं तवैव ॥

इत्थं निगद्य स्वनखाङ्कुरेण
विलूय तद् बन्धनतः प्रसूनम् ।
विश्लेष्य पत्राण्यवमर्दनेन
व्यवाकिरद् भमितले युवा तत् ॥

महाभाष्य-पाठविमर्शः

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

"तद्युक्तात् कर्मणोऽण्" [५।४।३६] इति सूत्रस्य भाष्ये आग्नीध्र-साधारणादञ् इति वार्त्तिकम्, तस्य च व्याख्यानम्—"आग्नीध्रसाधारणादञ् वक्तव्यः। आग्नीध्रम्। साधारणम्।" इत्युपलभ्यते। वाराणस्यां मुद्रिते सुमनोहरे महाभाष्य इत ऊर्ध्वं "स्त्रियां ङीप्" इति वार्त्तिकम्, तस्य च व्याख्यानं "स्त्रियां ङीब् वक्तव्यः। आग्नीध्री साधारणी।" इत्यधिकतया सन्निवेशितम्, पादटीकायां चोक्तम्—लुप्तोऽयं पाठः सम्प्रति गौडैरुद्धृत इति।

उद्धृतमिदं वार्त्तिकं तस्य च व्याख्यानं सर्वथानपेक्षितमेव। अञ्-प्रत्यय-बलादेव "टिड्ढाणञ्०" [४।१।१५] इति सूत्रेण ङीप् सिध्यति,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

किं तदर्थं वार्त्तिकविरचनायासेन ? न खलु पिष्टमेव सम्पिष्यमाणं कमपि प्रयोजनलवं साधयति । अत एव प्रचलित एव पाठः सुसमञ्जस इत्यापाततः प्रतिभाति ।

किमिति तर्हि भाष्ये "आग्नीध्रम् । साधारणम्' इत्युदाहरणद्वयं सन्निविष्टमिति विचारे अञो ञित्त्वात् ञ्नित्यादिर्नित्यमिति सूत्रेणाद्युदात्तत्वप्रदर्शनायैवेदमुदाहरणद्वितयं समुपन्यस्तम् । अत एव आग्नी[1]ध्रम् । साधा[1]रणम् इत्येवंरूपेण स्वरचिह्नसनाथं मुद्रापणीयम् ।

कील्हर्ण् महोदयेन महाभाष्यस्य द्वितीयखण्डस्यान्ते पाठान्तरं प्रदर्शितम्—"After साधारण G has स्त्रियां ङीप् स्त्रियां ङीप्वक्तव्यः आग्नींध्रसाधारणी" इति । ङीब्वक्तव्यः इति न लिखितं परं ङीप्वक्तव्य इत्येव विलिखितम्, अतश्च विस्पष्टमेव प्रतीयते, वर्णमिदं पकारो न भवति, किन्तु 'पकारसदृशः षकार एव । अत एव "स्त्रियां ङीष् वक्तव्यः । आग्नीध्री साधारणी" इति पारमार्थिकः पाठ इति प्रतिभाति । परं "स्त्रियां ङीष् वक्तव्यः" इत्येतस्य वार्त्तिकत्वे "अयवसमरुद्भ्यां छन्दसि" इत्यव्यवहितोत्तरवर्त्तिनि वार्त्तिके ङीषोऽनुवृत्तिः प्रसज्येत । अत एव "स्त्रियां ङीष् वक्तव्यः । आग्नीध्री साधारणी ।" इति भाष्यकारवचनमिति सिध्यति । अत्र च वचने बीजमेतदेव—ऋग्वेदे साधारणशब्द आद्युदात्त एवोपलभ्यते, ङीप्प्रत्ययस्यानुदात्तत्वात् तन्निष्पन्नः साधारणीशब्देऽप्याद्युदात्तः सम्पद्येत, साधारण्येव [ऋ० सं० १।१६७।४] इत्यत्र पुनस्तस्यान्तोदात्तत्वं स्फुटमेव, तच्च ङीषमन्तरेण न सिध्यति । अत एव भाष्यकारेणोक्तं स्त्रियां ङीष् वक्तव्य इति ।

काशिकायां तु "पादार्घाभ्यां च" [५।४।२५] इति सूत्रस्य व्याख्यायां दृश्यते—आग्नीध्रसाधारणादञ् । आग्नीध्रम् । साधारणम् । स्त्रियां ङीप् । आग्नीध्री साधारणी । वाप्रकरणाच्च विकल्पन्त एतान्युपसंख्यानानि तेन यथाप्राप्तमपि भवति । आग्नीध्रा शाला । साधारणा भूरिति । काशिकाविवरणपञ्चिकायामेतदधिकृत्य किमपि नोक्तम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पदमञ्जर्यां दृश्यते—अग्नीधः शरणे रण् भत्वं* च [४।३।१२०।९]। आग्नीध्रम्। ततोऽञ्। आग्नीध्री। समानं धारणमस्य साधारणम्। अनेकं प्रत्यविशिष्टसम्बन्धम्। पृषोदरादित्वात् समानस्य सभावः, [दीर्घत्वं च] ततोऽञ्। साधारणी। ङीबर्थं वचनम्। इति। भट्टोजिदीक्षितेनाप्युक्तम्—स्त्रियां ङीबिति।

इदानीं वार्त्तिकस्यास्य बहुषु पुस्तकेष्वदृष्टत्वात् प्रक्षिप्तत्वं सम्भवति वा न वेति विचार्यते। तत्र प्रथममेवाञ्प्रत्ययस्य स्त्रियां ङीबपि फलमिति आग्नीध्री साधारणीत्युदाहरणद्वयं सङ्गतमिति प्रतिभाति। बहुषु पुनः पुस्तकेष्वेतद्द्वितयं सर्वथापेक्षितमपि नोपलभ्यते। अत एव प्रतीयते लिपिकरप्रमादात् प्राचीनेऽपि काले ङीष् ङीबाकारं पर्यगृह्णात्। ङीबर्थं तु वार्त्तिकस्यापेक्षा नास्तीति बहुभिरुत्तरवर्तिभिलेखकैः स्त्रियां ङीब् वक्तव्यः। आग्नीध्री साधारणीत्यंशः परित्यक्त इति।

रसमञ्जरी

[श्रीक्षितीश्चन्द्र-चट्टोपाध्यायः]

विश्वविद्यालये प्रशस्तं प्रकोष्ठम्। बहुमूल्ये काष्ठासनेऽध्यापकः समासीनो वर्तते, दक्षिणतश्च छात्राः, वामतः सम्मुखतश्च छात्राः समुपविष्टाः।

अध्यापकः। वत्साः, ह्यस्तावत् षष्ठी चानादरे इति सूत्रं महतायासेन व्याख्यातम्। तद् बुद्धं वा भवद्भिः?

सर्वे (समस्वरम्)। आर्य, अथ किम्।

अध्यापकः। (दक्षिणतो दत्तदृष्टिर्विनीतवेषां बालिकां प्रति) वत्से सौदामिनि, त्वमिदानीं सूत्रस्यार्थमुपवर्णय।

---

* भं च इति भाष्ये पाठः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सौदामिनी । (विवर्णमुखी) षष्ठी चानादरे......षष्ठी चानादरे ......क्षणं प्रतिपालयतु आर्यः, उच्यते एव मया......षष्ठी चानादरे (स्मृतिमभिनीय, प्रशान्तमुखवर्णा) आं ज्ञातम् । षष्ठी नाम सा देवी यस्याः प्रसादेन गृहं सन्तानसन्ततिपरिपूर्णमुपशोभते । चकारो वाक्यालङ्कारे । अनादरो नाम आदरस्य अभावः, अवेक्षणस्य अभावः । ततश्चायं वाक्यार्थः—येषां तावद् दरिद्राणां भवनेषु द्रव्याभावात् पुत्राणां दुहितॄणां च पालनं पोषणं शिक्षणं च सम्यग् न भवति तेष्वेव मातुः षष्ठ्याः कृपा सविशेषमुपलक्ष्यते, तेषामेव बहवः पुत्रा दुहितरश्च जायन्ते* इति ।

अध्यापकः । श्रीमत्याः पिता आढ्यो वा दरिद्रो वा ।

सौदामिनी । आर्य, दरिद्र एव, कथं वाढ्यः स्यात् ।

अध्यापकः । कति वा ते भ्रातरः कति वा स्वसारः ।

सौदामिनी । आर्य, भ्रातरो मे पञ्च, स्वसारश्च चतस्रः ।

अध्यापकः । सम्यक् । उपविश्यताम् ।

सौदामिनी । आर्य किं मयासंलग्नं किमप्यभिहितम् ?

अध्यापकः । नहि नहि, सम्यगेवोक्तम् । आद्यानामृषीणां वचांसि बहूनर्थान् प्रकाशयन्ति । श्रीमत्या यदुक्तं तदपि सङ्गतमेव । (वामतो वलितनयनः) चपल, त्वमपीदानीं सूत्रं व्याचक्ष्व ।

चपलः । आर्य, सूत्रमिदमतिमात्रं सरलं वर्तते । षष्ठी नाम षण्णां पूरणी । चा नाम निरतिशयसुखास्वादः पानीयविशेषः । अनादरो नाम आदराभावः, हेलेति यावत् । चकारः समुच्चयार्थकः । सूत्रकारस्यायमभिप्रायः—आदौ तावत् पञ्चपात्रपरिमितम् अमृतकल्पं चापानीयं निषेवणीयम्, ततश्च षष्ठी अपि च—नाम षष्ठपात्रसम्मितं पानीयं

---

* "I told her that where the exchequer was low, children generally arrived in shoals." *George Canterbury's Will* by Mrs. Henry Wood, chap. III.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

—हेलयैवोदरसात् करणीयेति। सोमरसस्थलाभिषिक्तं चा-पानीयं प्रातः सङ्गवे मध्याह्न अपराह्णे सायाह्ने ततश्च दिने व्यतिक्रान्ते निशायामपि निर्विशङ्कं निषेवणीयमिति हृदयम्।

अध्यापकः। चापानीयं ते नितरां प्रियमिति प्रतिभाति।

चपलः। आर्य, न केवलं ममैव, मम पितुः पितामहस्य मातुः भ्रातुः—सर्वेषामेव।

अध्यापकः। सम्यक्। (पुरतोऽवलोक्य) समञ्जस, त्वं तावत् किं तर्कयसि?

समञ्जसः। आर्य, षष्ठी नाम विभक्तिविशेषः, चकारस्तुकारार्थे इतरव्यावृत्तिदर्शनाय। अनादरे नाम अनादरेणैव, विशेषतोऽविविच्यैव। तस्मादयमर्थः—इतरा विभक्तयः स्वेषु स्वेषु विषयेषु प्रयोगमर्हन्ति, षष्ठी पुनर्लीलयैव यत्र कुत्रापि प्रयुज्यते। द्वितीया गृहे नास्ति। अलमाशङ्कया। षष्ठी कार्यं करिष्यति। तृतीया कार्यान्तरे व्यापृता वर्तते। मा भैषीः। षष्ठी सन्नद्धा वर्तते। चतुर्थी-चन्द्रलेखा दर्शन-योग्या न भवति, मुहूर्तं प्रतीक्षस्व षष्ठी-चन्द्रलेखा सर्वथानवद्यदर्शना। एवंरीत्या सर्वत्रैवाप्रतिहतप्रसरा षष्ठी। अत एव परिहासरसिकैः सूत्रमिदमित्थं व्याख्यायते। चाना नाम चणकः, दरो मूल्यम्। चणक-मूल्येनैव षष्ठी लभ्यते, यथैकयापि काकिण्या बहवश्चणका अधि-गम्यन्ते, तथैकयापि षष्ठ्या बहवोऽर्थाः संसाध्यन्ते इति।

अध्यापकः। साधु, साधु। श्रीमता भाष्यकारस्य हृदयमुद्घाटितम्। इदानीमवबुद्धं मया कथं वा भाष्यकारैरुक्तम्—एकशतं षष्ठ्यर्था इति।

सर्वैरेव भवद्भिर्नामानुरूपमेत व्याख्यातम्। कनकनिकषस्निग्धया सौदामिन्या प्रगाढेऽन्धकारेऽभिनवो विचित्रो मार्गः प्रदर्शितः। चापान-शब्दस्यैवापभ्रंशश्चपल इति चपलेनापि चापानानुरक्तिः प्रकाशिता। समञ्जसेनापि भाष्यकारवचनस्य सामञ्जस्यं विहितमिति सर्वमव-दातम्। अत्रैवाद्य विरामोऽस्तु।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

TECHNICAL TERMS AND TECHNIQUE OF

Sanskrit Grammar

A Critical, Comparative and Historical Study

BY

Kshitish Chandra Chatterji, Sastri, M.A., D. Litt.

Lecturer, Calcutta University ;
Formerly Editor, Calcutta Oriental Journal,
Surabharati, Oriental Literary Digest, etc., etc

The Modern Review (December, 1950) **says :**

"Honour to whom honour is due. Dr. Chatterji has broken entirely new ground in his **Technical Terms and Technique of Sanskrit Grammar** and demonstrated clearly that Bengal, though fallen on evil days, can even now produce works on Indology that invite and bear comparison with the best work produced in any part of the world. Who ever thought that all the technical terms admitted of satisfactory explanation and who ever imagined that a work on grammatical terminology could be made as delightful as a novel? In this volume of nearly 350 pages the technical terms of Sanskrit grammar from the Brahmanas, Nirukta, Pratishakhyas, Panini, Katyayana, Patanjali, down to Prayogaratnamala and Harinamamrita have been considered critically and historically in all their bearings and apparently arbitrary technical terms like *gha*, *bha*, *lat, lit*, etc., have been traced to their sources. **We have nothing but admiration for this masterpiece of scholarship and warmly recommend it to our readers."**

Price Rupees Ten only. *Foreign Rs. 12/-*

Postage Extra

VISVANATH CHATTERJI

81, Shyambazar Street,

CALCUTTA—4

Phone : B B. 4049

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

MANJUSHA (Sanskrit Monthly Magazine)

Registered No. C. 3278

CANDRA VYAKARANA

I (Chapters 1—3).

with Vṛtti, corresponding rules of

a and others, Introduction etc.

SHYAM BAZAR/CALCUTTA
V.P. 314

BY

KSHITISH CHANDRA CHATTERJI, SASTRI, M. A., D. LITT.

Lecturer, Calcutta University ;

Formerly Editor, Calcutta Oriental Journal,

Surabharati, Oriental Literary Digest, etc., etc.

Price Rupees Twelve only. *Foreign Rs. 15/-*

A No Bhadriyam

Hymn 1. 89 of the Rigveda with the critically edited commentaries of (1) Veṅkaṭamādhava (2) Skandasvāmin (3) Mahīdhara (4) Sāyaṇa (5) Kāś'yapa Kṣitīsacanda unfolding the significance of each word and expression, and extracts from the commentaries of Uvaṭa, Haradatta and others, English translations, critical and explanatory notes, comparisons from other languages etc. etc. Price 2/8/-

MAHABHASHYA

(First Ahnika)

EDITED WITH

English translation, exhaustive critical and explanatory notes, extracts from other commentaries, full Sanskrit explanation of the Vedic mantras etc. etc.

Rupees Five only.

VISVANATH CHATTERJI

81, Shyambazar Street, Calcutta—4

Printed and published by Sri Jyotish Chandra Chatterjee, B. A. from 81, Shyambazar Street, Calcutta—4. Printed at the Elm Press 63, Beadon Street, Calcutta—6.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Approved by the Directors of Public Instruction, Madras, Bihar and Mysore.

श्रीशिवः शरणम्

सप्तम-वर्षे] February, 1953 [षष्ठी संख्या

मञ्जूषा

सम्पादकः—श्रीक्षितीशचन्द्र-चट्टोपाध्यायः

Special Articles in this number.

Unpublished writing of S'aṅkarācārya.

A splendid stanza on the use of a suffix as a word.

Stories in prose and verse.

The correct meaning of Pāṇini's rule iv. 1. 69.

On a variety of Sanskrit Kāvya.

A new interpretation of Kumārasambhava in 1. 1

Proverbs and Sayings.

Critical observations on the text of the Mahābhāṣya.

Next Month

GREEK PROVERBS FOR STUDENTS OF SANSKRIT

Office : 81, Shyambazar Street, Calcutta—4
Annual Subscription : Rupees Six only.
Single number—Twelve annas.
Foreign—Rupees Nine

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मञ्जूषाया नियमावली

१। मञ्जूषाया वार्षिकं मूल्यं रूपकषट्कम्। ग्राहकैर्वर्षस्य प्रथमसंख्यात एव ग्रहीतव्यम्।

२। प्रतिसौरमासं दशमदिने (आङ्‌लमासस्य चतुर्विंशे दिवसे) 81, Shyambazar Street, Calcutta 4 इत्यतो मञ्जूषा प्रकाश्यते।

३। मञ्जूषायास्तावद् भागत्रितयं वर्तते। तत्र प्रथमे भागे देवभाषां प्रविविक्षूणां कृते सरलाः श्लोकाः, आभाणकाः, कथाः, आख्यानानि च सन्निवेश्यन्ते, द्वितीये भागे दार्शनिकाः प्रबन्धाः, व्याकरणालङ्कारादीनां विमर्शाः, पाठविचारः, जिज्ञासा मीमांसा च, पुस्तकपरिचयादयश्च प्रकाश्यन्ते ; तृतीये भागे सानुवादाः पारसीकानां गाथाः, ससंस्कृतानुवादं धम्मपदम्, महाभाष्यम्, समूला भाषावृत्त्यर्थविवृतिर्मुद्र्यन्ते।

काव्यालङ्कारसूत्रवृत्तिः (वामनविरचिता ५।१)

अभिनवविग्रहविस्तृतटीकोपेता Rs. 2/-

Convocation Address in Ancient India -12-

स्त्रीप्रशंसा—The original slokas of Varāhamihira with a splendid Sanskrit commentary. 1/-

Popular Etymology— Re. 1/-

Homer's Iliad, Book I, Edited with Literal English translation, Sanskrit parallels for students of Sanskrit.

By Dr. Kshitish Chandra Chatterji.

In the Press.

শব্দকথা—সরস সরল ভাষাতত্ত্ব— ২৲

ঊষার আলো—ছোট ছোট হাসির গল্পের সমষ্টি— ৸৹

নক্ষত্রমালা—ধর্মবিষয়ক শ্লোক ও অনুবাদ— ।৹

Several complete sets of Vols. IV, V and VI of the Manjusha are still available for Rs. 6/8/- per set and only a few sets of Vols. I-III are available at Rs. 5/12/- for the lot.

श्रीविश्वनाथ-चट्टोपाध्यायः।

८१ श्यामबाजार ष्ट्रीट्, कलिकाता ४

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शरणं तरुणेन्दुशेखरः शरणं मे गिरिराजकन्यका ।
शरणं पुनरेव तावुभौ शरणं नान्यदुपैमि दैवतम् ॥

मञ्जूषा

February, 1953. | १८७४-शकीय-फाल्गुनस्य ७म-वर्षस्य षष्ठी संख्या | Vol. VII No. 6.

स्वरूपानुसन्धानम्

तपोयज्ञदानादिभिश्चित्तशुद्धौ विरक्तोऽग्रजादेः पदे शुद्धबुद्ध्या ।
परित्यज्य सर्वं यदाप्नोति सत्यं परं ब्रह्म नित्यं तदेवाहमस्मि ॥१॥
दयालुं गुरुं ब्रह्मनिष्ठं प्रशान्तं समाराध्य भक्त्या विचार्य स्वरूपम् ।
यदाप्नोति तत्त्वं निदिध्यास्य विद्वान् परं ब्रह्म नित्यं तदेवाहमस्मि ॥२॥
सदानन्दरूपं प्रकाशस्वरूपं निरस्तप्रपञ्चं परिच्छेदशून्यम् ।
अहं ब्रह्मवृत्त्यैकगम्यं तुरीयं परं ब्रह्म नित्यं तदेवाहमस्मि ॥३॥
यदज्ञानतो भाति विश्वं समस्तं विनष्टं च सद्यो यदात्मावबोधे ।
मनोवागतीतं विशुद्धं विमुक्तं परं ब्रह्म नित्यं तदेवाहमस्मि ॥४॥
निषेधे कृते नेति नेतीति वाक्यै समाधिस्थितानां यदाभाति पूर्णम् ।
अवस्थात्रयातीतमेकं तुरीयं परं ब्रह्म नित्यं तदेवाहमस्मि ॥५॥
यदानन्दलेशैः समानन्दि विश्वं सदा भाति मन्यो तदा भाति सर्वम् ।
यदालोचने ज्ञेयमन्यत्समस्तं परं ब्रह्म नित्यं तदेवाहमस्मि ॥६॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनन्तं विभुं सर्वयोनिं निरीहं शिवं सङ्गहीनं यदोङ्कारगम्यम्।
निराकारमूर्जस्वलं मृत्युमृत्युं परं ब्रह्म नित्यं तदेवाहमस्मि ॥७॥
यदानन्दसिन्धौ निमग्नः पुमान्स्यादविद्याविलासः समस्तः प्रपञ्चः।
तदा न स्फुरत्यद्भुतं यन्निमित्तं परं ब्रह्म नित्यं तदेवाहमस्मि ॥८॥
स्वरूपानुसन्धानरूपां स्तुतिं यः पठेदादराद् भक्तिभावैर्मनुष्यः।
शृणोतीह ना नित्यमुद्युक्तचित्तो भवेद्विष्णुरेवैष वेदप्रमाणात् ॥९॥*

॥ इति श्रीमच्छङ्कराचार्यविरचितं स्वरूपानुसन्धानं समाप्तम् ॥

सुभाषितानि

दृष्ट्वापि पापिनां दुःखं पापी पापं न मुञ्चति।
शूलात्तचोरप्रेक्षायां वस्त्रं हरति तस्करः॥

A sinner does not shun his sins even after seeing the miseries of sinners. The thief steals clothes even at the ceremony of the impaling of thieves.

बहुक्लेशोऽल्पफलदे कार्ये भाव्यं न सादरैः।
विदार्य गिरिशृङ्गाणि मूषकाकर्षणेन किम्॥

We should not be intent on things which involve great troubles and produce meagre fruits. What is the use of drawing out a mouse by tearing up hilltops ? (What is the good of using a steam-hammer to crack a nut ?)

[But whether it's worth while to go through so much, to learn so little, as the charity-boy said when he got to the end of the alphabet, is a matter o' taste. *Pickwick Papers*, Chapter XXVII.]

आपत्स्वेव हि मतेः शक्तिरभिव्यज्यते न सम्पत्सु।
अगुरोस्तथा न गन्धः प्रागस्ति यथाग्निपतितस्य॥

---

* राजपुरसंस्कृतपुस्तकालयस्थेन श्रीमता रघुनाथशर्मसहोदयेन कृपया प्रेरितम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

The dormant powers of the intellect are brought out in adversity, and not in prosperity. Agallochan has not at first that fragrance which it emits when it falls into the fire.

"Adversity has the effect of eliciting talents which in prosperous circumstances would have lain dormant." HORACE.

"Virtue is like precious odours, most fragrant when they are incensed and crushed, for prosperity doth best discover vice, but adversity doth best discover virtue." BACON.

आभाणकमाला

षट्कर्णो भिद्यते मन्त्रः ।

एकः परगृहं गच्छेद् द्वितीयेन तु मन्त्रयेत् ।

Germ. Was drei wissen, wissen bald dreissig.
What is known to three soon becomes known to thirty.

विज्ञातं यत् त्रयाणां तच्छीघ्रं त्रिंशतो गोचरम् ।

२। गाछे काँठाल गोँफे तेल ।

Smearing the moustache with oil while the jackfruit is still on the tree.

पादपे पनसं किन्तु श्मश्रुणि तैललेपनम् ।

गर्तवर्तिगोधामांसविभजनन्यायः ।

The partition of the flesh of an iguana while it is still in its hole.

अजातपुत्रस्य नामकरणन्यायः ।

Giving a name to a boy while he is still unborn.

["As for the matter of that", observed John, "it'll be time eneaf to think aboot naming of it when it coomes." *Nicholas Nickleby*, Chapter XLII]

Greek. Aix oupō tetoken
The kid is not yet born.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न खलु सच्छागशिशुरद्यापि भूमिष्ठः।

Don't count your chickens before they are hatched.

अण्डतो विनिर्गमनात् पूर्वं कुक्कुटशावकान् मा जीगणः। अलमण्डस्थानां कुक्कुटशावकानां परिगणनेन।

French. Il ne faut jamais vendre la peau d'ours qu'on ne l'ait mis par terre.

German. Die Bärenhaut soll man nicht verkaufen ehe der Bär gestochen ist.

One must not sell the skin till the bear is caught.

अलमृक्षग्रहणात् पूर्वमृक्षचर्मविक्रयेण।

समानार्थका आभाणकाः आगामिनि मासे प्रकाशयिष्यन्ते।

उद्भटश्लोकः

[श्रीक्षिताशचन्द्र-चट्टोपाध्यायः]

विदितमेवैतत् प्रायेण व्याकरणतन्त्रनिष्णातानां यत् सन्ति खलु सर्वासु भाषासु कतिचन शब्दाः प्रत्ययमात्रस्वरूपाः। तथाहि यत् तावद् वासशकटमन्तरेण मुहूर्तमपि गमनागमनादिकं निर्वर्तयितुं न प्रभवन्ति पौरजानपदाः, स एव bus-शब्दो भ्यस्-विभक्तेरेव रूपान्तरम्। यदा तावदापामरधनिकानां कृतेऽभिनवं शकटमुद्भावितं तदा तस्य नाम कृतम् omnibus इति, तस्य चार्थः सर्वेभ्य इति। गच्छता कालेन omnibus-शब्दस्य प्रकृतिभागो लोपमापन्नः, प्रत्ययभाग एवावाशिष्यत। एवमेव संस्कृतभाषायाम् 'इयद्'-'अधुना'-प्रभृतयः केचन शब्दाः केवलप्रत्ययरूपा इत्यातिष्ठन्ते शाब्दिकाः। तथाहि इदं परिमाणमस्या इति इदं-शब्दात् "किमिदंभ्यां वो घः" [पा० ५।२।४०] इति वतुप्, वस्य घादेशश्च। "आयनेयीनीयियः फढखछघां प्रत्ययादीनाम्" [पा० ७।१।२] इति घस्य इयादेशः। "उपदेशोऽज-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नुनासिक इत्' [पा० १।३।२] इति उकारस्येत्त्वम्, "हलन्त्यम्" [पा० १।३।३] इति पस्य इत्त्वम्। "तस्य लोपः" [पा० १।३।९] इति उकारपकारयोर्लोपः। ततश्च इदम् इय् अत् इति स्थिते "इदंकिमोरीश्की" [पा० ६।३।९०] इति इदम ईशादेशः। 'हलन्त्यम्" इति ईशः शकारस्येत्त्वम्। शित्त्वात् "अनेकाल्शित् सर्वस्य" [पा० १।१।५५] इति सर्वादेशः। ततश्च ई इयत् इति स्थिते "यस्येति च" [पा० ६।४।१४८] इति ईकारस्य लोपः। ततश्च इयत् इति प्रत्ययमात्रमवशिष्यते। अधुनाशब्देऽप्येवम्। तथा च पाणिनीयं सूत्रम्—"अधुना" [पा० ५।३।१७] इति। व्याख्यातं च तट्टीकाकृद्भिः—इदमः सप्तम्यन्तात् कालवाचिनः स्वार्थे अधुनाप्रत्ययः। "इदम इश्" [पा० ५।३।३] इति इश्। "यस्येति च" इतीकारलोपे प्रत्ययमात्रमवशिष्यते। एतत् सर्वमभिसमीक्ष्य इयच्छब्दमधिकृत्य केनापि कवयितम्—

उदितवति परस्मिन् प्रत्यये शास्त्रयोनौ
गतवति विलयञ्च प्राकृतेऽपि प्रपञ्चे।
सपदि पदमुदीतं केवलः प्रत्ययो यत्
तदियदिति मिमीते को हृदा पण्डितोऽपि ॥

इति। कैश्चित् पुनरधुनाशब्दसञ्जिघृक्षयाऽत्रत्यश्चतुर्थश्चरणः "तदियदिति मिमीते कोऽधुना पण्डितोऽपि" इत्येवमपि पठ्यते।

अस्यार्थः। शास्त्रं व्याकरणं वेदादिकञ्च योनिः कारणं यस्य, प्रत्ययादीनां व्याकरणमूलकत्वात्, सिद्धानामेव शब्दानां प्रकृतिप्रत्ययकल्पनया व्याकरणेनान्वाख्यानात्, ब्रह्मज्ञानस्यापि शास्त्राधीनत्वात्। परस्मिन् प्रत्यये परवर्तिनि प्रत्ययसंज्ञके। यद्यपि "परश्च" [पा० ३।२।२] इति सूत्रेणोत्सर्गतः प्रत्ययानां परभावित्वमेव सिद्धम्, तथाऽपि द्वैतीयीके पक्षेऽस्योपयोगः। पक्षे, परस्मिन् ब्रह्मणि, प्रत्यये तद्विषये ज्ञाने उदितवति प्रादुर्भवति सति। प्रत्ययस्य प्रादुर्भावा-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नन्तरं प्राकृतेऽपि प्रपञ्चे प्रत्ययस्य प्रकृतेरिदमः सम्बन्धी यः प्रपञ्चो विस्तारः 'इदंकिमोरीश्की' इत्याद्यनुशासनकार्यम् ईशादेशादि तस्मिन् इत्यर्थः। विलयं नाशं गतवति प्राप्तवति "यस्येति च" इति सूत्रणेति शेषः। पक्षे प्राकृते मायामये प्रपञ्चे जगदादिके विलयं गतवति, ब्रह्मज्ञानसमधिगमानन्तरं प्रपञ्चस्य ब्रह्मणि एव विलीनत्वात्। सपदि सद्य एव केवलः प्रत्ययः प्रकृतिभागविनाकृतशुद्धप्रत्ययस्वरूपम्, पक्षे केवलं ज्ञानमयमेव यत् पदं पदसंज्ञकं ब्रह्मरूपं च वस्तु उदीतं प्रादुर्भूतं तत् इयत् इत्येतत् पदम् एतावत् इति च कः पण्डितोऽपि, मूर्खस्य तु कथैव नास्तीत्यपिशब्दार्थः। हृदा मनसा मिमीते जानाति। अर्थद्वयस्यैकवृन्तावलम्बिफलद्वयन्यायेन प्रतीतेः श्लेषोऽलङ्कारः। वैयाकरणे वैदान्तिके वा वक्तरि तु शब्दशक्तिमूलो ध्वनिः प्रकृताप्रकृतोभयश्लेषे विशेष्यश्लेषानङ्गीकारात्।

कलमनाशिनी

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

सम्प्राप्ता वसन्तपञ्चमी। विद्यालये देव्याः सरस्वत्याः पूजन प्रचलति। प्रधानसंस्कृताध्यापकमहोदयेन पौरोहित्यं विधास्यत इति निर्णीतमासीत्, परं सहसा तस्यास्वस्थतया भूगोलाध्यापकेन भूदेवमहोदयेनैव पुरोहितपदमधिष्ठीयते। सोऽपि जात्या ब्राह्मण एव। किञ्च, अन्तरान्तरा 'न खल्वर्थानाम्' इति सूत्रं विकृतोच्चारणेन "न खल्यार्थानां" विधाय तेन छात्राणां पुरस्तात् स्वीयं संस्कृतभाषाभिज्ञत्वं प्रकाश्यते स्म। अकाण्डे एव पूजनायाभ्यर्थितेन भूदेवमहोदयेन स्वां प्रस्रवणलेखनीं (fountain pen) पूजापीठे संरक्ष्य* पूजनमुपक्रान्तम्।

* सरस्वतीपूजायां पुस्तकेषु पाटवार्थं पुस्तकानि लेखने च पाटवार्थं लेखनी च देवीसविधे संरक्ष्यत इत्याचारः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निर्वर्तिते च पूजाविधौ तेन दृष्टमन्तर्हिता सा महामूल्या मसीलेखनीति। ततश्छात्राः पुष्पाञ्जलिप्रदानमन्त्रं पाठिताः। मन्त्रस्तावत्—

सरस्वति महाभागे विद्ये कमललोचने।
विश्वरूपे विशालाक्षि विद्यां देहि नमोऽस्तु ते ॥

इति। भूदेवमहोदयेनात्र किञ्चिद् विपरिवर्तनं विहितम्—

सरस्वति महाभागे विद्य कलमनाशिनि।
विश्वरूपे विशालाक्षि विद्यां देहि नमोऽस्तु ते ॥

इति। छात्रैरुक्तम्, आर्य, महाभागे इत्यस्य को वार्थः? भूदेवमहोदयेनोक्तम्, पुरा किल वाहकैः स्कन्धेन समुह्य देवीप्रतिमा जलाशयेषु विसृज्यन्ते स्म, अद्यत्वे पुनर्लरीनामकधूमशकटयोगेन जलाशयं नीयते देवी सरस्वती। अत एव महाभागे इति देव्या विशेषणम्। विदितमेव भवतां हिन्दीभाषायाम् भागो हिँयासे इत्यस्य इतोऽपसर इत्यर्थ इति। आङ्लभाषायां vagabond-प्रभृतिशब्देष्वयं सन्दृश्यते। ततश्चान्तेवासिभिः पृष्टम्, आर्य, कलमनाशिनिपदं पुष्पाञ्जलिमन्त्रे पूर्वं कदापि न श्रुतम्। किं वास्य तात्पर्यमिति। भूदेवेनोक्तम्, वत्साः, पश्यतामेवायुष्मतां प्रस्रवणलेखनी मदीया देव्या विलोपिता, कलमशब्दश्च लेखन्यर्थकः। अत एव देवी कलमनाशिनीशब्देनामन्त्रिता। श्रीमद्भिर्या दक्षिणा दीयते तया कथमपि लेखन्या मूल्यं न निर्वर्त्स्यति। एवमामन्त्रणेन कदाचिद् दयार्द्रा देवी यथा मया लेखन्या मूल्यं लभ्येत तथा विदध्यादिति। तच्छ्रुत्वा सर्वैरेव छात्रैः किञ्चित् किञ्चित् प्रदायाभिनवां लेखनीं क्रीत्वा भूदेवमहोदयाय प्रदत्ता।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अहो लोभस्य माहात्म्यम्

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

व्यतीतानि विंशतिर्वर्षाणि। कश्चन षोडशवर्षदेशीयस्तरुणो रक्षिपुरुषगृहीतः। तस्य सविधे बहूनि पत्राण्यासन्। तत्र च विपुलतमस्य गुटिकापातस्य (lottery) विवरणं मुद्रितमासीत्। तत्र च प्रथमः पुरस्कारो रूपकाणां पञ्चाशत्सहस्री, द्वितीयश्च चत्वारिंशत्सहस्री, एवं बहवः पुरस्कारा वर्णिताः। तरुणोऽयं वणिजां करणालयं प्रविश्य दौवारिकहस्तेन विवरणपत्रमेकं प्रधानवणिजः सविधं प्रेषयति। स च साहेबः पुरस्कारलोभेन पञ्चाशद्रूपकसम्मितानि वा पञ्चविंशतिरूपकसम्मितानि वा पञ्चदशरूपकसम्मितानि वा शुल्कपत्राणि क्रीणाति। अथ कदाचित् प्रमादात् तेनैकस्मिन्नेव करणगृहे द्वित्राणि दिनानि गतम्। तेन च तत्रत्यस्य प्रधानपुरुषस्य मनसि संशयेन कृतं पदम्। स च रक्षिकपुरुषानानाय्य तेषां हस्ते समर्पितवांस्तरुणम्। रक्षिकपुरुषैश्च सर्वत्रान्विष्य विज्ञातम् पुरस्कारादिकं सर्वमेव गगनकुसुमकल्पमिति। ततश्चासौ प्राड्विवाकस्य सविधे समुपस्थापितः। रक्षिकपुरुषपक्षतः अभियोगाध्यक्ष-(Public Prosecutor)-महोदयेनोक्तम्, आर्य, अतिमात्रं तरुणोऽयं जाल्मः। अस्य च चारके निरोधेन महती हानिः सम्भाव्यते। अतः कश्चन सहृदयश्चेदस्य सज्जीवनयापनस्य प्रतिभूः स्यादयं मोक्तव्यः। इति। प्राड्विवाकेनोक्तम्, ममापि मनस्येतदेवासीदिति। ततश्च पितुः प्रातिभाव्येन मोचितोऽसौ शठः। अनन्तरं चाभियोगाध्यक्षमहोदयेनाकारितोऽयं बाल उक्तश्च, वत्स, समुन्नते वंशे समधिगतजन्मासि, आचरणमपि ते यथा जन्मनोऽनुरूपं स्यात् तथा प्रयतस्व। मा तावत् पुनरप्यपथे पदमर्पय, मा तावदवदातं वंशं कलङ्केनानुलिम्प। शाठ्येन प्रवञ्चनेन च दुःशकमेव जीविकार्जनम्। इति। तरुणेन तस्य वचनमाक्षिप्योक्तम्। आर्य, विरमतु भवान्। येषां सदुपदेशस्यापेक्षा वर्तते, वितीर्यतां तेभ्य उपदेशः। मया तु प्रतीतं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यावन्मनुजहृदये लोभो वर्तते तावद्वृत्तिर्नः सुनिश्चिता। एकद्वान् वारान् काराभवने गन्तव्यं चेद् गमिष्याम्येव, तावता का हानिः। सम्पत्तु मे गरीयसी स्यादिति। अभियोगाध्यक्षेणोक्तम्—वत्स,

वृत्तिच्छेदो भवेद्वापि न भवेद्वा तथापि तु।
सततं सुधिया भाव्यं धर्मप्राणेन सर्वथा।। इति।

उपदेशरत्नानि

"एक एव सुहृद्धर्मो निधनेऽप्यनुयाति यः।
शरीरेण समं सर्वमन्यन्नाशं तु गच्छति।।
"मृतं शरीरमुत्सृज्य काष्ठलोष्टसमं क्षितौ।
विमुखा बान्धवा यान्ति धर्मस्तमनुगच्छति।।"

"तृष्णां छिन्धि भज क्षमां जहि मदं पापे रतिं मा कृथाः
सत्यं ब्रूह्यनुयाहि साधुपदवीं सेवस्व विद्वज्जनम्।
मान्यान् मानय विद्विषोऽप्यनुनय प्रख्यापय स्वान् गुणान्
कीर्तिं पालय दुःखिते कुरु दयामेतत् सतां लक्षणम्।।"

"निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु
लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम्।
अद्यैव वा मरणमस्तु युगान्तरे वा
न्याय्यात् पथः प्रविचलन्ति पदं न धीराः।।"

शिव-माधव-कथा

(पूर्वानुवृत्ता)

तदैव च ददौ तस्मै सुतां क्लेशविवर्धिताम्।
निजां शिवाय सम्पत्तिमिव मूढत्वहारिताम्।।
कृतोद्वाहं तृतीयेऽह्नि प्रतिग्रहकृते च तम्।
निनाय व्याजमन्दस्य माधवस्य ततोऽन्तिकम्।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अतर्क्यतपसं वन्दे त्वामित्यवितथं वदन् ।
माधवोऽप्यपतत्तस्य शिवस्योत्थाय पादयोः ॥
ददौ च तस्मै विधिवत् कोषागारात्तदाहृतम् ।
भूरिकृत्रिममाणिक्यमयाभरणभाण्डकम् ॥
शिवोऽपि प्रतिगृह्यैतत् तस्य हस्ते पुरोधसः ।
नाहं वेद्मि त्वमेवैतद् वेत्सीत्युक्त्वा समार्पयत् ॥
अङ्गीकृतमिदं पूर्वं मया चिन्ता तवात्र का ।
इत्युक्त्वा तच्च जग्राह तत्क्षणं स पुरोहितः ॥
कृताशिषि ततो याते स्ववधूवासकं शिवे ।
नीत्वा स स्थापयामास तन्निजे कोषवेश्मनि ॥
माधवोऽपि तदन्येद्युर्मान्द्यव्याजं शनैस्त्यजन् ।
रोगोपशान्तिं वक्ति स्म महादानप्रभावतः ॥
त्वया धर्मसहायेन समुत्तीर्णोऽहमापदः ।
इति चान्तिकमायान्तं प्रशशंस पुरोहितम् ॥
एतत्प्रभावादेतन्मे शरीरमिति कीर्तयन् ।
प्रकाशमेव चक्रे स शिवेन सह मित्रताम् ॥
शिवोऽपि यातेषु दिनेष्ववादीत्तं पुरोहितम् ।
एवमेव भवद्गेहे भोक्ष्यते च कियन्मया ॥
तत् किं त्वमेव मूल्येन गृह्णास्याभरणं न तत् ।
महार्घमिति चेन्मूल्यं यथासम्भवि देहि मे ॥
तच्छ्रुत्वा तदनर्घं च मत्वा तन्निष्क्रयं ददौ ।
तथेति तस्मै सर्वस्वं शिवाय स पुरोहितः ॥
तदर्थं च स्वहस्तेन शिवं लेख्यमकारयत् ।
स्वयं चाप्यकरोद् बुद्ध्वा तद्धनं स्वधनाधिकम् ॥
अन्योन्यलिखितं हस्ते गृहीत्वा स पुरोहितः ।
पृथगासीत् पृथक् सोऽपि शिवो भेजे गृहस्थितिम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ततश्च स शिवः सोऽपि माधवः सङ्गतावुभौ ।
पुरोहितार्थान् भुञ्जानौ यथेच्छं तत्र तस्थतुः ।।

गते काले च मूल्यार्थी स पुरोधाः किलापणे ।
ततोऽलङ्करणादेकं विक्रेतुं कटकं ययौ ।।

And immediately he gave S'iva his daughter, who had been carefully brought up, and in giving her he seemed to be giving away his own prosperity lost by his folly. And on the third day after his marriage, he took him to Mādhava who was pretending to be ill, to receive his present. And Mādhava rose up and fell at his feet and said what was quite true, "I adore thee whose asceticism is incomprehensible." And in accordance with the prescribed form he bestowed on S'iva that box of ornaments made of many sham jewels, which was brought from the chaplain's treasury. S'iva, for his part, after receiving it, gave it into the hand of the chaplain, saying, I know nothing about this, but you do." And that priest immediately took it saying, "I undertook to do this long ago, why should you trouble yourself about it?" Then S'iva gave them his blessing, and went to his wife's private apartments, and the chaplain took the box and put it in his strong room. Mādhava for his part gradually desisted from feigning sickness, affecting to feel better the next day, and said that his disease had been cured by virtue of his great gift. And he praised the chaplain when he came near, saying to him, "It was by your aiding me in an act of faith that I tided over this calamity." And he openly struck up a friendship with S'iva, asserting that it was due to the might of S'iva's holiness that his life had been saved. S'iva, for his part, after some days, said to the chaplain, "How long am I to feast in your house in this style? Why do you not take from me those jewels for some fixed sum of money? If they are valuable, give me a fair price for

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

them." When the priest heard that, thinking that the jewels were of incalculable value, he consented, and gave to S'iva as purchase-money his whole living. And he made S'iva sign a receipt for the sum with his own hand, and he himself, too, signed a receipt for the jewels, thinking that that treasure far exceeded his own wealth in value. And they separated taking one another's receipt, and the chaplain lived in one place, while S'iva kept house in another. And then S'iva and Mādhava dwelt together and remained there leading a very pleasant life consuming the chaplain's wealth. And as time went on, that chaplain, being in need of cash, went to the town to sell one of the ornaments at the bazaar.

महाभाष्यपाठविमर्शः

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

नमोवरिवश्चित्रङः क्यच् [३।१।१९] इति सूत्रस्य भाष्ये दृश्यते— क्यजादिषु प्रत्ययार्थनिर्देशः । क्यजादिषु प्रत्ययार्थनिर्देशः कर्तव्यः । नमसः पूजायाम् । वरिवसः परिचर्यायाम् । चित्रङ आश्चर्ये । चीवरादर्जने परिधाने च । पुच्छादुदसने व्यसने पर्यसने चेति । तत्र कील्हर्णमहोदयस्य ग्रन्थतोऽवगम्यते—बहुषु पुस्तकेषु व्यसने इति पदं नास्तीति । (A a D g B om. व्यसने—पृ: ४४८) Lazarus-मुद्रितकाशिकायां "पुच्छादुदसने पर्यसने पर्यसने च । उत्पुच्छयते परिपुच्छयते । इति दृश्यते, परमुदाहरणद्वयसद्भावादेकं पर्यसनपदं लिपिकरप्रमादमूलं वाक्षरयोजकानवधानमूलं वेति प्रतीयते । न्यासपदमञ्जरीपर्यालोचनेन चेयमेव प्रतीतिर्दृढीभवति । तथाच न्यासे दृश्यते--उदसनमर्ध्वक्षेपणम् । पर्यसनं परित क्षेपणम् । यदोदसने प्रत्ययस्तदा तस्य द्योतनार्थ उच्छब्दः प्रयुज्यत उत्पुच्छयत इति । यदा पर्यसने

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रत्ययस्तदा परिशब्दः परिपुच्छयत इति। पदमञ्जर्यां विस्पष्टमेव प्रतीकमुपात्तं पुच्छादुदसने पर्यसने चेति। चान्द्रव्याकरणेऽनुरूपं सूत्रं नोपलभ्यते। चुरादिभ्यो णिच् [१।१।४४] इति सूत्रस्य वृत्तौ दृश्यते–णिङङ्गनिरसने इति। तत्रैव पठ्यते—हस्तं निरस्यति हस्तयते। उत्पुच्छयते। निपुच्छयते। परिपुच्छयते। निरसने इति किम्? पुच्छम् आचष्टे पुच्छयति इति। यद्यप्यत्रोदाहरणत्रितयमुपन्यस्तम्, तथाप्यतो विस्पष्टं किमपि न प्रतीयते। इन्कारितं धात्वर्थे इति कातन्त्रसूत्रस्य वृत्तौ—पुच्छमुत्क्षिपति उत्पुच्छयते गौः, पुच्छं परिक्षिपति परिपुच्छयते इत्युदसनपर्यसनयोरेवोदाहरणे प्रदर्शिते। टीकाकृता च दुर्गेणोक्तम् निरसनेऽपीत्यपि-शब्दो बहुलार्थः। तेन पुच्छादुन्क्षेपणे भवति इति। जैनेन्द्रव्याकरणेऽपि २।१।२६-सूत्रस्य लघुवृत्तौ पुच्छमुदस्यति उत्पुच्छयते परिपुच्छयते इत्युदाहरणद्वितयं सन्दृश्यते। संक्षिप्तसारवृत्तावप्येवम् [२।८१७ वृत्तिः]। शाकटायनवृत्तावेव (४।१।३३) प्रथमतो व्यसनस्योल्लेखो दृश्यते, पुच्छं पर्यस्यते परिपुच्छयते व्यस्यति विपुच्छयते इति। सरस्वतीकण्ठाभरणे पुच्छादुदसने व्यसने पर्यसने च [१।३।५३] इति त्रयमेवोपलभ्यते। हेमचन्द्रेणापि विस्पष्टमेव सूत्रितम्—पुच्छादुत्परिव्यसने [३।४।६९] इति। व्याख्यातं च बृहद्वृत्तौ पुच्छशब्दात् कर्मण उदसने पर्यसने व्यसने असने कार्ये णिङ् प्रत्ययो वा भवति। पुच्छमुदस्यति उत्पुच्छयते। पर्यस्यते परिपुच्छयते। व्यस्यति विपुच्छयते। अस्यति पुच्छयते इति। सर्वस्मादेतस्मात् प्रतीयते—पुच्छादुदसने पर्यसने च इति शुद्धः पाठो भाष्यस्येति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्याकरणविमर्शः

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

"ऊरूत्तरपदादौपम्ये" [४।१।६९] इति सूत्रादनन्तरम् अष्टाध्याय्यां "संहितशफलक्षणवामादेश्च" इति सूत्रमुपलभ्यते। महाभाष्येऽपि दृश्यते—शंहित-शफ-लक्षण-वामादेश्च। सहितसहाभ्यां चेति वक्तव्यम्। सहितोरूः सहोरूः इति। एवञ्च सूत्रे शफ-शब्दस्य पाठः प्रामाणिक इति प्रतिभाति। शफोरूशब्दस्य चार्थो भाष्ये काशिकायां न्यासे पदमञ्जर्यां वा नोपलभ्यते। प्रक्रियाकौमुदीटीकायां विट्ठलाचार्येणोक्तम्—शफशब्दः संश्लिष्टवाचीति। भट्टोजिदीक्षितेन सिद्धान्तकौमुद्यां शब्दकौस्तुभे च तदेव प्रपञ्चितम्। "संहितोरूः। सैव शफोरूः। शफौ खुरौ, ताविव संश्लिष्टत्वात्, उपचारात्।" इति। व्याख्यातञ्चेद तत्त्वबोधिन्याम्—यद्यप्यमरेण शफं क्लीबे खुरः पुमान् इति नपुंसकतोक्ता, तथापि शफशब्दस्य पुंस्त्वमपि प्रामाणिकमेव। शफाविव जर्भुराणेति श्रुतेः [ऋ० सं० २।३९।३]। शफः खुरे गवादीनां मूले विटपिनामपीति हेमचन्द्रकोषाच्च। इति। लघुशब्देन्दुशेखरे उपचारादिति पदमित्थं व्याख्यातम्—शफशब्दप्रवृत्तिनिमित्तस्योरुपदार्थ आरोपादित्यर्थः। एवञ्च समासस्योपमानोपमेयभावाबोधकत्वेन पूर्वसूत्राप्राप्तिः, तदारोपे च स निमित्तमित्यन्यदिति भावः इति। वासुदेवदीक्षितेनापि बालमनोरमायां प्रकारान्तरेणेदमेवोक्तम्—ननु शफत्वमूर्वोः प्रत्यक्षविरुद्धम् अत आह—ताविवेति। यतः शफाविव, अत ऊरू शफशब्देनोच्येते इत्यर्थः। कुतस्तत्सादृश्यमित्याह—उपचारादिति। तर्ह्युपमानवाचिपूर्वपदत्वादेव सिद्धमित्यत आह—उपचारादिति। शफवद्वास्तवं संश्लिष्टत्वमवलम्ब्य शफत्वस्यारोपादित्यर्थः। एवञ्च शफशब्दात् तत्सादृश्याप्रतीतेर्नोक्तदोष इति भावः। इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अत्र शब्दरत्नम्। शफोरूरित्यत्रापि सादृश्यमूलकः शफत्वारोपो न तु तत्प्रतीतिरिति भावः। एवञ्च करभोरुशब्देऽप्यारोपविवक्षायामूङ् न भवत्येव। एतेन करोरुभिरिति व्याख्यातम् इति। व्याख्यातञ्चैतद् भैरव्यां—यत्तु खण्डनकृदाह शफौ खुरौ ताविव संश्लिष्टत्वादुपचारादिति चिन्त्यम्। उपचारेऽपि पूर्वपदस्योपमानवाचित्वव्याघातात् पूर्वसूत्रेणैव सिद्धेरिह शफग्रहणवैयर्थ्यम्। अतः संहितवाचकः शफशब्द इति तन्नेत्याशयेनाह—शफोरूरित्यत्रेति। एवञ्च शक्यतावच्छेदकस्यारोपोऽत्र न तु सादृश्यान्तर्भावेण वृत्तिरिति न पूर्वसूत्रस्य प्राप्तिः। एवञ्च पूर्वत्रारोपस्य सिद्धौ च। करोरुभिरिति व्याख्यातमिति। विचकरे च करेण करोरुभिः इति माघस्थपद्ये इति। भावप्रकाशे च व्याख्यातम्—यत्तु शफौ खुरौ ताविवेति परममूलं चिन्त्यम्, उपचारेऽपि पूर्वपदस्योपमानवाचित्वमव्याहतमेवेति पूर्वसूत्रेणैव सिद्धेरिह शफग्रहणवैयर्थ्यापत्तेः। अतः सहितपर्यायः शफशब्द इति हरदत्तोक्तिरेव युक्तेति खण्डनकृत्, तत् खण्डयति—शफोरूरिति। आरोपः ऊरुपदार्थे इत्यादिः। न तु तत्प्रतीतेरिति। समासान्न सादृश्यप्रतीतिर्न वा पूर्वपदादुपमानत्वेन प्रतीतिरित्यर्थः। एवं च न तत्प्राप्तिरिति तद् युक्तमिति भावः। एवञ्चेति। एवमारोपेण तदप्राप्तौ चेत्यर्थः। इति।

In the Aṣṭādhyāyī of Pāṇini immediately after the rule **ऊरूत्तरपदादौपम्ये** ('in the sense of similitude a Bahuvrīhi compound with **ऊरु** as the final member forms its feminine with *ūṅ* iv. i. 69) we have the rule **संहितशफलक्षणवामादेश्च** ('also when **ऊरु** as the final member is preceded by **संहित, शफ, लक्षण** and **वाम**'). So **शफोरू** as an example of the second rule cannot mean as Monier Williams suggests "a woman whose thighs resemble the two divisions of a cow's hoof," because in that case the previous rule would apply and there would be no need for mentioning **शफ** separately in iv. I. 70. The early commentators of Pāṇini or of other

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

schools of grammar evidently think that the word is too well-known to require any explanation. Viṭṭhala, Bhaṭṭoji and others think the word means a woman whose thighs press together like hoofs. They resort to verbal jugglery to show that the sense of similitude is not of the essence of the matter here. But there is not the slightest doubt that the sense of similitude is present here and the word comes within the purview of the previous rule.

There are two courses open to us: Either शफोरू means something else or the reading has become corrupt, *s'ubha* or *s'iva* being corrupted into *s'apha*. It is difficult to accept the second alternative as the reading everywhere from the Sūtrapāṭha and Mahābhāṣya downwards is *s'apha*. As regards the first alternative *s'aphorū* may mean one whose thighs are only one-eighth of what they ought to be i. e., a woman with short and slender thighs, because *s'apha* has the sense of one-eighth also in the Vedas. Or it may mean one whose thighs are marked with the sign of hoofs. The second meaning is acceptable, because immediately after *s'apha* the author speaks of "lakṣaṇa" or mark. So शफोरू acc. to Pan. iv. 1. 70 means a woman whose thighs are marked with the sign of hoofs. As usual Sṛṣṭidhara, the commentator on the Bhāṣāvṛtti, gives the correct meaning: शफं खुरः। तच्चिह्नयुक्त ऊरुर्यस्याः।

We quote below the views of commentators: Viṭṭhala takes the bull by the horns and says *s'apha* means *saṁs'liṣṭa* or pressed together. Bhaṭṭoji follows Viṭṭhala and says *s'aphorū* means the same thing as *saṁhitorū*. Nāges'a says in his Laghus'abdenduse'khara: The sense of 'hoof' is here superimposed on the sense of thigh. Thus since the compound does not express similitude, the previous rule does not apply. That the sense of similitude is the basis of the superimposition is a different thing altogether. Vāsudeva says practically the same thing in the Bālamanoramā.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Candra has the rule : ऊरोरुपमासंहितसहितसहशफवामलक्ष्मणादेः ii. 3. 79. Bhoja borrows the rule bodily in his Sarasvatī-Kaṇṭhābharaṇa. The Vṛtti merely mentions शफोरूः without any attempt at explanation.

Jainendra : सहसहितसंहितशफलक्ष्मणवामादेः iii. i. 80.

S'ākaṭāyana reads सफ for शफ in his rule सहसफसहित-संहितलक्ष्मणवामादेश्च i. 3. 73. Yakṣavarman in his vṛtti explains सफशब्दः संश्लिष्टार्थः .

Hemacandra has the rule : उपमानसहितसंहितसहशफवामलक्ष्मणा-द्यूरोः ii. 4. 75 and the Laghunyāsa says : सह (फ)शब्दः संश्लिष्टार्थोऽ-व्युत्पन्नो दन्त्यादिरिति न्यासकृत् .

The printed Saṁkṣiptasāra reads : सहसहितसंहितसफललक्षणवाम-पूर्वाच्च [तद्धित १११] and the Vṛtti gives the example सफलोरूः !

The Mugdhabodha has वामलक्षणशफसहसहितसंहितोपमानादूरोः 279. The commentator Rāma-Tarkavāgīs'a says : सफल-सम्फलाभ्यामित्यन्ये.

The Supadma says : ऊरोरुपमानसंहितसहशफलक्ष्मणवामादेः v. 2.58. The Supadmavivaraṇapañcikā says : शफमूरौ यस्या इति वा शफं मूलमूरुर्यस्या इति वा. The Supadmakaranda is silent.

The printed Katantra-Paris'iṣṭa reads : उपमान-सहित-संहित-सह-शफ-राम-लक्ष्मणपूर्वादूरोः vi. 95.

———

ॐ

"सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत ।
अत्रा सखायः सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताऽधि वाचि ॥"

संस्कृत-शिक्षा

[श्रीआशुतोष-विश्वासः]

महानयमुत्सवोऽद्यास्माकं संस्कृतरसिकानां यदत्र पुराण-तन्त्र-भारतादिषु प्रथितमहिम्नि निरन्तरकामाख्योमानन्दवासलब्धगरिम्णि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनवद्यसौन्दर्यधाम्नि प्राग्ज्योतिषनाम्नि नगरे असमसंस्कृतसमितेः समावर्तनसभा संप्रवृत्ता। तत्र प्रेक्षावतां भवतां पुरतः स्वल्पधियापि मया असमप्रान्तीयां संस्कृतशिक्षामधिकृत्य द्वित्राणि संस्कृतवाक्यानि समुच्चार्यन्ते।

तत्र तावदयमेवास्माकं विचार्यो विषयः यत् को वास्माकं गन्तव्योऽध्वा—अपि नाम स आणविकमारकगोलकमुपतिष्ठेत (atom bomb) आहोस्वित् सन्मार्गमेव ('Good Life') इति ? नातिचिरादेवास्माभिः स्वाधीनतारत्नं लब्धम्,अतो यादृशोऽस्माभिरस्य उपयोगः क्रियेत तादृशमेवास्माकीनं भविष्यमिति निश्चितम्। किञ्च, अपि नाम विषयोपभोगेणैव कृतकृत्यमात्मानं मंस्यामहे वयमुत वा त्रिवर्गेणापि नः प्रयोजनम् ? यथाह भगवान् मनुः (२।२२४) "धर्मार्थावुच्यते श्रेयः कामार्थौ धर्म एव वा। अर्थ एवेह वा श्रेयस्त्रिवर्ग इति तु स्थितिः॥"

एवं विचार्यमाणे तु इदमेव सिद्धान्तनीयं यत् सर्वथा भारतसंस्कृति-संरक्षणायैवास्माभिः प्रयतनीयं विशेषतश्च शिक्षाविधिप्रणेतृभिरिति। संस्कृतिश्च नाम विशिष्टकालावच्छिन्ना प्रधानभावसन्ततिरेव ("the Vital System of the ideas of a period") इति केनचित् पाश्चात्त्यविदुषा निर्णीतम्। एवं च कस्यचित् देशस्य धर्मप्रणाली, दर्शनवादाः, जीवनयात्रा, सदाचाराः, विश्वासमतानि, शिल्पं चित्रं सङ्गीतं भाषा चेति सर्वं समुदितं संस्कृतिपदेन (Culture) संज्ञाप्यते। भारतीयसंस्कृतिश्च प्राधान्येन संस्कृतसंस्कृतिरेव इत्यत्र न कस्यापि वैमत्यम्। हिन्दुसंस्कृतिः मूलतः संस्कृते प्रतिष्ठिता तेनैव विधृता तस्मिंश्चोता प्रोता च इत्यपि न विवादास्पदम्। एतच्च सर्वैरेवाभिमन्यते-यत् विश्वविद्यापीठमेव (University) जातेर्धीवृत्तेः न्यासमञ्जूषा, तथा सर्वेषामेव ज्ञानिनां कर्मिणां च शिक्षाभूमिरिति। ततश्च सुविदितमेव विदुषां यत् पाश्चात्त्यदेशेषु अद्यत्वेऽपि लातिन् ग्रीक् चेति भाषाद्वयम् उदारशिक्षायाः (liberal education) कृते आवश्यकत्वे-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नाभिमन्यते, अध्याप्यते च तत्र तत् नवीनैरपि विश्वविद्यालयैः का कथा पुरातनैरिति। तथा माध्यमिकशिक्षा-प्रकरणेऽपि (Secondary Stage) प्राचीनभाषापरिशीलनं न निर्वासितं प्रतिषिद्धं वा। तत्रत्यानां मनीषिणामेतदेवाभिमतं यत् सम्यक्तया प्राचीनभाषा-परिशीलनाभावादेव जडवादमोहग्रस्ता अनुदिवसं क्षीणक्षीणा आध्यात्मिकमार्गप्रभ्रष्टा स्थितेयं पाश्च्यात्त्यजातिसंहतिः, अतस्तेनैव केवलं वीर्यवता भेषजेन मरणमोहविवशा शक्येयं परिरक्षितुमिति।

शिक्षाविज्ञानिनां स्याण्डिफोर्ड (Sandiford) प्रभृतीनां महोदयानां मतेन व्याकरणादिशास्त्रपरिशीलनेन यत् कौशलं ('mental skill') लभ्यते तेनान्या अपि विद्याः सुखेनैव समधिगम्यन्ते। अयमेव हि शिक्षाविज्ञान-निबन्धेषु शास्त्रपरिशीलनकौशलसंक्रमन्याय इति कथ्यते ("Transference of skill")।

इदानीमसमप्रान्तीया संस्कृतशिक्षापद्धतिः मनागालोच्यते। अत्रत्यानां संस्कृतविदुषामियमेवाशासीत् यत् गोहाटीविश्वविद्यालये काचित् प्राच्यविद्यापरिषत् (Faculty of Oriental Learning) प्रतिष्ठाप्येत स्नातकोत्तरश्रेणीषु संस्कृताध्ययनमपि प्रवर्त्त्येत यथान्यत्र। परन्तु सा आशा सर्वथा निष्फला जाता। मन्ये चैतत्—यदिदं विद्यापीठं नवीन-वादविमुग्धचित्तं प्रयोजनमूलकेषु (utilitarian) व्यवहारैकप्रयोगेषु (practical) वाणिज्यिकेषु च विषयेषु (commercial) व्याप्रियमाणं वर्तते। सुष्ठूक्तं श्रीमता अनाथनाथवसुमहोदयेन स्वकीये भारतीय-विश्वविद्यालयशिक्षाभिधे ग्रन्थे यत्—"आस्माकीनैः विश्वविद्यालयैर्न सम्यक्तया प्राचीनभाषाध्यापनाय संप्रवृत्तम्, तथाहि सर्वत्रैव सुस्पष्टं लक्षणानि परिदृश्यन्ते यद्वयं शिक्षाविधिप्रणयने अतिमात्रं व्यवहारैकदृशः सञ्जाता इति। "It is a fact that Indian Universities, as a whole and comparatively speaking, have paid much less attention to the Classical Culture of India than they should have done (p. 124)." "In our craze for Economics and applied

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Sciences, we may forget that Philosophy, Literature, History and Fine Arts are subjects as worth studying by cultured and educated minds as those which bring immediate economic return: already there are signs that we are becoming too much practical in the choice of our studies". ("University Education in India" by A. N. Bose.)

संस्कृताध्ययनं च यथा माध्यमिकदशायां माध्यमिकशिक्षागवेषकपरिषदा (Secondary Education Commission) विद्यालयेभ्यो न निष्कास्येत तथा सवरेव भारतीयैः प्रयतनीयम्। अन्यथा तया कदाचित् भारतीयसंस्कृतेः मूलमेव कृत्येत, इत्याशङ्कते नो हृदयम्। अस्माकं जातीयजीवनजाह्नवी अनादिकालपरम्परया सन्ततधारया संस्कृतखातमार्गेणैव प्रवहन्ती अद्यापि जीवनतटं स्पृशति सर्वेषाम्, सैव भारतीय-सभ्यता भारतसाधनेति वा व्यपदिश्यते। तस्या एव संस्कृते रसास्वादसमीहया अहमहमिकया प्रवर्त्तन्ते पाश्चात्त्यविद्वांसः वयं तु वैदेशिकवादविभ्रान्ता तामेव सुरभारतीं मृतेति व्यपदिशन्तः स्वयमपि मृता आत्महनः चङ्क्रम्यमाणा वर्तामहे इत्यहो मौढ्यमस्माकम्। अस्मदीयनवीनराष्ट्राधिकारिकैः जातेः पुनरुज्जीवनाय महत्य एव आर्थिकपरिकल्पनाः समुपस्थापिताः, परन्तु यदेव प्राथम्येनापेक्ष्यते जातेः मनःसञ्जीवनाय तदेव घृतलवणतैलतण्डुलवस्त्रेन्धनचिन्तया तैः नाभ्युपगतम्।

केचिदत्र मन्दबुद्धयः प्रत्यवतिष्ठन्ते—को नामार्थः महान्तं परिक्लेशमुररीकृत्य संस्कृताध्ययनेन, अनुवादसाहायकैनैव सर्वमवबोद्धं वयं प्रभवाम इति। ते तु न पश्यन्ति मन्दधियः यत्—पाश्चात्त्यविदुषामेव मतमन्धवृत्त्या अनुसरन्तो वयं न कदापि प्रभविष्यामः सम्यक् सतत्त्वावधारणं कर्तुं जातेर्देशस्य वेति। यदि च संस्कृतभाषा अन्ततः स्नातकश्रेणीपर्यन्तमध्याप्यत तर्हि अपि तत् कथमपि सम्भाव्येत। एतदेव सौभाग्यादस्माकं उपराष्ट्रपतिपदमलंकुर्वाणे राधाकृष्णन्-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

महोदयैरपि विश्वविद्यालयशिक्षागवेषणविवरणे (Radha Krishnan Report) एवमुपन्यस्तं यत्—"आशास्महे वयं यत् अस्मदीयाश्छात्राः स्नातकश्रेण्यां संस्कृतमध्येतुं प्रोत्साह्येरन् इति।" "We do hope that our students will be encouraged to take up Sanskrit in their degree course" (p. 131).

संस्कृतभाषाया द्रुतशिक्षासौकर्यार्थं च आधुनिकशिक्षाविज्ञान-सरणिरेवानुसर्तव्या। या च एडाम्समहोदयैः "The New Teaching" इत्यभिधे ग्रन्थे प्राचीनभाषाशिक्षणपद्धतिः (Classical teaching) प्रदर्शिता सैव बाहुल्येनानुरोद्धव्या। भारते च प्रोफेसार् बोकील् (Prof. Bokil) इत्याख्यैः विद्वत्प्रकाण्डैः Bombay Secondary Training College इत्यत्र संस्कृताध्यापकपदमलङ्कुर्वाणैः स्वोपज्ञपाठमालासु बहुषु निबन्धेष्वपि प्रदर्शितरीत्या, संस्कृतं वाग्-व्यवहाररीतिं ("Direct or conversational method") प्रायेण प्रयुञ्जानेनैव अध्यापनीयम्। यदि हि आदित एव संस्कृतवागेव समुच्चार्यते अध्ययनवेलायां, तर्हि स्वल्पेनैव कालेन बालाः सुखेनैव संस्कृतं समधिगन्तुं प्रभवेयुः। एतच्च कौशलं प्रयुज्य बोकील्-महोदयानां शिष्यैः मुम्बइमद्रास्प्रान्तेषु महत् साफल्यमासादितमित्यपि सुविदितमेव। संस्कृतव्याकरणं तु साहित्याध्यापनेन सममेव आरोहा-वरोहप्रणालिकया (Inductive-cum-deductive method) परिशीलनीय-मिति विरम्यते अत्रैव विस्तरभिया।

अधमकाव्यम्

[श्री-य-महालिङ्ग-शास्त्री]

उत्तममध्यमाधमभेदेन काव्यविभागः इदंप्रथमतया काव्यप्रकाश एव संलक्ष्यते। ध्वन्यालोके काव्यानां त्रैविध्यं केवलमुपदिश्यते। तद्यथा—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"प्रधानगुणभावाभ्यां व्यङ्ग्यस्यैवं व्यवस्थिते ।
काव्ये उभे, ततोऽन्यद्यत्तच्चित्रमभिधीयते ।।
चित्रं शब्दार्थभेदेन द्विविधं च व्यवस्थितम् ।
तत्र किञ्चिच्छब्दचित्रं वाच्यचित्रमतः परम् ।।" इति ।

वृत्तिः । व्यङ्ग्यस्यार्थस्य प्राधान्ये ध्वनिसंज्ञितः काव्यप्रकारः। गुणभावे तु गुणीभूतव्यङ्ग्यता । ततोऽन्यद् रसभावादितात्पर्यरहितं व्यङ्ग्यार्थविशेषप्रकाशनशक्तिशून्यं च काव्यं केवलवाच्यवाचकवैचित्र्यमात्राश्रयेणोपनिबद्धम् आलेख्यप्रख्यं यदाभासते तच्चित्रम् ।। न तन्मुख्यं काव्यम् । काव्यानुकारो ह्यसौ ।।

लोचनम् । रसादिजीवरहितं मुख्यप्रतिकृतिरूपं चेत्यर्थः ।।

वृत्तिः । तत्र किञ्चित् शब्दचित्रम्—यथा दुष्करयमकादि। वाच्यचित्रं ततः शब्दचित्रादन्यत्, व्यङ्ग्यार्थस्पर्शरहितं प्राधान्येन वाच्यार्थतया स्थितं रसादितात्पर्यरहितम् उत्प्रेक्षादि ।।

यद्यपि वस्तुतः "न तादृक् काव्यप्रकारोऽस्ति यत्र रसादीनामप्रतिपत्तिः", तथापि, यदा रसभावादिविवक्षाशून्यः कविः शब्दालङ्कारमर्थालङ्कारं वा उपनिबध्नाति तदा तद्विवक्षापेक्षया रसादिशून्यता अर्थस्य परिकल्प्यते ।। तदिदमुक्तम्—

"रसभावादिविषयविवक्षाविरहे सति ।
अलङ्कारनिबन्धो यः स चित्रविषयो मतः ।।
रसादिषु विवक्षा तु स्यात् तात्पर्यवती सदा ।
तदा नास्त्येव तत् काव्यं ध्वनेर्यत्तु न गोचरः ।।"

एतच्च चित्रं कवीनां विशृङ्खलगिरां रसादितात्पर्यमनपेक्ष्यैव काव्यप्रवृत्तिदर्शनात् अस्माभिः परिकल्पितम् ।।

ततश्च ध्वनिकारमतमेव विवृण्वानः काव्यप्रकाशकारः सहृदयसंमते उभे काव्ये उत्तममध्यमत्वेन प्रतिष्ठाप्य तृतीयमधमं निर्दिदेश । यथा—

"शब्दचित्रं वाच्यचित्रमव्यङ्ग्यमवरं स्मृतम् ।।" ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वृत्तिः । चित्रमिति गुणालङ्कारयुक्तम् । अव्यङ्ग्यमिति स्फुटप्रतीयमानार्थरहितम् । अवरम् अधमम् ॥

इत्थमुभयरूपस्यापि चित्रस्योदाहरणतया प्रदीयेते इमौ श्लोकौ—

"स्वच्छन्दोच्छलदच्छकच्छकुहरच्छातेतराम्बुच्छटा
मूर्च्छन्मोहमहर्षिहर्षविहितस्नानाह्निकाऽह्लाय वः ।
भिन्द्यादुद्यदुदारदर्दुरदरीदैर्घ्या दरिद्रद्रुम-
द्रोहोद्रेकमहोर्मिमेदुरमदा मन्दाकिनी मन्दताम् ॥"

इतीदं शब्दचित्रस्योदाहरणम् ॥

"विनिर्गतं मानदमात्ममन्दिराद्
भवत्युपश्रुत्य यदृच्छयाऽपि यम् ।
ससम्भ्रमेन्द्रद्रुतपातितार्गला
निमीलिताक्षीव भियामरावती ॥"

इतीदमर्थचित्रस्योदाहरणम् ।

अत्र काव्यप्रकाशव्याख्यातृषु कतिपयानां मतं संकलयामः ॥

संप्रदायप्रकाशिनी । स्वच्छन्दोच्छलदित्यत्र छकवृत्त्यनुप्रास-प्राचुर्येऽपि स्फुटप्रतीयमानार्थाभावात् अधमत्वम् ॥

विनिर्गतमित्यत्र स्थायिनो भावस्य शब्देनोपादानात् "व्यभिचारिरसस्थायिभावानां शब्दवाच्यता" इति वक्ष्यमाणमनौचित्यम् उत्प्रेक्षाकृतं चमत्कारमपकर्षति ॥

साहित्यचूडामणिः । गुणालङ्कारयोगश्चित्रत्वम् । ननु सर्वथा नास्त्येव सहृदयहृदयहारिणः काव्यस्य स प्रकारो यत्र न प्रतीयमानार्थसंस्पर्शेन सौभाग्यमिति ध्वनिवृत्तियुक्त्या पर्यन्तकक्ष्याप्रेक्षणे श्रृङ्गाराद्यन्यतमस्फुरत्तानैयत्यान्न तृतीयेऽपि काव्ये रसवासना त्रुट्यति । तत्कथमुक्तम् "अव्यङ्ग्यमवरम्" इत्याशङ्क्याह—स्फुटेति । कविसंरम्भगोचरेण प्रतीयमानार्थेन रहितं, न तु सर्वथा व्यङ्ग्यवासनाशून्यम् । तस्मादव्यङ्ग्यत्वमल्पव्यङ्ग्यत्वे पर्यवस्यति, अनुदरा कन्येतिवत् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वच्छन्देति । अत्रानुप्रासोऽलङ्कारः । तदनुगुणमोजश्च गुणः। शान्तरसस्फुरत्ता च कदाचिदपि अपरिहार्या ।।

विनिर्गतमिति । मानं द्यति, ददाति इति च मानदः । अत्रोत्प्रेक्षालङ्कारः । तदनुगुणं च माधुर्यं गुणः । शृङ्गाराभासशालिनो वीररसस्य सम्भावना, नोत्कर्षप्राप्तिः । न खलु जेतव्यया नगर्या सह प्रतिनेतुः शृङ्गारौचित्यम् ।।

अनयोश्च कविविवक्षावैधुर्यात् अधमकाव्यकक्ष्यानिक्षेपः । सहृदयप्रतिपत्त्या तु काव्यकोटौ शक्यं क्रोडीकर्तुम् । ते हि नित्यं रसास्वादलालसाः तत्सम्भावनामात्रमपि सम्भुञ्जते ।।

नागेश्वरी । स्वच्छन्दोच्छलदिति । अत्र छकारस्य, महर्षिहर्ष इत्यस्य, आह्निकाह्नाय इत्यस्य, दकारस्य, मन्द मन्द इत्यस्य च अनुप्रासः शब्दालङ्ककारः ।। यद्यपि मन्दाकिनीविषयो रत्याख्यो भावः तीर्थान्तरात् आधिक्यवर्णनात् व्यतिरेकालङ्कारश्च व्यङ्ग्यः अस्ति, तथापि अनुप्रासे कवेः तात्पर्यात् स तिरोधीयते इत्यव्यङ्ग्यमिदं काव्यम् ।।

विनिर्गतमिति । हयग्रीववधनाटके पद्यमिदम् .. .. ..

द्वारस्य नेत्रस्थानापन्नत्वात् । संप्राप्ते भये नेत्रनिमीलनं स्त्रीणां स्वभावः ।।

उत्प्रेक्षायां कवेरतात्पर्यात् सन्तोऽपि वीररसादयो व्यङ्ग्यास्तिरोधीयन्ते ।।

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रसमञ्जरी

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

अध्यापकः । वत्स महादेव, संपाठः पठ्यताम् ।

महादेवः । (पठति) अस्त्युत्तरस्यां दिशि देवतात्मा
हिमालयो नाम नगाधिराजः ।
पूर्वापरौ तोयनिधी वगाह्य
स्थितः पृथिव्या इव मानदण्डः ॥

अध्यापकः । वत्स प्रतिभानाथ, व्याचक्ष्व त्वं कालिदासस्येदं श्लोकरत्नम् ।

प्रतिभानाथः । आर्य, श्लोकस्य पूर्वार्धेनास्मद्देशीया देवताः प्रतिपाद्यन्ते । उत्तरस्यां नाम उत्तरभागे । दिशीति निपातः अस्मद्देशीयार्थकः, हिन्दीभाषायां देशीति, वङ्गभाषायां च दिशीति यदुच्यते । नाम इति । संज्ञार्थकः नामशब्दः । अत एव श्लोकार्धस्यायमर्थः—देशीया देवा अस्माक चत्वार एव । ते खलु भारतवर्षस्योत्तरभागे निवसन्ति । तेषां च नामानि आत्मा, हिमालयः, नगाः, धिराज इति । आत्मा नाम परमात्मा, परब्रह्म इति यावत् । परब्रह्मणो देवतात्वं को वार्यवंशीयो नातिष्ठते ? ततश्च हिमालय इति । हिमालयो नाम पर्वतप्रकाण्डो देवादिदेवस्य महादेवस्य निवासः । यो यत्र निवसति स हि तेन व्यपदिश्यते । तात्स्थ्यात् ताच्छब्द्यमिति हि समुद्घोषयन्ति भाषातत्त्वज्ञाः । अत एव हिमालयस्य महेश्वरार्थत्वम् उपपद्यते । ततश्च नगा इति । नञ्पूर्वाद् गाधातोः क्विपि नगा इति रूपम् । न गच्छति न गमयतीति नगाः । विष्णुरेव जगतः स्थितेः सम्पादकः, अतः स एव भगवानत्र नगाशब्देन निर्दिष्टः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ततो धिराज इति। दधाति इति धिः। यद्यपि पाणिनिना महर्षिणा उपसर्गे घोः किः इति सूत्रेण सोपसर्गादेव दधातेः किप्रत्ययो विहितः, यद्यपि च व्याख्यातृभिस्तत्र 'भावे' 'कर्तरि च कारके' इत्यनयोरनुवृत्तिः प्रदर्शिता, तथापि क्वचिदनुपसर्गात् कर्तरि च प्रत्ययोऽयं सन्दृश्यते। अत एव धिशब्दस्य धातेत्यर्थः सम्पन्नः। धाता च ब्रह्मणः सुप्रसिद्धं नाम। धाताब्जयोनिर्द्रुहिणो विरिञ्चिः कमलासन इत्यमरकोषे सन्दर्शनात्। ब्रह्मा न केवलं धाता, परं धातॄणां शिरोमणिः, अत एव कविकुलचूडामणिनासौ धिराज इति व्यपदिष्टः। एवञ्च पूर्वार्धस्य निर्गलितोऽर्थः—सन्तु नाम सत्यनारायणादयो वैदेशिक्यो देवताः, देशीया देवताश्चतस्र एव—परब्रह्म महेश्वरो विष्णुर्ब्रह्मेति च।

अध्यापकः। वत्स प्रतिभानाथ, अपूर्वं ते प्रातिभं चक्षुः। मूढैरस्माभिष्टीकाकृतोऽनुसरद्भिः कदापि परमसमीचीनोऽयमर्थो न विभावितः। वत्स, चिरं जीव, एवमेव च चिरं परिचर सुरसरस्वतीम्।

पुस्तकपरिचयः

शिवकोषः। शिवप्रकाशाख्यव्याख्यासमेतः। शिवदत्तमिश्रविरचितः। आर जी हर्षेमहोदयेन संस्कृतः। दाक्षिणात्यमहाविद्यालयगवेषणसंस्थातः प्रकाशितः। मूल्यं द्वादश रूपकाः। Deccan College Research Institute, Poona 6 इत्यतो लभ्यः।

संस्कृतभाषायां नानार्थप्रतिपादकाभिधानकोषाणां बाहुल्येऽपि वृक्षगुल्मादिशब्दानां विभिन्ना अर्था विशेषतः क्वापि नोपवर्णिता इति कर्पूरान्ववायसम्भवेन शिवदत्तमिश्रेण विपश्चिद्वर्येण विरचितोऽयं कोषः १०८२-श्लोकात्मकः सुमनोहरव्याख्यानसनाथः। ग्रन्थप्रणयनकालोऽपि ग्रन्थकृता स्वयमेवान्तिमायां कारिकायां विलिखितः—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नवग्रहतिथिप्राप्ते हायने हालभूभुजः ।
चक्र चातुर्भुजिः कोषं शिवदत्तः शिवाभिधम् ॥

इति। एतेन १५९९ शकाब्दे (A. D. 1677) विरचितोऽयं कोष इति प्रतीयते । व्याख्याता चेयं कारिका स्वोपज्ञटीकायाम्—

ग्रन्थकृदात्मानं ख्यापयति—नवग्रहेति । हायनो वर्षः । "हायनोऽस्त्री शरत् समाः" इत्यमरः । हालः शालवाहनपार्थिवः । 'हाला सुराया-मि'ति हैमः । चातुर्भुजिः । अत इज् । इति ।

एतत्तु व्यक्तमेव प्रामादिकम् । "हालः शालवाहनपार्थिवः" इत्यत्र "हाला सुरायाम्" इत्यस्य को वा प्रसङ्गः ? अत एव "हालः शालवाहन-पार्थिवे। हाला सुरायामिति हैमः" इति पठनीयम् । "अत इज्" इत्यत्र च "अत इञ्" इति पठनीयम् ।

मूलस्यान्ते दृश्यते—"इति कर्पूरीयशिवदत्तकृतः शिवकोषः ॥ समाप्तं ॥ शुभमस्तु । संपूर्ण । संम्वत् ॥१८॥७६॥ मास श्रावण कृष्ण तिथी त्रयोदशी चंद्रवासरे लिखितं मोहनराय ब्राह्मण यद्रसं-पूस्तिकं दृष्टो तद्रसं लिख्यते मया सूद्धं वा मम दोषो न दीयते ॥ राम राम" इति । हस्तलिखितपुस्तकानामन्ते प्रायेणैवंविधमशुद्धं वाक्यमुपलभ्यते । श्लोकस्य शुद्धः पाठः—

यादृशं पुस्तकं दृष्टं तादृशं लिखितं मया ।
अशुद्धं वापि शुद्धं वा मम दोषो न दीयताम् ॥ इति ।

विद्वद्वर्येण हर्षमहोदयेन महता परिश्रमेण निरतिशयेन च प्रयत्नेन पुस्तकमिदं संस्कृतम् । अतिमात्रसमीचीने च ५३-पृष्ठव्यापिन्युपोद्-घाते बहवो विषयाः परमनैपुण्येन विचारिताः । तत्र च कथं वा पशुशकुनिसरीसृपादिनामभ्यो वृक्षौषधीनां नामान्युत्पन्नानि, काश्चौ-षधयः प्रथमतः केषु देशेषु समुत्पन्नाः, वेदेषु कासामोषधीनां नामान्यु-पलभ्यन्ते, काश्चौषधयो भारते चासीरीयदेशे चोपलभ्यन्ते स्म—सर्व-मेतत् प्रपञ्चितम् । ग्रन्थान्ते च परिशिष्टत्रये टीकायां समुल्लिखितानां

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ग्रन्थानां ग्रन्थकर्तॄणां सूची, टीकागतानाम् प्राकृतौषधिनाम्नां सूची, ग्रन्थगतानां शब्दानां सूची सन्निविष्टा ग्रन्थस्योपयोगं परिवर्धयति।

"रतिर्देवादिविषया व्यभिचारी तथाञ्जितः। भावः प्रोक्तः" (पृ: २६) इति भावलक्षणं काव्यप्रकाशस्य चतुर्थाध्यायतः समुद्धृतम्। १४८ पष्ठे दृश्यते—त्रिफलाशब्दसमानार्थस्तृफलाशब्द इति द्विगोरिति सूत्रे रक्षित इति। द्विगोरिति सूत्रमष्टाध्यायीगतम् [४।१।२१]। रक्षितः मैत्रेयरक्षितस्तन्त्रप्रदीपसमाख्यस्य काशिका-न्यासयोर्व्याख्यानस्य रचयिता। तन्त्रप्रदीपस्य चतुर्थाध्यायस्य प्रारम्भोऽस्मत्सविधे वर्तते। तत्र दृश्यते—"फलतृफश्चेत्यौणादिकस्तृफलेति त्रिफलाशब्दसमानार्थं शब्दान्तरमस्ति" इति। अत्र "कलस्तृफश्च" इति शुद्धः पाठ इति प्रतिभाति। मुद्रितेष्वौणादिकसूत्रेषु "कलस्तृपश्च" इति पाठ उपलभ्यते। दीक्षितचरणैरुक्तम्—चात् तृफतेरिति। मुद्रितसिद्धान्तकौमुदीषु दृश्यते—तृपला लता। त्रिफली तु फलत्रिके इति। तत्त्वबोधिन्यां च दृश्यते—त्रिपला त्रिफला च सा इति विश्वः। त्रिफलाशब्दसमानार्थस्तृपलाशब्द इति द्विगोरिति सूत्रे रक्षितः इति। एतदपि प्रामादिकम्। शुद्धस्तु पाठः प्रौढमनोरमायामुपलभ्यते—"'त्रिफला तृफला च सा' इति विश्वः। त्रिफलाशब्दसमानार्थस्तृफलाशब्द इति द्विगोरिति सूत्रे रक्षितः" इति। मूलमस्योज्ज्वलदत्तस्य वृत्तिरिति प्रतीयते।

चतुर्थश्लोके दृश्यते—शेषे निषिद्धलिङ्गं त्वन्ताथादीनपूर्वकं भजतः इति। अत्र "त्वन्ताथादी न पूर्वकं भजतः" इति पठनीयम्। अस्य टीकायां दृश्यते—त्वन्तं अथादि च न पूर्वे भजतः। स्वार्थे कन्। इति। मूलगतं त्वन्ताथादी-पदं पुंलिङ्गमेव, नपुंसकत्वे त्वन्ताथादिनी-प्रसङ्गात्। टीकायां त्वन्तं [त्वन्तमिति पठनीयम्] अथादि इति पदद्वयं नपुंसकलिङ्गम्। किञ्च "स्वार्थे कन्" इत्युक्तिर्न समीचीना, अव्ययसर्वनाम्नामकच् प्राक् टेः इति सूत्रस्य जागरूकत्वात्।

१५०-पृष्ठे दृश्यते—"शालकाननशोभीनीति दण्डी" इति। अत्र

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'० शोभिनी'ति पठनीयम् । दण्डिनः काव्यादर्शे दृश्यते—बालेवोद्यानमालेय सालकाननशोभिनीति । तस्मिन्नेव पृष्ठे—कमलान्तरसंलीनमीनहंसां सघट्टनैरिति वर्तते । अत्र कमलान्तरसंलीनमीनहंसांसघट्टनैरिति पाठः स्यात्, प्रकरणाद्यभावात् पुनर्दृढतया वक्तुं न शक्यते ।

१५८-पृष्ठे 'अथ स्त्रुवा स्याच्छ्ल्लक्यां मूर्वाधूलिकदम्बयोः' इत्यस्य व्याख्या दृश्यते—मूर्वा मधुरसा । मूर्वति बध्नाति । मूर्वी-बन्धने । अच् दीर्घत्वं टाप् । मूर्वाङ्गीषि मूर्वीति न्यासः । इति । अत्र—"मूर्वति बध्नाति । मुर्वी बन्धने । अच् दीर्घत्वं टाप् । मूर्वा । ङीषि मूर्वीति न्यास इति पठनीयम् । मूले टीकायां च स्त्रुवा इत्यस्य स्थाने स्रुवा इति पठनीयम् ।

१५६ पृष्ठे दृश्यते—"सोमवल्ली गुडूच्यां स्यात् कट्व्यावल्गुजयोरपि । मेध्यायामपीत्यजयः ।" इति । अत्र कट्ववल्गुजयोरपीति पठनीयमिति प्रतिभाति ।

१६४ पृष्ठे दृश्यते—"सुमना मालती जाती जातिरित्यमरः" इति । अत्र जातीत्यधिकम्, अमरकोषे सुमना मालती जातिः सप्तला नवमालिकेति दर्शनात् ।

तत्रैव दृश्यते—विकसितसुमनः सुमेषु सत्सु । प्रबलमरन्दभरेण तुन्दिलेषु ।। मधुकर करमर्दकद्रुमाणां । किमिति सुधाकुसुमेषु च भ्रमीष्वित्ति गोस्वामिगोपेश्वराणां इति । अत्र—

"विकसितसुमनःसुमेषु सत्सु प्रबलमरन्दभरेण तुन्दिलेषु ।
मधुकर करमर्दकद्रुमाणां किमिति मुधा कुसुमेषु बम्भ्रमीषि ।।
इति गोस्वामिगोपेश्वराणामिति' इति पठनीयमिति प्रतिभाति ।

१५३ पृष्ठे दृश्यते—मुसलीति ।ः दन्त्यमध्यः । मुस खण्डने । मूर्धन्यमध्योऽप्ययमिति वर्णादेशनां मुस खण्डने इति धातोर्दन्त्यान्त्येषु च वोपदेवात्रेयादिभिः पठितत्वात् । उज्ज्वलदत्तादयस्तु तालव्यमध्यमप्याहुः । अत एव मुसलो मुशलोऽपि च इति द्विरूपेषु विश्व इति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एतस्मात् कोऽप्यर्थो न प्रतीयते। ग्रन्थकृता प्रथमतो दन्त्यमध्य इति स्वमतं प्रकटितम्। ततश्च मूर्धन्यमध्योऽयमिति वर्णदेशनामतमुल्लिखितम्। तदेव च मतं वोपदेवात्रेयादीनामपीति दर्शितम्। अन्ततश्च उज्ज्वलदत्तादीनां मतेनास्य तालव्यमध्यत्वमपीति वर्णितम्। एवञ्च मुस खण्डने इति धातोर्दन्त्यान्त्येषु च वोपदेवात्रेयादिभिः पठितत्वात् इति कथमपि न सङ्गच्छते। अत्र मूर्धन्यान्त्येष्विति पठनीयमिति प्रतिभाति। अत एव—दन्त्यमध्यः। मुस खण्डने। [तस्मात् ...।] मूर्धन्यमध्योऽप्ययमिति वर्णदेशना मुस खण्डने इति धातोर्मूर्धन्यान्त्येषु च वोपदेवात्रेयादिभिः पठितत्वात्। उज्ज्वलदत्तादयस्तु तालव्यमध्यमप्याहुः। अत एव मुषलो मुसलोऽपि च इति द्विरूपेषु विश्वः (?)। इति पठनीयम्। पुरुषोत्तमदेवस्य द्विरूपकोषे मुषलो मुसलः प्रोक्त इति पाठ उपलभ्यते।

Skt. *jñātah*, Gk. *gno:tos*, Lat. [*g*]*notus*. *Agnostic* (from *agnostikos*—*a* not and *gnostikos* capable of being known) one who professes ignorance of the existence and nature of God, an unseen world etc. The Lat. root is found in *cognition*, *recognition*, *nescience* etc. In *cognomen* family name, surname (from *co* with, together and *nomen* name), the *g* is due to confusion with *gnomo* a mark, from *gno* I know. Gk. *an thele:is anagno:stikos einai, anagigno:ske*, if you wish to be a good reader, read.

Autograph a person's own handwriting, from Gk. *autos* self and *graphein* to write. *Automaton* (*autos* self, *maton* Skt. *matam* from *man* to think, that which thinks for itself) hence a mechanical device which moves and acts of itself. Some derive it form *mā* to strive, to work.

Me:den agan.

Nothing in excess.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Lat. *Ne quid nimis.*

German. *Allzuviel ist ungesund.*

French. *Rien de trop.*

Metron ariston.

"Too much of anything is good for nothing."

Moderation is best.

"Too much of aught is good for naught."

Gk. *me:* is in Skt. the prohibitive particle *mā*. It is not only used with verbs, but takes the place of *ou* in compounds like *oudeis* m. no one, *ouden* n. nothing, *oupote* never etc. *me:den* is from *me:de* (not) and *hen* (one). *agan*—too much. This is also found in the form *Me:den agan speudein*—Do not seek eagerly for anything. *speudein*—pres. infin. act. of *speudo:* I seek eagerly, I strive after.

Latin. *ne*—not. *quid*—neut. s. nom. of *quis* something, Skt. *cit.* *nimis*—(lit. not too little, from the root which appears in Skt. as *minoti, mīnāti* to diminish, then by Litotes) too much, overmuch.

At the entrance to Plato's Academy there was the inscription *ageo:metre:tos me:deis eisito* let no one who is not a geometrician enter. *me:deis* no one, nobody. *ageo:metre:tos*—*a* not, *ge:*—earth, *metrein* to measure, suffix *-tos*, who is ignorant of geometry. *eisito*—*eis* in (from *ens* with *s* after the analogy of *ex*) and *ito* pres. imperative 3rd sing. of *eimi*, I go. Cf. *Ho theos geo:metr:es*—God is a geometrician.

अतिदर्पे हता लङ्का अतिमाने च कौरवाः ।

अतिदाने बलिर्बद्धः सर्वमत्यन्तगर्हितम् ॥ चाणक्यश्लोकः

'Laṅkā perished because of too much pride, the sons of the Kuru-king perished because of too much arrogance, Bali was bound because of too much liberality ; all excess is harmful in the long run.'

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"अतिरूपाद्धृता सीतातिगर्वाद्रावणो हतः ।
अतिदानाद् बलिर्बद्धश्चाति सर्वत्र वर्जयेत् ॥"

'Sītā was abducted because of too great beauty, Rāvaṇa met his doom because of too great self-conceit, Bali was bound because of too great liberality; excess should be avoided in all matters.'

सीते पर्याप्तमेतावद् भर्तुः स्नेहः प्रदर्शितः ।
सर्वत्रातिकृतं भद्रे व्यसनायोपकल्पते ॥ रामायण ४।२४।२१

'Sita, up till now you have fully shown your love for your husband. Let this be enough. Too much of anything, O gentle lady, invariably leads to disaster.'

सर्वमतिमात्रं दोषाय । उत्तररामचरितम् ।

'Everything in excess is harmful.'

Xenio:n de te thumos aristos.

It is the spirit that is the best part of hospitality.
Welcome is the best cheer.

xenio:n—gen. pl. of *xenia* hospitality, *xenos* (cognate with Lat. *hostis*) stranger, guest. *Xenelasia* expulsion of foreigners (*elaunein* to drive, drive out. Cf. Eng. *alacrity*. *thumo-s*—(Skt. *dhūmah*) spirit, soul. It is interesting to note in this connexion that the Sanskrit word for soul is *ātman* which must have meant originally wind. Cf. *atmosphere*. The Latin for soul is *anima* (*Cf. magnanimous* high-souled) which also must have originally meant the same thing. Cf. Skt. *anila*. *aristos*—best. See p. 31.

तृणानि भूमिरुदकं वाक् चतुर्थी च सूनृता ।
एतान्यपि सतां गेहे नोच्छिद्यन्ते कदाचन ॥ पञ्चतन्त्रम् ।

'(Seats made of) grass, ground (on which the seats are to be spread), water (for washing the feet) and fourthly sweet and truthful words (of welcome)—these are never wanting in the house of the good.'

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Hai Ibikou geranoi.

The cranes of Ibicus.

Hai is the nom. pl. of *hā*, the fem. of *ho.* Skt. *tāh. Ibikou*—gen. sing. of *Ibikos. geranoi*—nom. pl. of *geranos* f. crane. The name of the flower geranium is derived from *geranian* the acc. sing. of the word. *Garrulous* is also cognate.

Ibicus was a Greek lyric poet (circa B. C. 540). "It is related that, travelling through a desert place near Corinth, he was murdered by robbers, but before he died he called upon a flock of cranes that happened to fly over him to avenge his death. Soon afterwards, when the people of Corinth were assembled in the theatre, the cranes appeared; and one of the murderers, who happened to be present, cried out involuntarily, "Behold the avengers of Ibicus!" and thus were the authors of the crime detected." SMITH.

Bengali. धर्म्मेर कल वातासे नड़े ।

'The machinery of justice is set in motion by (even such an unsubstantial thing as)air.'

Me:de balete tous margaritas humo:n emprosthen to:n khoiro:n.

Lat. *Neque mittatis margaritas vestras ante porcos.*

Do not cast your pearls before swine.

me:de—me: (Skt. *mā*) not,) and *de* and. *bale:te*—aor. subjunctive 2. pl. of *ballo:* throw. *tous*—acc. pl. of *ho. margaritas*—acc. pl. of *margarite:s* pearl, probably borrowed from Skt. *mañjaraḥ, mañjariḥ*, a bouquet of flowers, pearls. The Eng. Christian name Margaret (Meg, Mag, Maggie) means pearl. Cf. the Bengali name Mukta. *Margarite:s* is one of the few masculine nouns of the Gk. first declension. *humo:n*—gen. pl. of *su* you. *emprosthen*—'in front of' is used with the gen. *prosthen*—*pros* with the adverbial suffix

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

-*then* denoting the place where—means before. *en* 'in' and *prosthen*=*emprosthen* before, in front of. Similarly *epi* 'on' and *prosthen*=*epiprosthen* before. *khoiro:n*—gen. pl. of *khoiros* young pig, swine (prob. from **ghoryo* grey). In Lat. *neque*—Skt. *naca*, *mā ca*. *mittatis*—subj. 2 pl. of *mitto* send, cast. With *ne* the subj. is commonly used instead of the imperat. *margaritas*—acc. pl. of *margarite:* f. *vestras*—acc. pl. of *vestra*, the fem. form of the possessive pronoun of the second person *voster*. *ante*—(Skt. *anti*) prep. governing the acc. *porcos*—acc. pl. of *porcus* pig, hog.

"किं मृष्टमन्नं खरसूकराणाम् ।"

'What is the use of savoury dishes to asses and pigs ?'

Bengali : वानरेर गलाय मुक्तार माला ।

'A pearl necklace on the neck of a monkey,'

"आघ्रातं परिलीढमुग्रनखरैः क्षुण्णं च यच्चर्वितं
क्षिप्तं यद् भुवि नीरसत्वकुपितेनेति व्यथां मा कृथाः ।
हे माणिक्य तवैतदेव कुशलं यद्वानरेणाग्रहा-
दन्तः सत्त्वनिरूपणाय सहसा चूर्णीकृतं नाश्मना ।।"

Bengali : उलुवने मुक्ता छड़ान ।

'Sowing pearls on grounds overgrown with ulu-grass.'

Marathi. कावल्याच्या गल्यांत माणीक ।

"A ruby on the neck of a crow."

Rose-water for a pig. Boiled rice for asses. A vineyard for crows. On a wrinkled neck a pearl weeps. Myrrh oil on lentils. Don't play the lute before a donkey. To put a ring of gold in a swine's snout.

To:n pithe:ko:n eumorphotatos dusmorphos estin.

Lat. *Simiarum pulcherrima deformis est.*

The most beautiful of apes is ugly. The fairest of apes is foul.

pithe:ko:n—gen. pl. of *pithe:kos* monkey, from **pithos* (Lat. *foedus* foul, filthy, horrible, abominable) with the

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

suffix *-aqo*. The animal is so named from its ugliness. *eumorphotatos*—superl. of *eumorphos* 'fair of form', a Bahuvrīhi compd. of *eu* and *morphe:* shape, form. In compounds feminine *ā*-stems (*e:*-stems) generally become *o*-stems in masculine and neuter forms; e. g., *philo-timos* honour-loving (from *time:* honour). Most adjectives add *-tatos* to the stem to form the superlative. *dusmorphos*—ugly, deformed, a Bah. compd. of *dus*, Skt. *dus*, and *morphe:*. Eng. *amorphous* 'uncrystallised' is from Gk. *amorphos* shapeless (*a* without and *morphe:* form). *estin*—*esti*, Skt. *asti*, Lat. *est*, Germ. *ist*, Eng. *is*. The *n* has been added for the sake of euphony.

In Lat., *simiarum*—gen. pl. of *simia* f. *pulcherrima*—superl. of *pulcher* beautiful. In the case of adjectives of which the nom. s. ends in *er* the superl. is formed in Lat. by doubling the *r* and adding *imus* m., *ima* f., and *imum* n. *deformis*—a Bah. compd. of *de* and *forma*. Some Latin compounds with *a*- and *o*- stems as the last member change the *a* or *o* into *i*.

Hoplon toi logos andri tomo:teron esti side:rou.
Man's tongue is a sharper weapon than the sword.
Words cut more than swords.
The tongue is not steel, yet it cuts.
रोहते सायकैस्तीक्ष्णैर्वनं परशुना हतम् ।
वाचा दुरुक्तं बीभत्सं न संरोहति वाक्क्षतम् ।।महाभा०

hoplon—nom. s. n. tool, weapon, piece of armour. The root is found in Skt. as *sac* to accompany and in Lat. as *sequor* from which are derived Eng. *sequel*, *sequence*, etc. The suffix is *-lo*, Skt. *-la*. Adjs. and nouns of all genders are formed with this suffix. Indo-Europen **sop-lo-m*. Initial *s* before vowels is changed into *h* in Gk. and final *m* into *n*. *toi*—ethical dat. of *su* you; let me tell you. कथयामि ते, प्रतिजानेऽहं ते । *logos*—word, speech, from *lego:* I say, speak. *andri*—dat. s of *ane:r* (Skt. *nṛ*) man. *tomo:tero-n*—comparat. of *tomon* cutting, sharp, from *temno:* I cut. *side:rou*—gen. s.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

of *side:ro-n* iron, anything made of iron—sword or knife. In Greek adjectives and adverbs of the comparative degree are used with the gen., in Skt. and Lat. with the ablative.

Sun Athe:ne:i kai kheira kinei.

Call Minerva to aid, but bestir thyself.

अधिगतदेवीप्रसादोऽपि स्वौ बाहू परिचालय ।

sun—prep. governing the dat. It means 'with' 'in company with', 'with the aid or blessing of' (cf. Skt. *sam*). Skt. *samam* is used with the instr. and Lat. *cum* with the abl. in the same sense. *Athe:ne:i*—dat. s. of *Athe:ne:*. *kai*—and. *kheira*—acc. s. of *kheir* hand. *kinei*—pres. imperat. 2. s. act. *kineo:*. The root is found in Skt. *ceṣṭā* and Eng. *cinema* which is an abbreviation of 'cinematograph'.

Sun is the first member of 'sympathy'. Recently the word 'empathy' has been coined with *en* as the first member. Thus Somerset Maugham detects in the works of James an absence of "the quality of *empathy* which enables a novelist *to feel himself into* his characters, think their thoughts and suffer their emotions."

Ne:pios egno:.

(Any) fool knows (that).

मूढोऽप्येतद् विजानाति ।

egno:—root aor. 3. s. of *gignosko:* know.

Ouk esti thne:to:n hostis est' eleuthero:s ;
e: khre:mato:n gar doulos estin e: tukhe:s.

There is no one among mortals who is free. He is a slave to riches or to fortune.

hos-tis (Skt. *yas'cit*)—any one who. *eleutheros*—free. The initial *e* is prothetic. Lat. *liber*. Skt. *rudh* is cognate. *doulos*—slave. *e :... e :*—either...or. *tukhe:s*—gen. s. of *tukhe:* fortune, providence, fate.

नैव खल्विह मर्त्येषु स्वतन्त्रः कोऽपि वर्तते ।
मनुजो दास एवात्र नियतेर्वा धनस्य वा ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

He: axine: pros te:n hrizan to:n dendro:n keitai.

Lat. *Securis ad radicem arborum posita est.*

The axe is laid unto the root of the trees.

महीरुहस्य मूलेषु कुठारस्तावदर्पितः ।

axine: f.—axe, Lat. *ascia* for **acsia* by metathesis. *pros* —Homeric also *proti*, Skt. *prati*. With acc. it means 'to' 'towards'. *to:n dendro:n*—gen. pl. of *to dendron* the tree. *keitai*—pres. 3. s. pass: of *keimai* to be laid (used as pass. to *tithe:mi*). In Skt. the pres. and imperf. form their passive stems by adding *ya* to the root, in Gk. the pres. pass. and imperf. pass. are identical with the pres. middle and imperf. middle. In Skt. the fut. pass. and the aor. pass. are generally identical with the fut. middle and the aor. middle. But in Gk. *the:* is added to the stem in these tenses.

Lat. *securis*—axe, from *seco* (cf. Eng. *saw*) to cut; "*securi Tenedia* (Gk. *Tenediai pelekei*) with the extremest severity (from King Tenes of Tenedos, who executed every person who accused an innocent man)." *radicem*—acc. s. of *radix* root. *arborum*—gen. pl. of *arbor* tree. *posita*—nom. s. f. of *positus*, past participle of *ponere* to place.

Ennea tas Mousas phasin tines; ho:s oligo:ro:s.
e:nide kai Sappho: Lesbothen he: dekate:.

Some assert that the Muses are nine in number. How careless! Look at Sappho from Lesbos, the tenth.

ennea—nine (probably **enwa*+**newa*), Skt. *nava*. *tas Mousas*—acc. pl. of *he: Mousa*. *phasin*—pres. 3. pl. of *phe:mi*, Doric *phami*, 'speak', with movable *n*. Lat. *fari*, Skt. *bhaṇati*. I. E. **bhā* speak, Skt. *bhā* shine, *bhāṣ* speak. *tines*—nom. pl. m. of the indef. pron. *tis* some. *ho:s*—how. Lat. *so:-c*, Eng. *so*, Vedic *yād*. *oligo:ro:s*—adv. carelessly, from *oligo:ros* adj. little caring, lightly esteeming, from *oligos* little and *o:ra* care. *e:nide* (*e:n ide*) interj. see there! *Lesbothen*—from *Lesbos* with suffix *-then*. *dekate:* (Skt. *das'amī*)—nom. s. fem. of *dekatos*, from *deka*, Skt. *das'a*, Lat. *decem*, with the suffix *-tos*.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

A similar stanza is found in Sanskrit:

नीलोत्पपलदलश्यामां विज्जिकां मामजानता ।
वृथैव दण्डिना प्रोक्तं सर्वशुक्ला सरस्वती ॥

"Not knowing me Vijjika, dark like the petals of a blue lotus, in vain has Daṇḍin said [in his Kāvyādars'a]—Sarasvatī is all white*."

Ego: eimi pan to gegonos kai on kai esomenon kai ton emon peplon oudeis po: thne:tos apekalupsen.

I am all that has been and is and shall be and my veil no mortal has ever uncovered.

अहमस्मि च यज्जातं यद् यच्च जायते सदा ।
यच्च जनिष्यते पश्चाद् याथार्थ्यं वेद को मम ॥
"अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता स पिता स पुत्रः ।
विश्वे देवा अदितिः पञ्च जना अदितिर्जातमदितिर्जनित्वम् ॥"

ऋ० सं० १।८९।१०

ego:—I. *eimi*—(root *es* ending *mi*, with dropping of *s* and compensatory lengthening)—Skt. *asmi*, Av. *ahmi*, Lat. *sum*. *pan*—all. *to*—Skt. *tad*, Lat. is-*tud*. *gegonos* (Skt. *jajñānam*)—nom. s. neut. of the perfect participle of *gignomai* to be born, to be. *kai*—and. *on*—(Skt. *sat*)—nom. s. neut. of the present participle of *eimi* to be. *esomenon* (Skt. **asiṣyamāṇam*) —nom. s. neut. of the fut. part.mid.of *eimi*, the future stem being *eso* and the participial suffix *-meno*. *ton*—acc. s. masc. of *ho*. Nouns with possessive pronouns often take the article in Gk. *emon*—acc. s. masc. of the possessive pronoun *emos* my. *peplon*—veil, Lat. *palla* (**palna*) a long and wide outer garment worn by Roman women. Skt. *paṭala-m* garment, covering, veil. *oudeis*—no (adj.). *po:*—up to this time, yet. Skt. *kvāpi*, *kadāpi*, *kadācidapi*. *thne:tos*—mortal, nom. s. masc. of the past part. of *thne:isko:* to die. *apekalupse(n)*—s-aor. 3. s. of *apo-kalupto:* (*apo* negative, reversing an action, *kalupto:* cover) uncover. Cf. *Iliad* i. 70 : *hos e:ide ta t'eonta ta t'essomena pro t'eonta*—he had knowledge of all things that were, were to be and that had been.

श्रीसदाशिवसमर्पणमस्तु

---

* चतुर्मुखमुखाम्भोजवनहंसवधूर्मम ।
मानसे रमतां नित्यं सर्वशुक्ला सरस्वती ॥ काव्यादर्श १।१

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

TECHNICAL TERMS AND TECHNIQUE OF

Sanskrit Grammar

A Critical, Comparative and Historical Study

BY

Kshitish Chandra Chatterji, Sastri, M.A., D. Litt

Lecturer, Calcutta University ;
Formerly Editor, Calcutta Oriental Journal,
Surabharati Oriental Literary Digest, etc., etc.

The Modern Review (December, 1950) **says :**

"Honour to whom honour is due. Dr. Chatterji has broken entirely new ground in his **Technical Terms and Technique of Sanskrit Grammar** and demonstrated clearly that Bengal, though fallen on evil days, can even now produce works on Indology that invite and bear comparison with the best work produced in any part of the world. Who ever thought that all the technical terms admitted of satisfactory explanation and who ever imagined that a work on grammatical terminology could be made as delightful as a novel ? In this volume of nearly 350 pages the technical terms of Sanskrit grammar from the Brahmanas, Nirukta, Pratishakhyas, Panini, Katyayana, Patanjali, down to Prayogaratnamala and Harinamamrita have been considered critically and historically in all their bearings and apparently arbitrary technical terms like *gha*, *bha*, *lat*, *lit*, etc., have been traced to their sources. **We have nothing but admiration for this masterpiece of scholarship and warmly recommend it to our readers.**"

Price Rupees Ten only. *Foreign Rs. 12/-*
Postage Extra.

VISVANATH CHATTERJI

81, Shyambazar Street,

CALCUTTA—4

Phone : B. B. 4049

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

MANJUSHA (Sanskrit Monthly Magazine)
Registered No. C. 3278

CANDRA VYAKARANA

Part I (Chapters 1—3).

Critically edited with Vṛtti, corresponding rules of Pāṇini, Bhoja and others, Introduction etc.

By

KSHITISH CHANDRA CHATTERJI, SASTRI, M. A., D. LITT.

Lecturer, Calcutta University ;
Formerly Editor, Calcutta Oriental Journal, Surabharati, Oriental Literary Digest, etc., etc.

Price Rupees Twelve only. *Foreign Rs. 15/-*

A No Bhadriyam

Hymn 1. 89 of the Rigveda with the critically edited commentaries of (1) Veṅkaṭamādhava (2) Skandasvāmin (3) Mahīdhara (4) Sāyaṇa (5) Kās'yapa Kṣitīsacandra unfolding the significance of each word and expression, and extracts from the commentaries of Uvaṭa, Haradatta and others, English translations, critical and explanatory notes, comparisons from other languages etc. etc. Price 2/8/-

MAHABHASHYA

(First Ahnika)

EDITED WITH

English translation, exhaustive critical and explanatory notes, extracts from other commentaries, full Sanskrit explanation of the Vedic mantras etc. etc.

Rupees Five only.

VISVANATH CHATTERJI

81, Shyambazar Street, Calcutta—4

Printed and published by Sri Jyotish Chandra Chatterjee, B. A. from 81, Shyambazar Street, Calcutta—4. Printed at the Elm Press 63, Beadon Street, Calcutta—6.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Approved by the Directors of Public Instruction, Madras, Bihar and Mysore.

श्रीशिवः शरणम्

सप्तम-वर्षे] April-May, 1953 [८-९ संख्ये

मञ्जूषा

सम्पादकः—श्रीक्षितीशचन्द्र-चट्टोपाध्यायः

Next Month.

The Subhāṣitas of Kālidāsa with translation, notes, parallel passages.

Pāṇini-dars'ana of Mādhavācārya with commentary.

A b.on to students of languages is **Greek Proverbs** in Roman character with their Latin and English analogues and parallel proverbs and sayings from Sanskrit, Marathi and Bengali. All the grammatical forms have been clearly explained and the student of Sanskrit will not only acquire some knowledge of the glorious Greek language but will be struck with the resemblance it bears to Sanskrit. Some of the forms have been explained over and over again for the benefit of beginners.

Price Rupees Two only.

Office : 81, Shyambazar Street, Calcutta—4

Annual Subscription : Rupees Six only.

This number—Rupees Two.

Foreign—Rupees Nine

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मञ्जूषाया नियमावली

मञ्जूषाया वार्षिकं मूल्यं रूपकषट्कम् । ग्राहकैर्वर्षस्य प्रथमसंख्यात एव ग्रहीतव्यम् ।

२ । प्रतिसौरमासं दशमदिने (आङ्लमासस्य चतुर्विंशे दिवसे) 81, Shyambazar Street, Calcutta 4 इत्यतो मञ्जूषा प्रकाश्यते ।

३ । मञ्जूषायास्तावद् भागत्रितयं वर्तते । तत्र प्रथमे भागे देवभाषां प्रविविक्षूणां कृते सरलाः श्लोकाः, आभाणकाः, कथाः, आख्यानानि च सन्निवेश्यन्ते, द्वितीये भागे दार्शनिकाः प्रबन्धाः, व्याकरणालङ्कारादीनां विमर्शाः, पाठविचारः, जिज्ञासा मीमांसा च, पुस्तकपरिचयादयश्च प्रकाश्यन्ते ; तृतीये भागे सानुवादाः पारसीकानां गाथाः, ससंस्कृतानुवादं धम्मपदम्, महाभाष्यम्, समूला भाषावृत्त्यर्थविवृतिर्मुद्र्यन्ते ।

काव्यालङ्कारसूत्रवृत्तिः (वामनविरचिता ५।१)

अभिनवविग्रहविस्तृतटीकोपेता Rs. 2/-

Convocation Address in Ancient India -12-

स्त्रीप्रशंसा—The original slokas of Varāhamihira with a splendid Sanskrit commentary. 1/-

Popular Etymology— Re. 1/-

Homer's Iliad, Book I, Edited with Literal English translation, Sanskrit parallels for students of Sanskrit.

By Dr. Kshitish Chandra Chatterji.

In the Press.

শব্দকথা—সরস সরল ভাষাতত্ত্ব— ২৲

ঊষার আলো—ছোট ছোট হাসির গল্পের সমষ্টি— ৸৹

নক্ষত্রমালা—ধর্মবিষয়ক শ্লোক ও অনুবাদ— ।/৹

Several complete sets of Vols. IV, V and VI of the Manjusha are still available for Rs. 6/8/- per set and only a few sets of Vols. I-III are available at Rs. 5/12/- for the lot.

श्रीविश्वनाथ-चट्टोपाध्यायः ।

८१ श्यामबाजार ष्ट्रीट, कलिकाता ४

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शरणं तरुणेन्दुशेखरः शरणं मे गिरिराजकन्यका ।
शरणं पुनरेव तावुभौ शरणं नान्यदुपैमि दैवतम् ॥

मञ्जूषा

April, 1953 — १८७४-शकीय-चैत्रस्य ७म-वर्षस्याष्टमी संख्या — Vol. VII Nos. 8-9

श्रीमच्छङ्कराचार्यविरचितः

वेदान्तसमासः

श्रीगणेशाय नमः ॥

स्मर कृष्णं भज हरिं नम विष्णुं श्रयाच्युतम् ।
त्यज कामं जहि क्रोधं जहि मोहं भवालयम् ॥१॥

शृणु शौरिकथाः पुण्याः पश्य श्रीपतिविग्रहम् ।
जिघ्र श्रीपादतुलसीं स्पृश वैकुण्ठवल्लभम् ॥२॥

भुङ्क्ष्व केशवनैवेद्यं तिष्ठ माधवमन्दिरे ।
जप नारायणमनुं पठ तन्नाममङ्गलम् ॥३॥

पाहि प्रपन्नजनतां ब्रूहि सत्यं हितं नृणाम् ।
देहि काङ्क्षितमार्तेभ्यो याहि सज्जनसङ्गतिम् ॥४॥

कुरु भूतदयां नित्यं चर धर्ममहर्निशम् ।
जानीहि नित्यमात्मानमवेह्यन्यद्धि नश्वरम् ॥५॥

पञ्चश्लोकीमिमां शश्वत्पठ धारय चिन्तय ।
एतावान् सर्ववेदान्तः समासेन निरूपितः ॥६॥

॥ इति श्रीशङ्कराचार्यविरचितो वेदान्तसमासः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चण्डीपाठः ।

[श्रीअनन्तकुमार-शास्त्री ज्योतिषाचार्यः]

कस्मिंश्चिदधिष्ठाने कालिदासनामा ब्राह्मणः प्रतिवसति स्म। लक्ष्मीकटाक्षवीक्षितं तदालयं सपत्नीभयेनेव सरस्वत्या परिवर्जितम्। परं मूर्खोऽपि स स्वधर्मनिरतो देवीभक्त एवासीत्। कदाचित् आचार्येणानुप्राणितश्चण्डीपाठ मनो निवेशयामास। न खलु चण्डीमन्तरा जगति किमपि सारभूतमस्ति। "सारात् सारतरा चण्डी ब्रह्मरूपा सनातनी" "यदस्ति चण्ड्यां तत् सत्यं यन्नास्ति तत्र तन्मृषा" इति स्थिरधीश्चण्डीपाठमारभते स्म। प्रतिदिनं नियमेन चण्डीपाठपूर्वकं गार्हस्थ्ये प्रवर्तते। अथ कदाचित् पाठसमये "स्त्रियः समस्ताः सकला जगत्सु" इति पठित्वैवाचिन्तयत्, अहो मया एतावन्तं कालं चण्डीमाहात्म्यमजानता किं न्वकार्यं कृतम्? पित्रादिपरिजनप्रतिपालनेन मूर्खेण मया वृथा वसुक्षयः कृतः। इति विचिन्त्यैव उत्थाय उच्चैरुवाच—मा, वाप, पिशि, पिसा[1]! यूयं तूर्णं मे गृहान्निर्गत्य यथेष्टं गच्छत, मम गेहे चण्डीबहिर्भूतानां युष्माकं कथमपि स्थानं नास्ति। नाहं वृथा वसुक्षयं करोमीति। केवलं "स्त्रियः समस्ताः सकला जगत्सु" इति मुहुरुच्चैरुद्घोष्य निर्गच्छत निर्गच्छत इत्युक्त्वासौ सर्वान् बहिश्चकार। ते च परं निर्वेदमापन्नाः क्व गच्छामः कं शरणं यामः इति विलपन्तो मुहुर्निश्वस्य गलिताश्रुलोचना गन्तुमारभन्ते। किञ्चिद्दूरं गतास्ते पुरोधसाऽवलोकिताः पृष्टाश्च—किमेतत्? कथं रोरुद्यमाना गच्छन्ति भवन्तः? इति। ततश्च सर्वं वृत्तान्तमाकर्ण्य विमृश्य मृदु विहस्य चाह—अलं रुदितेन, मामनुसरन्तु भवन्तः। सर्व एव यूयं तस्य चण्ड्यां वर्त्तध्वे। इत्युक्त्वा तैः सार्धं कालिदाससकाशमेत्य पृच्छति, वत्स कालिदास! किमेतदकार्यं कृतम्? कथमेते विताड़िताः? इति। कालि-

[1] मातः, पितः, पितृष्वसः, पितृष्वसूपते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दासेनोक्तं—यन्मे चण्ड्रां नास्ति तत् सर्वमेवासदिति मन्ये। चण्ड्रां दृश्यते—"स्त्रियः समस्ताः सकला जगत्सु" इति। वाप, मा, पिशि, पिसा, एतेषां कोऽपि चण्ड्रां नास्ति एषामर्थे एतावन्तं कालं वृथा वसुक्षयं कृतवानस्मि। पुनस्तादृशमकार्यं न कर्त्तुमुत्सहे। इत्याकर्ण्य पुरोहितः कथयति, अहो भ्रान्तस्त्वं तव चण्ड्रां वापो वर्त्तते यथा—"जगत् स्वास्थ्यमती वाप निर्मलञ्चाभन्नभः" इति। तदाकर्ण्य कालिदासः कथयति—आम् एवञ्चेत्तत् वापस्तिष्ठतु नान्यः कोऽपि। पुरोधसा पुनरुच्यते—मा अपि ते चण्ड्रामस्ति, यथा—पातया मा स निष्प्रभाम् इति। कालिदासः—एवञ्चेत् मा अपि तिष्ठतु। पुरोहितः—पिसाऽपि ते चण्ड्रां वर्त्तते यथा—"तत्रा पिसा निराधारा युयुधे तेन चण्डिका" इति। कालिदासः—एवञ्चेत् पिसाऽपि तिष्ठतु। पुरोहितः—पिशि चास्ति ते चण्ड्रां, यथा—"तदागच्छत तृप्यन्तु मच्छिन्नाः पिशि तेन वः" इत्यत्र पिशि वर्त्तते। त्वया चण्ड्राः सर्वमनालोच्य गुरुजनविताडनेन महत् पापमनुष्ठितम्। अतस्त्वया प्रसाद्यन्तां गुरुजनाः। किञ्च यदि कल्याणमिच्छसि तदा सत्वरमेव त्वया षोडशोपचारैश्चण्डीपूजा विधेया इति।

ततः पुरोहितनिदेशेन सर्वं सम्पाद्य कालिदासः स्वस्थोऽभवत्।

शिवमाधवकथा

गते काले च मूल्यार्थी स पुरोधाः किलापणे।
ततोऽलङ्करणादेकं विक्रेतुं कटकं ययौ॥
तत्रैतद्रत्नतत्त्वज्ञाः परीक्ष्य वणिजोऽब्रुवन्।
अहो कस्यास्ति विज्ञानं येनैतत् कृत्रिमं कृतम्॥
काचस्फटिकखण्डा हि नानारागोपरञ्जिताः।
रीतिबद्धा इमे नैते मणयो न च काञ्चनम्॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तच्छ्रुत्वा विह्वलो गत्वा स पुरोधास्तदैव तत् ।
आनीयाभरणं गेहात् कृत्स्नं तेषामदर्शयत् ॥
ते दृष्ट्वा तद्वदेवास्य सर्वं कृत्रिममेव तत् ।
ऊचिरे स च तच्छ्रुत्वा वज्राहत इवाभवत् ॥
ततश्च गत्वा तत्कालं स मूढः शिवमभ्यधात् ।
गृह्णीष्व स्वानलङ्कारांस्तन्मे देहि निजं धनम् ॥
कुतो ममाद्यापि धनं तद्ध्यशेषं गृहे मया ।
कालेन भुक्तमिति तं शिवोऽपि प्रत्यभाषत ॥
ततो विवदमानौ तौ पार्श्वावस्थितमाधवम् ।
पुरोधाश्च शिवश्चोभौ राजानमुपजग्मतुः ॥
काचस्फटिकयोः खण्डै रीतिबद्धैः सुरञ्जितैः ।
रचितं देव तत्रैव व्याजालङ्करणं महत् ॥
शिवेन मम सर्वस्वमजानानस्य भक्षितम् ।
इति विज्ञापयामास नृपतिं स पुरोहितः ॥
ततः शिवोऽब्रवीद्राजन्ना बाल्यात् तापसोऽभवम् ।
अनेनैव तदभ्यर्थ्य ग्राहितोऽहं प्रतिग्रहम् ॥
तदैव भाषितं चास्य मुग्धेनापि सता मया ।
रत्नादिष्वनभिज्ञस्य प्रमाणं मे भवानिति ॥
अहं स्थितस्तवात्रेति प्रत्यपद्यत चैष तत् ।
प्रतिगृह्य च तत् सर्वं हस्तेऽस्यैव मयार्पितम् ॥
ततोऽनेन गृहीतं तत् स्वेच्छं मूल्येन मे प्रभो ।
विद्यते चावयोरत्र स्वहस्तलिखितं मिथः ॥
इदानीं चैवं प्राहायं परं जानात्यतः प्रभुः ॥
एवं शिवे समाप्तोक्तावुवाच स च माधवः ।
मैवमादिश मान्यस्त्वमपराधो ममात्र कः ॥
न गृहीतं मया किञ्चिद्भवतो वा शिवस्य वा ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पैतृकं धनमन्यत्र चिरं न्यासीकृतं स्थितम् ।
तदा तदेव चानीतं मया दत्तं द्विजन्मने ॥
सत्यं यदि न तत् स्वर्णं न च रत्नानि तानि च ।
रीतिस्फटिककाचानां प्रदानादस्तु तत् फलम् ॥
निर्व्याजहृदयत्वेन दाने च प्रत्ययो मम ।
दृष्ट एवावतीर्णोऽस्मि यद्रोगमतिदुस्तरम् ॥
इत्यभिन्नमुखच्छायमुक्तवत्यत्र माधवे ।
जहास मन्त्रिसहितो राजा तस्मै तुतोष च ॥
नैवमन्यायतः किञ्चिन्माधवस्य शिवस्य वा ।
इति तत्र सभासद्भिः सान्तर्हासमुदीरिते ॥
पुरोहितः सोऽथ ययौ हारितार्थो विलज्जितः ।
कासां हि नापदां हेतुरतिलोभान्धबुद्धिता ॥
तौ च धृतौ ततस्तत्र तस्थतुः शिवमाधवौ ।
परितुष्टनृपावाप्तप्रसादसुखितौ चिरम् ॥
एवं सूत्रशतैस्तैस्तैर्जिह्वाज्वालानि तन्वते ।
जालोपजीविनो धूर्ता धरायां धीवरा इव ॥

Then the merchants, who were connoisseurs in jewel, said after examining it, "Ha! the man who made these sham jewels was a clever fellow, whoever he was. For this ornament is composed of pieces of glass and quartz coloured with various colours and fastened together with brass, and there are no gems or gold in it." When the chaplain heard that, he went in his agitation and brought all the ornaments from his house and showed them to the merchants. When they saw them, they said that all of them were composed of sham jewels in the same way; but the chaplain, when he heard that, was, so to speak, thunder-struck. And immediately the fool went off and said to S'iva, "Take back your ornaments and give me back my own

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

wealth." But S'iva answered him, "How can I possibly have retained your wealth till now? Why it has all in course of time been consumed, in my house." Then the chaplain and S'iva fell into an altercation, and went, both of them, before the king, at whose side Mādhava was standing. And the chaplain made this representation to the king: S'iva has consumed all my substance, taking advantage of my not knowing that a great treasure, which he deposited in my house, was composed of skilfully coloured pieces of glass and quartz fastened together with brass.' Then S'iva said, "King, from my childhood I have been a hermit, and I was persuaded by that man's earnest petition to accept a donation, and when I took it, though inexperienced in the ways of the world, I said to him, I am no connoisseur in jewels and things of that kind, and I rely upon you, and he consented saying, 'I will be your warrant in the matter'. And I accepted all the donation and deposited it in his hand. Then he bought the whole from me at his own price, and we hold from one another mutual receipts; and now it is in the king's power, to grant me help in my sore need." S'iva, having thus finished his speech, Mādhava said, "Do not say this, you are honourable, but what fault have I committed in the matter? I never received anything either from you or from S'iva; I had some wealth inherited from my father, which I had long deposited elsewhere; then I brought that wealth and presented it to a Brahman. If the gold is not real gold, and the jewels are not real jewels, then let us suppose that I have reaped fruit from giving away brass, quartz and glass. But the fact that I was persuaded with sincere heart that I was giving something, is clear from this, that I recovered from a very dangerous illness." When Mādhava said this to him without any alteration in the expression of his face, the king laughed and all his ministers, and they were highly delighted. And those present in court said, laughing in their sleeves,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"Neither Mādhava nor S'iva has done anything unfair." Thereupon that chaplain departed with downcast countenance, having lost his wealth. For of what calamities is not the blinding of the mind with excessive greed, the cause? And so those two rogues S'iva and Mādhava long remained there, happy in having obtained the favour of the delighted king. Thus do rogues spread the webs of their tongue with hundreds of intricate threads, like fishermen upon dry land, living by the net. TAWNEY.

छात्रहितैषिणी

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

अध्यापकः। वत्स, गोपालक, संस्कृतभाषयानूद्यताम्—He will read tomorrow.

गोपालकः। स श्वोऽधीष्यते।

अध्यापकः। नहि नहि। अशुद्धमुक्तं श्रीमता।

गोपालकः। आर्य! कृतपरिश्रमोऽस्मि व्याकरणशास्त्रे। अतिगभीरमपि महाभाष्यं द्विस्त्रिः पठितम्। कुतो मे वचनेऽशुद्धिलेशोऽपि पदं कुर्यात्?

अध्यापकः। अधीष्यते इत्युक्तं ननु। तत्त्वशुद्धमेव, अत्र गुणस्य विहितत्वात्। अध्योष्यते इत्येव पदं साधु।

गोपालकः। आर्य, वैयाकरणकुलवरेण्येन महर्षिप्रवरेण पतञ्जलिना महाभाष्येऽधीष्यतेपदं प्रयुक्तम्। तथाहि तमधीष्टो भृतो भूतो भावी [५।१।८०] इति सूत्रं व्याचक्षाणेन तेनोक्तम्—न ह्यसौ मासमधीष्यते इति। पतञ्जलेरेव प्रमादश्चेत् ममापि प्रमादो भवतु। सर्वथा शेषनागस्य पतञ्जलेरेव सरणिर्मयानुस्त्रियते। आङ्लकविनाप्युक्तम्—better to err with Pope than shine with Pie, वरं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पोपेन (कविरूप्योण) साकं प्रमादे पतनं न पुनः पाइना (कविपाशेन) साकं मुहूर्त्तं ज्वलनमिति ।

अध्यापकः । वत्स, सर्वथा भ्रान्तोऽसि । अहो निःसीमं ते भ्रान्तिविलसितम् । प्रथमतस्तावदृषिभिः प्रमादेन वा कारणान्तरेण वा प्रयुक्तं व्याकरणानुशासनविरोधि पदमस्माभिर्न प्रयोक्तव्यम् । तपोमाहात्म्यशालिनामृषीणां प्रमादा अपि तपःप्रकर्षेण निर्धूयन्ते । अत एवोक्तं शास्त्रकृद्भिर्मुनिप्रवरैः—तेजीयसां न दोषायेति । किञ्च, तमधीष्टो भृतो भूतो भावीति सूत्रे महर्षिणोक्तम्—अधीष्टभूतयोर्द्वितीयनिर्देशोऽनर्थकः । किं कारणम् ? तत्रादर्शनात् । न ह्यसौ मासान् अधीष्यते । किं तर्हि मुहूर्त्तमसावधीतो मासं तत् कर्म करोतीति । अत्र व्यक्तमेव अधिपूर्वकेषधातोः कर्मणि लटि प्रथमपुरुषैकवचने अधीष्यते इति पदं निष्पन्नं न पुनरधिपूर्वकेङ्धातोर्लृटि । अत एव ऋषिवयण शुद्धमेव पदं प्रयुक्तम् । श्रीमता पुनर्महर्षेर्भावमजानताशुद्धं पदमुदीरितम् । एतदेवान्धमनुकरणमित्युच्यते साम्प्रतिकैः ।

गोपालकः । आर्य, नामसदृशमेव मया विचेष्टितम् । गोपालकोऽस्मि नाम्ना, बुद्धिरपि मे गोपानुरूपैव । तथाच वङ्गीयानामाभाणकः—गयलार आशी वछरेओ बुद्धि पाके ना । न खलु गोपालानामशीत्यापि वर्षर्बुद्धिः परिणतिं यातीति । अद्य मे मनसि तमोऽपहोऽत्रभवता दत्तो ज्ञानप्रदीपः ।

अध्यापकः । वत्स, श्रवणेन मननेन निदिध्यासनेन च गोपालकचूडामणेः सायुज्यं लभस्व ।

गोपालकः । आर्य, अनुगृहीतोऽस्मि ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निर्वचनरहस्यम् (Popular Etymology)

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

अमरकोषे [२।८।४५] दृश्यते—आजानेयाः कुलीनाः स्युरिति। व्याख्यातञ्चैतत् क्षीरस्वामिना—आजेन क्षेपेण आनेया आजानेयाः आयत्ता इत्यर्थः। इति। सर्वानन्देन पुनरुक्तम्—कुलीनाः प्रधानाश्च भूमिभवा अश्वा आजानेयाः, सुवाहत्वात्। अजावन् नेया अजानेयाः। पृषोदरादित्वादादिदीर्घत्वमिति हड्डचन्द्रः। इति। भानुजिदीक्षितेन क्षीरस्वामिन एव मतं प्रपञ्चितम्। अजनम्। अज गतिक्षेपणयोः। घञ्। आजेन क्षेपणेन आनेयाः प्रापणीया आयत्ता वा। .... शक्तिभिर्भिन्नहृदयाः स्खलन्तश्च पदे पदे। आजानन्ति यतः संज्ञामाजानेयास्ततः स्मृताः॥ इत्यश्वशास्त्रम्। इति। रघुनाथेनोक्तम्—आ सम्यक् जवेनारोहणस्थानं नयन्ति। पृषोदरादिरिति।

भाषायामाजानिशब्दस्यानुपलम्भादाजानशब्दस्यापि विरलप्रयोगाट्टीकाकृद्भिरेव रीत्या शब्दस्यास्य पृषोदरादिष्वन्तर्भावः कल्पितः। वस्तुतस्तु जन्मार्थ आजानिशब्दो वेदे समुपलभ्यते। एवञ्च यथा कुलशब्दात् कुलीनशब्दो निष्पन्नस्तथाजानिशब्दादाजानेयशब्दः। अयं तु विशेषः, कुलीनशब्दे ख-प्रत्ययः, अत्र पुन ढक्प्रत्ययः। महर्षिणा पाणिनिना दुष्कुलाड् ढक् [४।१।१४२] इति सूत्रं प्राणायि। स चाजानिशब्दादपि भवति। कौषीतकिब्राह्मणे [३०।५] आजानेय्यशब्द उपलभ्यते।

अभिधानविमर्शः

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

विद्वद्वयेण केशवस्वामिना नानार्थार्णवसंक्षेपे [२।२०३।१७९३-१७९५] प्रतिपादितम्—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ स्त्री शमिता चूर्णे गोधूमस्येति यादवः ॥
असाध्विव तदाभाति शब्दज्ञानां यदग्रणीः ।
गोधूमचूर्णे समिधं धान्तं पुंलिङ्गमुक्तवान् ॥
शाकटायन आचार्यस्तस्यापभ्रंश इत्ययम् ।
भासते सापि साध्वी चेदीप्स्ये शमयतेस्त्रिषु ॥ इति ।

सर्वमिदमभित्तिचित्रायितमिति प्रतिभाति, समिताशब्दस्य यवनभाषातः स्वीकृतत्वात् तत्र संस्कृतधातुप्रत्ययानामप्रवृत्तेः । ग्रीक्-भाषायां सूक्ष्मतमगोधूमचूर्णार्थे semidalis-शब्दः प्रयुज्यते, तन्निर्मितरोटिकायां semidalitēs शब्दो व्यवह्रियते । गोधूमचूर्णार्थे चासीरियभाषायां samidu-शब्द आरामिकभाषायां च semīdā शब्द उपलभ्यते । अयमेव semīdā शब्दः संस्कृते समिता संवृत्तः, सा च शम्धातोरेव निष्पन्नेत्यभिमानेन कैश्चिद् विपश्चिद्भिः शमिता विहिता । अपरैः पुनः शाकटायनादिभिः शब्दसादृश्यात् समिध्-शब्दस्यैवायमपभ्रंश इति मन्यमानैरस्यार्थे समिध्-शब्दः पठितः । मूलतस्तु म्लेच्छभाषातो गृहीतोऽयं शब्दः ।

गोधूमा धवला धौता कुट्टिता शोधितास्तथा ।
प्रोक्षिता यन्त्रनिष्पिष्टाश्चालिताः समिताः स्मृताः ॥

इत्यायुर्वेदाचार्याः ।

पाठविमर्शः

[श्रीक्षितीशन्द्र-चट्टोपाध्यायः]

'उपज्ञा ज्ञानमाद्यं स्यात्' [२।७।१३] इत्यमरवचनस्य क्षीरस्वामिटीकायां Trivandram-मुद्रिते पुस्तके दृश्यते—उपज्ञायते त्युपज्ञा इदंप्रथमतया ज्ञानम् । चन्द्रोपज्ञं व्याकरणम् इति । पादटीकातोऽवगम्यते चन्द्रोपज्ञसंज्ञकं व्याकरणम् इति ङपाठः । पुण्यपत्तनस्थपुस्तके मुद्रण-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्वयेऽपि चन्द्रोपज्ञसंज्ञकं व्याकरणमिति पाठः समादृतः। अत्र शुद्धः पाठः—चन्द्रोपज्ञमसंज्ञकं व्याकरणमिति। देवनन्दिप्रभृतिभिर्विरचितेषु जैनेन्द्रादिव्याकरणेष्वेकाक्षरसंज्ञाबाहुल्यं परममुद्वेजकं मनीषिणामिति चन्द्राचार्येण सर्वथा प्रत्याख्याता टिघुभादयः संज्ञाः स्वस्मिन् व्याकरणे। परं संज्ञापरित्यागे कृतसङ्कल्पेनापि तेन लडादयः संज्ञाः स्वीकृता एव। एतच्च हम् त कम्ली छोड़ता हाय, कमली हामको छोडता नेहि इत्याभाणकं स्मारयति। एतद्गता च कथेदृशी।

कश्चन धार्मिकः प्रत्यहं प्रातर्भागीरथीसलिले स्नानक्रियां निर्वर्तयति। स चैकदा स्नानमाचरन् प्लवमानं कम्बलकल्पं किमप्यपश्यत्। द्रुतं च बाहुभ्यां सन्तरन् कम्बलं गृहीतवान्। गृहीतकम्बलश्च नदीतटाद् दूराद्दूतरं प्रतस्थे। अन्यैः स्नानार्थिभिरुक्तम्—अये परित्यज्यतां कम्बल इति। तेन प्रत्युक्तम्—अहं तावत् कम्बलं परित्यजामि, कम्बलस्तु कथमपि मां न त्यजति। वस्तुतस्तु स कम्बलो भल्लूक एव।

कालिदास-भवभूती

[स्वर्गत-द्विजेन्द्रलाल-रायः]

वस्तुतो नाटकमिदं भागत्रयात्मकम्। तत्र प्राथमिकाङ्कत्रयात्मके प्रथमे भागे राज्ञः पतनम्। चतुर्थपञ्चमाङ्कात्मके द्वितीये भागे उत्थाने प्रयत्नः, अन्तिमाङ्कत्रयात्मके च तृतीये भागे उत्थानमुपवर्णितम्।

अस्मिन्नेव पतनेऽभ्युत्थाने च दुष्यन्तचरित्रस्य माहात्म्यम्। मृगयासूत्रेणाश्रमप्रवेशादनन्तरं शकुन्तलां दृष्टवतस्तस्य पतनस्य परा काष्ठा समजायत। निगूढावस्थानेन श्रवणम्, मिथ्यात्मपरिचयप्रदानम्, शकुन्तलायाः सन्दर्शनमात्रेणैव स्वोपभोग्यत्वकल्पनम्, मातुरादेश

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

औदासीन्यम्, छलेन माधव्यस्य राजधानीप्रेषणम्, मिथ्याकथनम्, विवाहान्ते च महर्षेः प्रत्यावर्तनात् पूर्वमेव तस्करवत् पलायनम्—एवं गर्हित-कर्मणां परमप्रकर्षस्तेनाधिरूढः। पापाचारेषु केवलमेकैव पुण्यरेखा विराजते—गान्धर्वो विवाह इति। केवलमयमेव प्राथमिकाङ्क-त्रितये तमनन्तनिरयाद्रक्षितवान्, आयतौ च तस्योत्थानस्य मार्गं परिरक्षितवान्।

पञ्चमेऽङ्के पश्यामः राजधानीं प्रत्यावृत्तेन राज्ञा विस्मृता शकुन्तलेति। एषा खलु परा काष्ठा पतनस्य। अस्मिन्नेवाङ्के पश्यामः—तस्मिन् विस्मृतिसागरे राजा निमग्नोन्मग्नस्तिष्ठति—समुद्रोपरि समुत्तिष्ठति समुद्राभ्यन्तरे च निमज्जति। शकुन्तलायाः सभायामुपस्थानात् पूर्वमेव राजा सङ्गीतमाकर्ण्योन्मनीभवति। परं तदात्व एव वर्तमानेऽतीतं विलुप्यते। सभामुपनतायां शकुन्तलायां यावदृषयः शपथेनाभिभाषन्ते शकुन्तला तस्य धर्मपत्नीति, तावदेव तस्य मनसि संशयः समुन्मिषति—किमत्रभवती मया परिणीतपूर्वेति। परं नासौ प्रभवति स्मर्तुम्, शकुन्तलाया नातिपरिस्फुटं शरीरलावण्यं प्रेक्षते, तस्य मनसि लोभः पदं करोति, परं तदात्व एव चिन्तयति—भवत्वनिर्वर्णनीयं परकलत्रमिति। स खलु शकुन्तलाया अपावृतं वदनमण्डलं विलोकयति चिन्तयति च—

इदमुपनतमेवं रूपमक्लिष्टकान्ति
प्रथमपरिगृहीतं स्यान्नवेति व्यवस्यन्।
भ्रमर इव निशान्ते कुन्दमन्तस्तुषारं
न खलु सपदि भोक्तुं नापि शक्नोमि हातुम्॥

इति। तथाप्यसौ धर्ममार्गात् पदात् पदमपि न प्रचलति। यदा तावच्छकुन्तला वदति—पौरव, युक्तं नाम त्वया पुराश्रमपदे स्वभावोत्तानहृदयमिमं जनं तथा समयपूर्वं सम्भाव्य साम्प्रतमीदृशैरक्षरैः प्रत्याख्यातुम्, तदा राजा कर्णौ पाणिभ्यां पिधाय ब्रूते—शान्तं शान्तम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्यपदेशमाविलयितुं किमीहसे जनमिमञ्च पातयितुम् ।
कूलङ्कषेव सिन्धुः प्रसन्नमोघं तटतरुञ्च ।।

इति। ततश्च यदा शकुन्तलाभिज्ञानमङ्गुरीयकं प्रदर्शयितुमैच्छत्, राज्ञा स्मर्तुं प्रयतितम्, तेनोक्तम्—प्रथमः कल्प इति। यदा च न प्रबभूव शकुन्तलाभिज्ञानं प्रदर्शयितुं तदा राज्ञोक्तम्—इदं तावत् प्रत्युत्पन्नमतित्वं स्त्रीणाम् इति। ततश्चाविश्वासस्य तरङ्गपरम्परा तस्योपरि प्रावहत्। स च तथाधः पतितो यथा समग्रां स्त्रीजातिं (गौतम्यपि तत्रान्तर्भवति) तीव्रेण सोत्प्रासवचनेन समाक्रामत्। तस्य तद्वचनस्योद्धृतितोऽपि जुगुप्सते मे मनः। ततश्च शकुन्तलां तीव्रमभर्त्सयत। तस्याश्च विभ्रमविवर्जितं कोपरक्तं वदनकमलं वीक्षमाणस्य राज्ञः पुनरप्युदभवत् सन्देहः—

न तिर्यगवलोकितं भवति चक्षुरालोहितं
वचोऽपि परुषाक्षरं न च पदेषु सङ्गच्छते ।
हिमार्त्त इव वेपते सकल एव बिम्बाधरः
प्रकाशविनते भ्रुवौ युगपदेव भेदं गते ।।

अपि च सन्दिग्धबुद्धिं मामधिकृत्य अकैतवमिवास्याः कोपः सम्भाव्यते। तथाह्यनया—

मय्येवमस्मरणदारुणचित्तवृत्तौ
वृत्तं रहः प्रणयमप्रतिपद्यमाने ।
भेदाद् भ्रुवोः कुटिलयोरतिलोहिताक्ष्या
भग्नं शरासनमिवातिरुषा स्मरस्य ।। इति ।

तत एवं दुष्यन्तः पुनरपि विस्मृतिसागरे निमग्नोऽभवत्।

अस्मिन्नङ्के पश्यामो बाढं राजा दुष्यन्तः कामुको वा भवतु मिथ्यावादी वा भवतु, स खलु परमार्थतो मानुष एव। पुरतस्तावदनितरसाधारणरूपा युवतिः पतित्वं प्रार्थयते—कदाचिद्वा कातरस्वरेण, कदाचिद्वा तर्जनगर्जनेन। तदेव रूपं येन खलु दूरीकृता उद्यानलता

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वनलताभिः, तदेव रूपं यदधिकृत्योक्तं—मानुषीषु कथं वा स्यादस्य रूपस्य सम्भव इति, तदेव रूपं यद्दर्शनेन तेन कामुकवदाचरितम्, आतिथ्यमवमानितम्, ऋषेरभिशापोऽपि न्यक्कृतः। न खल्वद्यापि म्लानिमापन्नं तद्रूपम्, इदानीमपि प्रोज्ज्वलमेव शरीरलावण्यम्। सैव समागत्य पतित्वं भिक्षते। अपरतश्च धर्मभयम्, ऋषिश्च ऋषि-तनया च पुरतो वर्तमानौ कदाचिद् विनतिपूर्वकं शकुन्तलायाः कृते राजानमधिब्रुवाते, कदाचिद्वा विनिपातेन भाययतः। परं किं वा राज्ञा क्रियेत। अपरतस्तावद् धर्मभयं जागर्ति। एकतस्तावत् अमानुषीसम्भवं रूपम्, ऋषेः क्रोधः, नार्या अनुनयः, अपरतः पुनर्धर्मभयम्।

स खलु निमज्जति किन्तु सन्तरणदक्षाभ्यां बाहुभ्यामुन्मज्जनाय प्रयतते, परं न प्रभवत्युन्मङ्क्तुम्। किमपि दैवबलेन समाच्छन्नोऽसौ वर्तते, परमसौ कुज्झटिकायास्तस्या निःसर्तुं प्रयतते। यथा हि यावत् पिञ्जरबद्धः सिंहः प्रबलपराक्रमेण लौहपञ्जरं चूर्णयितुमुद्यतस्तावत् प्रभोर्गर्जनमुपश्रुत्यास्फुटकरुणरवेण शिरोऽवनमयति। दुष्यन्तो हि मन्त्रमुग्धः फणिवर इव दीप्तश्वासेन फणं विस्तार्यैव धूलाववलुण्ठति। ईदृशे दृश्ये वर्तते खलु कोऽपि मोहः, किमपि सौन्दर्यम्, कोऽप्युल्लासः। बाढम् दुष्यन्तः खलु परमार्थत एव मानुषः।

अस्माकं मतं भाषा च

[श्रीपट्टाभिराम-शास्त्री, विद्यासागरः]

जगति सन्त्यनेकानि मतानि। एकैकमपि मतमेकैकेन महापुरुषेण प्रवर्तितम्। येन यन्मतं प्रवर्तितं तन्नाम्नैव तद्व्यवह्रियते। बुद्धेन भगवता प्रवर्तितं बौद्धम्, जिनाचार्येण प्रवर्तितं जैनम्, मोहमदेन प्रवर्तितं मोहमदीयम, क्रिस्तुना प्रवर्तितं क्रैस्तवम्। पारसीकेषु जरथुस्त्र-महोदयेन

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(Zarathustra) निर्मितं मतमद्यापि वर्तते। चीनदेशेषु कन्फ्यूषस् (Confucius) महोदयेनाविष्कृतं मतमस्ति। एवं सर्वमपि मतमेकैकेनालौकिकीं काञ्चन शक्तिमातस्थुषा पुरुषेण तस्मिंस्तस्मिन् काले प्रवर्तितमिति वयमनुभवामः। इमे च पुरुषा महान्त इत्यत्र नास्ति सन्देहः। अत एवेमानि तत्तन्मूलपुरुषस्य नाम्नैवाद्यापि व्यवह्रियन्ते।

अस्मदीयो भारतीयः कश्चन बालः 'तव मतं किम्' इति पृष्टो यद्यधीतविद्यस्तर्हि ब्रवीति 'हिन्दुमतम्' इति; अनधीतविद्यश्चेज्जोषमास्ते। नैवं मतान्तरेषु दृश्यते। तत्र बालो युवा वा, युवतिः स्थविरा वा, आढ्यो दरिद्रो वा, विपश्चिद् गोपो वा स्वीयं मतं नाम्ना व्यवहरति। तथास्माकं समाजे न व्यवहरन्ति। यद्यपि 'शैवः, वैष्णवः, स्मार्तः, शाक्तः' इत्येवं नामानि दृश्यन्ते, तथापीमान्यवान्तरविभागानेवावद्योतयन्ति। केचन 'सनातनधर्म' इति नवीनं नाम प्रयुञ्जते। यदीदं नाम पुरातनमभविष्यत्तर्हि ग्रामनिवासिषु स्थविरेषु बालेषु वा पृच्छ्यमानेषु तेऽपि नामेदमवक्ष्यन्। सम्प्रति भारतीयः कश्चन कृषकः पृष्टश्चेत् 'सनातनधर्म' इति व्यवहरेद्वा? अतो नेदं प्राचीनं नाम। 'हिन्दू' इति नामाप्याधुनिकमेव प्रतिभाति। प्राचीनैर्विरचितेष्वनल्पेषु पौराणिकेषु सौत्रेषु वा प्रबन्धेषु नेदं नाम समुपलभ्यते। 'हिन्दू' इति नामकरणे कारणञ्चेदं केचन कथयन्ति—यदस्मासु केचन सिन्धुनद्यास्तटे न्यवसन्। देशान्तरस्थाः 'सिन्धुम्' इन्दुशब्देन (Indus) व्यवहरन्ति। तत्तटे विद्यमानं देशम् 'इन्दुदेश' इति व्यवाहरन् इति। एकस्य प्रसिद्धस्य देशस्य पार्श्वे विद्यमानस्य देशान्तरस्यापि तन्नाम्नैव व्यवहार इति पुरातनः पन्थाः। उत्तरस्यां दिशि कस्माच्चिदपि नगराद्दक्षिणदेशमागतो दाक्षिणात्यैः 'काशीवासी' इति व्यवह्रियते। एवं दक्षिणस्यां दिशि स्थितान्नगरादुत्तरदेशं प्राप्तस्तत्रत्यैस्सः 'मद्रासी'-शब्देन व्यपदिश्यते। एवमेव सिन्धुप्रदेशं 'हिंदुदेश' इति, तत्रत्यान् 'हिन्दव' इति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तेषां 'हिन्दूमतम्' इति च वक्तुमारेभिरे। अत इदमपि नाम न प्राचीनमिति प्रतिभाति।

तत्तन्मते वर्तमानास्सर्वेऽपि स्वीयमसाधारणं चिह्नमेकं रक्षन्ति। यथा जैनः अस्तं गते सवितरि नाश्नाति, बौद्धश्च रक्तं पीतं वा वस्त्रं परिधत्त, पारसीकः शवस्य दाहं खननं वा न करोति, मोहमदीयः विलक्षणमेव शिरस्त्राणं बिभर्ति, एवमस्माकमसाधारणं चिह्नं नोपलभ्यते। अस्मासु केचन भस्म धारयन्ति चेदपरे ऊर्ध्वपुण्ड्रं दधते, अन्ये च शून्यललाटा एव पर्यटन्ति। कश्चनोष्णीषञ्चेत्परिधत्ते, अपरश्शूर्पाकारं शिरस्त्राणमभिनन्दति, अन्यश्च विनैव केनापि शिरस्त्राणेन परिभ्रमति। कश्चन सशिखः, अपरश्च विशिखः। एको बद्धशिखश्चेदपरो मुक्तशिखः। यद्यपि विद्धकर्णयुग्मत्वमस्माकं पुरुषाणां स्त्रीणाञ्च विद्धकर्णनासिकात्वं चिह्नं भवितुमर्हति, तथाप्यस्यापि साम्प्रतं भूयान् व्यभिचारः। अतो नास्माकमेकमसाधारणं चिह्नमुपलभ्यते।

कुतोऽस्माकं मतस्य नाम चिह्नं वा नास्ति? कुतश्च मतान्तरेषु दृश्यते? मम तु प्रतिभाति—नाम्नो राहित्यमेवास्माकं मतस्य गौरवमावहतीति। राहित्यमिदं नाम्नः परब्रह्मण इवास्याखण्डत्वम्, चिह्नराहित्यञ्चास्यापरिच्छेद्यत्वमवद्योतयति। मतं हि नामैकैकस्य मानवस्य परमं श्रेयोऽवाप्तुं मार्गः। यच्च परमस्य श्रेयसः साधनं तदेव मतम्। इदमेव ग्रान्थिकभाषायां धर्मशब्देन व्यवह्रियते। तदस्य नाम्ना किं प्रयोजनम्? यानि हीदानीं मतानि तेन तेन नाम्ना व्यपदिश्यन्ते तान्येकैकेन महापुरुषेण प्रवर्तितानीति पूर्वमवोचाम। तेभ्यः पुरुषेभ्यः पूर्वं तानि मतानि नासन्नित्यभ्यूहितुं शक्यते। अत एव तेषां समयगणनं कुण्डलीनिर्माणं वा सुकरम्। आसीत्कश्चन कालः, यस्मिंश्चैकमेवेदं मतं सर्वमपि जगद्व्याप्यावर्तत। यदा ह्येकमेव, तदा नाम्न आवश्यकता नासीत्। नामराहित्यमेवास्य पुरातनत्वमवद्योतयति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वृत्तशंसि च्छत्रम्

[सौभाग्यवती क्षमा राओ]

राजदुर्गान्नातिदूरं कस्याञ्चिद् ग्रामटिकायां रय्याख्यायामेकदा कस्यचित् पुरोहितस्यात्मजा रूपयौवनसम्पन्ना नवयौवने प्राप्तवैधव्या सह जामात्रात्मनोऽष्टाविंशतिवर्षीयेण चतुरङ्गं क्रीडन्त्यास्त। पित्तलदीपिकाया मन्दमन्ददीप्त्या मुखशाला सामिप्रकाशितासीत्।

"हंहो! अनुपम! पुनरपि जितोऽसि मया तृतीयवारमद्य। इतीन्दिराब्रवीज्जामातरं शारिनृपस्तम्भनं सम्पाद्य। समाश्रितौदासीन्येन पराजयः प्रत्यपद्यत जोषमनुपमेन। नानाविधजटिलचिन्ताशतैराकुलितमासीत् खलु तदीयहृदयम्। किञ्चिदज्ञाततीरं समापन्नस्येव नाविकस्य तदानने काचित्सन्दिग्धतोपालक्ष्यत। "किं संवृत्तं भवतोऽद्य? कैर्विचारतरङ्गैराकृष्टं चतुरङ्गपटोर्भवतश्चेतः" इतीन्दिरा तमपृच्छत्।

अनुपमः। अस्माकमितः प्रस्थानस्य चिन्तयाऽऽकुलीभूतोऽस्मि।

इं। पितृचरणैः पञ्चाङ्गावलोकनं कृतं न वेति ज्ञातुमिच्छामि खलु।

अ। कुतः?

इं। युवयोः प्रयाणानुकूलशुभमुहूर्तोपलब्धये।

अनुपमस्याधरोऽस्फुरत्। विनतमुखः क्षणं स तूष्णीं तस्थौ, तत इन्दिरायां बद्धदृष्टिः किञ्चिद्रहस्यं तस्यै निवेदयितुमिच्छन्निव सम्भ्रान्तचेता बभौ।

इं। भवत्प्रस्थानमाशु मा भूत्।

अ। अप्येवं भवत्या अभिलष्यते?

इं। (सगद्गदम्) अनतिक्रान्तशैशवास्ति मदीयवत्सा मीरा। प्रथमत एव भविताऽऽवयोर्वियोगः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रकोष्ठस्य तमोमयकोणे श्रुतिपठनं कुर्वन्निन्दिराया जनको जराक्रान्तो जगाद "नास्त्येतावदल्पवयस्का मीरा। द्वादशाब्ददेशीया हि सा संप्रति। त्वमेकादशवर्षीयासीरुद्वाहसमये। चतुर्दशवर्षीयायां च त्वयि समुपजाता तवात्मजा" इति। अत्र सहसा चकितेवेन्दिरा जिह्वां दष्ट्वा पितरमपृच्छत्। "तात! अपि पञ्चाङ्गमवलोकितं भवता" इति। "आगामी भानुवासरोऽनुकूलः प्रयाणे" इति प्रवया राजदुर्गवर्तिनो देवतालयस्य पुरोधा अभ्यधात्। ततश्च विशीर्णहस्तलेखान् सञ्चित्य जीर्णवस्त्रेण परिवेष्ट्य च तान् स समुत्थाय मुखशालातो मन्थरमपासृपत्। अथेन्दिरा सायतोच्छ्वासं दीपिकायां तैलमधिकम् उत्सृज्य मृदुस्वरेणाब्रवीज्जामातरम्। सप्ताहमात्रमवशिष्यते प्रयाणस्य युवयोः। इति।

अनुपमः। सहावाभ्यां देशान्तरमायास्यति भवतीत्याशास्यते बलवन्मया।

इं। पितृपादानत्रैकाकिनो विसृज्य कथं नाम निर्गच्छेयमितः। परिषेवितुं तानवश्यं कोऽप्यपेक्ष्यते।

अ। अमंसि सर्वथा मया यदस्मत्सदन एव भवती नित्यं कृतावासा भवितेति।

"आदौ प्रायो लज्जाशीलेव वत्सा मे प्रतिभायात्परं क्रमेणातिक्रान्तभीरुताऽऽचरिष्यति पत्युः परिचरणं विना निर्बन्धम्। अतिसौम्या सुशीला दक्षा च कन्यका मे।" इति सबाष्पं नयनयुगलं मार्जयन्तीन्दिरा व्याहरत्।

अ। देवालयं यातेषु भवदीयपितृपादेषु कथं भवत्यैकाकिन्या स्थास्यते विजने स्थले?

इं। किं वा करणीयम्? वार्धके गुरुजनस्य योगक्षेमं वोढुमर्हन्त्यात्मजाः। नोचेन्निन्दास्पदं खलु ते भवेयुः इति निगद्येन्दिरा स्वकेशकलापं विमुच्य करपल्लवाभ्यां वेणीं विरचयितुमारेभे।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अ। अहो कामनीयकं भवत्याः कुन्तलानाम्।

इं। मीराया रुचिरतरो भ्रमरसदृशमसृणकुटिलालककलापः कौशेयस्य मार्दवं भजते।

अ। न मयाद्यापि लक्षितोऽसौ।

तदौदासीन्यात्किञ्चिद् विषण्णाभूदिन्दिरा।

इं। आरूढनवयौवना वर्षद्वयोत्तरं वत्सा मे भवत्सहचरी भविता।

अ। अस्त्येकैवावनितले—

इं। (सकुतूहलम्) का नाम सा ?

अ। भवतीमन्तरा न भवेत्काप्यन्या मत्सहचरी।

इति किंवक्तव्यतामूढस्य जामातुर्मुखादकाण्डे निःसृतमिदं वचः। वचनस्य याथार्थ्यं जिज्ञासुरिवेन्दिरा शून्यदृष्ट्या तं व्यलोकयत्। निद्रालोरर्भकस्यास्फुटजल्पनमिव प्रत्यभासत वचनं तस्य यदा स पुनरभ्यधात्।

अ। अपि जानाति भवती यद् भवत्या वियुक्तस्य मे शून्यशून्यं भविता जीवितमिति ?

इन्दिराया मुखाब्जस्य मृदुलत्वं सपदि विलीनं, तत्र च कापि रुक्षता दृष्टिगोचरतामापतत्। विस्मयस्तिमितेव सा स्थिता क्षणं तूष्णीम्, परस्तात्तद्वचः श्रावं श्रावं नितरां सम्भ्रान्ता समभूत्।

अ। मासषट्कात्प्राग् भवल्लावण्याम्बुनिधौ निपातितो मनसिजेन ततश्च सन्तापवह्निकुण्डे निक्षिप्तः सन् कियतीं वेदनामन्वभवमिति न कोऽपि पृथिव्यामाकलयितुं प्रभवेदिति कथं कथमप्यगदत्तरुणः। रोषाग्निनेन्दिराया नेत्रद्वन्द्वं नितरां प्राज्वलत्। "अलमलमीदृग्वचसे"ति परुषतरं सा निजगाद। अनुपमस्याननं नैराश्येन विवर्णतां भेजे।

इं। (सविषादम्) अहो नैतदनुरूपं चेष्टितं भवतः। किमिति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्राकृतेनैवाचर्यते भवता। कुतोऽयमुपप्लवो येन भवदिन्द्रियसंयमो विनाशितो वशित्वं चेतसश्च विलुप्तम्। क्व तत् श्रुतिविज्ञानं यद्भवता सर्वतो विश्रावितम्। क्व हस्तलिखितानां गाथानां विशुद्धिकार्यं यस्मिन् सुदीर्घं व्यापृताः स्थ। किमिति रागाभिषङ्गेण कलुषीकृतं विद्वत्त्वं भवतः। नवोढेव मदीयवत्सा भवतो हृदि विराजमानाऽग्रिमपदमलङ्कुर्यात्। अहं तदीयप्रसूर्मातृभावेनैव सम्भावनीया। किं भविष्यति बालिकाया ममाद्य। मुग्धेयं नचिरान्नवयौवनपदमारोक्ष्यति। पराङ्मुखस्य पत्युर्गेहे कीदृशी तज्जीवनयात्रा भवेत् ?" इत्याख्याय जामातरं बद्धदृष्टिरैक्षतेन्दिरा। स च वज्राघातेन प्रहृत इव निस्पन्दः स्थितवान् क्षणमात्रम्। तदनु क्षिप्रमुत्थाय स्वकल्पितशयनागारं प्रत्यस्खलदनुपमः। अपूर्वप्रशान्ततया गृहमेतदावृतं स्थितम्। निशीथिनीसमयमाख्यापयितुं ग्रामस्य प्रचण्डकांस्यमुच्चैरस्वनत्। सञ्जातलज्जश्चिन्तासङ्घातप्रहृतश्च निजतमोमयप्रकोष्ठे दीर्घमितस्ततः समचलदनुपमः। पूर्वमसाध्यत्वादुद्वाहस्य सह गतभर्तृकयेन्दिरया नैकमासान् परममाधिवैक्लव्यमसहतैषः। पर्यन्ते भग्नाशस्तदीयबालिकामुपायंस्त येन विवाहोत्तरमिन्दिरापि तयो गृहे निवसेदिति। इदानीं तु त्रपाभिभूतः स्वान्तराशयं समूलमुत्पाट्य कस्मिन्नपि गिरिशिखराग्रे विजने भित्तिभिः परिवृतेनात्मनावस्थेयमाजीवम्। विषयोपभोगाभिलाषकलुषतां नयता मनसिजेनोपहास्पदतां नीतोऽस्मि। अपूर्वेयं विडम्बनेत्यवर्णनीयक्लेशार्तो गुरुचिन्तनभारमसहमानः सम्मुखशालां प्रति सोन्नतप्रपदमचलत्। तस्यां तमसावृतकक्षायां क्षणं यावत् तिष्ठति तावत्तस्या अपि योषितो रुदितनादं स्फुटं शृणोति। इन्दिरायाः परितापकारणीभूतमात्मानं विजानन् वज्राघातेनेव प्रभिन्नान्तःकरणोऽभूत्। शनैःशनैरग्रद्वारं प्रति गत्वा निःशब्दं सपदि तमिस्रायां न्यमज्जत्। सूचिभेद्यतिमिरे दुःस्वप्नग्रस्त इव निभृतमास्त मुहूर्तम्। दूराद् ग्रामरक्षकस्य स्वरप्रति-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ध्वनिरनिलनिरानन्दसूत्कारमिश्रितो वैरस्यमपूर्वं परितः प्रासारयत्। विरक्तात्माऽनुपमो राजदुर्गगामिनमध्वानं गृहीतवान्। अचिराद्व्रजनीनाथवियुक्ता रजनी विप्रलम्भदुःखमसहमानेव प्रभातं प्रत्यैक्षत।

अथेन्दिरा प्रकोष्ठान्तरं प्रविश्य वत्सायाः पार्श्वे जामातुः पापनिवेदनं ध्यायं ध्यायमुन्निद्रनयना शयने शयितवती। क्षतमिव सविषेषुणा मर्मभेदिना याथार्थ्यं सवेगं तां नुनोद। पापबुद्धिश्च जामातुस्तस्यां जुगुप्सां महतीमजीजनत्। अब्रवीच्चात्मानं "हा किं भविष्यति बालिकाया मे। विधवाया जीवनापेक्षयापि तिरस्कृतपत्न्या जीवितं दुःखतरम्। महानर्थोपनिपातेऽस्मिन् प्राणत्यागेनापि रक्षणीया वत्सेयम्" इति मुहुर्मुहुः परिस्फूर्जता वात्सल्याद् विषादपरिवाहिना नयनयुगलेन चिरं बालिकामवेक्षमाणा मातृप्रेमनिर्भरप्लाविता मुहुर्मुहुर्नवनीतमृदुलं कपोलं पर्यचुम्बत्। व्यचिन्तयच्च "लुञ्जस्तरुणोऽयं कथं नामाज्ञां मुग्धबालिकामुद्वोढुं प्रत्यपद्यतेति यदादितो विलक्षणं प्रत्यभान्मे तदिदानीं सर्वमेव स्फुटमस्ति।" इति। ततश्चानुपमस्यापूर्वसौमनस्यं येनाकृष्यमाणासीत्पुरा स्वयं तदद्य रोषमेव हृदि तस्या अजीजनत्। बीभत्सिता चात्मानमेव सा भूयो भूय उपालब्ध पर्यष्वजत च गाढं दारिकां पुनः पुनः।

अथ परेद्यवि जामातुः शयनागारं रिक्तमदृश्यत। कृत्स्नं दिनं न न्यवर्तत स मन्दिरं न वान्येद्युर न परश्वो वा। सर्वत्र रय्याग्रामे समीपवर्तिग्रामान्तरे च सप्रयासं तं गवेषयामास जनः। परं न क्वापि प्रत्यक्षीचकारानुपमं कोऽपि। ततः परं चिराय ग्रामीणैर्मार्गितोऽसौ। नासीत्तु विना नैराश्यं किमपि फलमभ्युपायानामेतेषाम्। मासार्धोत्तरं जातुचित्तन्नामाक्षराङ्कितं छत्रं शिरस्त्राणद्वितीयं राजदुर्गोपकण्ठवर्तिनो लालपुरीनाम्नस्तडागस्य तटे गुल्मान्तरितमुपालभ्यत केनचित्। परितप्तमनसानेन तपस्विना प्रायः कासारस्य नीलमणिसवर्णजलेषु परमानन्द उपलब्ध इति तर्कितं जनैः। पर्यन्ते च नैराश्येन नामशेष-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मेवामन्यत जामातरमिन्दिरा । एवं व्यतीतमब्दानामष्टादशकम् । क्रमेण मीरापि बालविधवेत्यात्मानमाकलयामास । इन्दिरा च गुरुतरया चिन्तया कवलीक्रियमाणेवावतस्थे ।

वर्षाकालः । अमावस्यातिथिः । अपराह्णसमयः । अश्रावि नैराश्य-शंसि क्रन्दनं सहसा कस्याश्चिद्दुःखार्ताया अङ्गनायाः । पुण्यपुरोपकण्ठे खड्कीनामोद्देशे समीपवर्तिन्या नद्यास्तटे बभूवैकदा संकीर्णं जनौघन। मध्यमवयस्कस्तापसः कश्चित्तत्प्रदेशान्तिकं निवसन्निशम्य एतन्नदी-तटं प्रति तत्वरे। निर्घृणजलकल्लोलैः सहसाऽऽकृष्यमाणायाः कस्याश्चित्किंकर्तव्यतामूढाया युवत्याः सान्निध्यं क्षणात्प्राप्तवान्। अथ निमज्जनोन्मुख्यास्तस्या वसनाञ्चलाग्रं पाणिना धृत्वा पुनस्तट-मुपेत्य तदीयशिरीषपुष्पपेशलं वपुस्तटस्थशाद्वलोपरि न्यधात् । उन्मीलित-नयनयुगलं तरुण्या वीक्ष्य तापसो विस्मयस्तिमित इवाचलत् पृष्ठतः। कोऽप्यवर्णनीयभावविकारो हृदि तस्य प्रादुरभूत् । युवत्याः कान्ति-विशेषशालिनमाननेन्दुं निरीक्षमाणस्यारूढानेकतर्कस्य चिराद्विस्मृत-पूर्ववृत्तं सहसा स्मरणसरणिमारुक्षदगमच्च व्याकुलतां हृदयं तापसस्य ।

"प्रतीक्ष्यतां तावत् । मदीयकुटीरतः प्रावरणमानेष्यामि शीघ्रम्" इत्युक्त्वा युवत्याः सखीगणं विसृज्य च क्षणात्सह कश्मीरदेशविनिर्मित-प्रावरणेन कश्मीरजसवर्णेन न्यवर्तत तटं तापसः । तेन च कुमार्याः स्कन्ध-युग्मं कमनीयं समाच्छादयामासुः सहचर्यः । ततश्चावलम्बमाना द्वयो-रंसयुगले नगरस्योपकण्ठवर्तिनं विधवाश्रमं प्रति मन्थरगतिः सहचरीभिः सार्धं ययौ युवतिः । कृष्णवर्णकूर्चमात्मीयं परामृशन् पाणिना तापसो निजजीर्णकुटीरं शैवालाच्छादितभित्तिमुपाययौ। स च त्यागराजाभिधो निखिलमप्यहः प्राक्तनहस्तलिखिततालपत्रपठने व्यापृतः स्थितवान् । न कस्याप्यासीद्विदितोऽसौ न वास्मिन् पुण्यपुर्या उपकण्ठप्रदेशे कोऽयं जनः कोऽस्य व्यवसाय इत्यपि जिज्ञासा कुतूहलं वा समभूत्कस्यापि।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निशायां तस्यां मुहुर्मुहुरापराह्णिकवृत्तं तत्स्मृतिसरणिमारुक्षत्। संलग्नक्लिन्नाम्बरतनोः श्लथकुन्तलाया युवत्याः प्रतिमा तच्चेतस्यनवरतभाविरभूत्। साऽपि येन महाभागेन परित्रातासीत्सङ्कटात्तस्मै धन्यवादान् वितरन्ती चिराय जागरितावतस्थे रजन्याम्। तदनु प्रस्वपती चाद्राक्षीत्स्वप्ने स्पृहयालुमुखं सौजन्यसंप्लुताक्षियुगलं तापसस्य। अथ द्वित्रदिवसोत्तरं तत्प्रावरणगतहस्ता त्यागराजस्य कुटीरमभ्युपाययौ युवतिः। उटजाद्बहिरलिन्दभूमौ तालपत्राणि पठन्तं संस्तरमध्यासीनमद्राक्षीत्सा तापसम्। अथ मिथोऽभिनन्दने जाते रमणीया रामीति सुगृहीतनामधेया धरातलमागता राधेव नयनाभिराममुखराजीवान्वयुङ्क्त त्यागराजं सविस्मयम्, "अपि भवद्भिरवगम्यते शास्त्रीयविज्ञानमिदम्" इति। तथैवेत्युक्त्वा तालपत्रेणैकेन पाणिं तस्याः सनाथीकृतवांस्त्यागराजः। "अहो कियदद्भुतं नाम पुरातनकविरत्नैः स्वहस्तलिखितानां प्रबन्धानामध्ययने वैदग्ध्यं भवताम्!" इत्यस्फुटमवदद्रामी साश्चर्यम्। "पठिष्यामि भवत्यै यदि कदाचिदत्रागच्छेद् भवती"ति प्रत्यश्रावि त्यागराजेन। तदीयामन्त्रणमुररीकृत्य समाययौ रामी पुनर्नदीतटं कियद्वासरोत्तरम्। तदारभ्य तयोर्मिथः साक्षात्कारोऽभूद्भूयो भूयः। व्यतीता मासाः केचन। जीवितमुभयोर्यन्नचिरात्प्राग् विरसमासीत्तदिदानीं प्रमोदज्योतिषा समुद्भासितमिवाभवत्। स्वस्वपूर्वकथामनुक्तवतोरनयोर्न विदितमासीद्यदष्टादशाब्दतः पूर्वमुभौ यथाविधि परिणीतावास्तामिति। अत्रान्तरे प्रत्यहं गाढाद् गाढतरो बभूव तयोः प्रेमबन्धः।

अथैकदा प्रदोषे जम्बीरपादपस्यैकस्य मूले कस्यचिन् महात्मनः समाधिसमीपवर्तिनि परिचितपूर्वां मीरां परमद्य रामीति विश्रुतां प्रतीक्षमाणो विजनमार्गे बद्धदृष्टिर्दूरवर्तिनि क्षेत्रे प्रत्येकाध्वगं निरीक्षमाणो विस्फारितलोचनश्चिरमास्त तापसः परिचितपूर्वोऽनुपमस्त्यागराजः। पर्यन्ते विदूरमालोक्य तन्वीमाकृतिं काञ्चिद्रोमाञ्चितकलेवरः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स बभूव। नचिरात्समुपेतां प्रेयसीं किञ्चिद्विवर्णवदनां वीक्ष्य हृदयं तापसस्य निशितशल्यविद्धमिवाभूत्। अप्राक्षीच्च तां विषादस्य कारणम्। साऽब्रवीदितः परं मम निभृतमागमनमत्रासाध्यं किल। विधवाश्रमे तस्मिन् परतन्त्रास्मि खलु। तथाप्यद्यावधि तत्र कस्यचिदधिकारिणोऽनुमत्या भवद्दर्शनसुखं कथमपि मया लब्धमासीत्। दीपावलीमहोत्सवकारणाद् विश्रान्तिकालो नचिराद् भविष्यतात्यध्यापका विद्यार्थिन्यश्च भूयिष्ठाः स्वस्वगेहं यास्यन्ति केभ्यश्चिद्दिनेभ्य ऊर्ध्वम्। इत्युक्तस्तया त्यागराजः प्रत्यवादीत्प्रियतमे कृतं चिन्तयाद्यैव हि निर्णेष्यावहे विवाहस्य मङ्गलतिथिम्। इति।

"परं गन्तव्यं मया श्वः स्वग्रामे बान्धवानामनुमतिप्राप्त्यै।" इति तस्या वचनमाकर्ण्य तापसस्य बाहुयुगलमवसन्नं पार्श्वयोश्चावलम्बितं निःसत्त्वमिव। नाद्यावधि पृष्टमासीत्तेन ग्रामस्य नाम प्रेयस्या न वा तस्यै निवेदितं तेन पूर्ववृत्तमात्मीयम्। अथ ससाध्वसमनुयुक्तं तेन। कच्चित्त बान्धवा अस्मदुद्वाहं निषेत्स्यन्तीति।

रामी। वल्लभ, गतभर्तृकास्मीति विदितमेव ते। अस्मद्ग्रामे विधवानां पुनर्विवाहो न सम्भवनीयः। अतो व्यतिकरेऽस्मिन् बान्धवानामनुमतिरवश्यमेव ग्राह्या मया।

त्यागराजः। कियान् कालोऽपेक्ष्यते भवत्या गतागतयोः ?

मासार्धेनात्र भवन्तमुपेष्यामि। इति प्रतिश्रुतवत्यां तस्यां मुहूर्तं तूष्णीमवातिष्ठेतामुभौ। वासरोऽप्यवसितप्रायोऽभूत्। प्रदोषस्य निष्प्रभत्वं गाढतरं समजनि।

तद्रात्रौ तटिन्या घर्घरशब्दं श्रावं श्रावं समारूढपर्यङ्कोऽपि चिराय न निद्रासुखमवाप्नोत्तापसः। भाव्यनिष्टसूचकविचारसङ्कुलमभूत्तच्चेतः। मरुतो मर्मरध्वनिः कुटीरस्य ह्रस्वद्वारकपाटाभ्यन्तरे सूसूकुर्वन् तदीयशोकावहचिन्तनस्य प्रतिध्वनिरिवाश्रावि। तमिस्रा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न रमणमभियियासुर्म्लानमुखमिन्दुं समुचितनीलवर्णाम्बरगुण्ठनेन सावधानं तनुयष्टिमाच्छादयितुमुपाक्रमत। अथ समयेऽस्मिंस्त्यागराजः शयितः पर्यङ्के विगतनिद्रो व्यचिन्तयत्। किं वदिष्यन्ति प्रेयस्या बान्धवाः ? अपि न निवर्त्स्यति सा मत्सविधम् ? ततो मूर्तिस्तदीया सहसा तच्चेतसो विलीनाऽभूत्। अकथयच्चात्मानम्। अनिवेद्य प्रियायै मत्प्रथमोद्वाहवार्ता तत्पाणिग्रहणमन्याय्यं खलु भवेत्। परित्यक्ता नवोढा जीवत्येवाद्य प्रायः। तथापि धर्मशास्त्रेष्वेकपत्नीव्रताग्रहो न प्रतिपाद्यते। परं गत्वा रय्याग्रामं पुनरवश्यमेव तद्विषये विधेया पृच्छेति निश्चयमकार्षीत् त्यागराजः। तदनु द्वित्रदिनोत्तरं राजदुर्गवर्तिनो देवतागारस्याङ्गने स प्राविशत्सायम्। आसीत्सन्ध्योपासनाऽप्यवसितप्राया। देवमन्दिरस्य घण्टानाद उच्चोच्चैरनवरतं शुश्रुवे। अथ गगनतलचरमार्धवर्तिनि दिनकरे समूह उपासकानामेकैकशो देवालयान्निश्चक्राम। त्यागराजः क्षणमात्रं प्राङ्गणे विलम्ब्य मार्गं यावत्प्रचलति तावत्तत्सम्मुखीभूतायाः कस्याश्चिदङ्गनाया दर्शनेन स्तिमितो भवति। सेयं पूर्वमपूर्वलावण्या युवतिरिदानीं तु मध्यवयस्कापि सौष्ठवपुष्टाङ्गी चारुवदनेन्दिरासीत्। तमेनं संवीक्षमाणायास्तस्या जामातरममन्दानन्दपूरेण परिप्लावितं हृदयमभूत्। दृष्टिर्हर्षबाष्पजडाऽभूत्। किमिदं स्वप्नोऽनुभूयते मयेति मन्वाना दीर्घतरं निशश्वास सा। भिया विस्मयेन कुतहलेन गृहीतं हठादन्तरङ्गमेतस्याः। जामातरं संबोधयन्ती "किं भवाननुपमः ?" इत्यभ्यधादश्रद्दधानेव स्वनेत्रयुग्मम्। जामाता निरुत्तरः स्थितवान् क्षणम्। "किमुत कोऽप्यन्यो वा महाभागः ?" इत्यपृच्छत्सा पुनः सन्देहात्। अभिज्ञातोऽस्मि श्रीमत्या सम्यगित्यस्फुटं प्रत्यभाषि ससम्भ्रमं साम्प्रतिकेन त्यागराजेन परिचितपूर्वेणानुपमेन। ततश्चापृच्छद् "अपि कुशलं श्रीमत्याः पितृदेवानाम् ?" इति। "दिवं गतास्ते पञ्चवर्षेभ्यः प्राग्" इतीन्दिरयाभाणि। अथ तदीयकन्यापि प्रायः कालवशं गता स्यादिति बलवदाशासानो विनता-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ननः क्षणं जोषमस्थात्पुनस्तापसः। "अपि वत्सा श्रीमत्या...." इत्यर्धसमाप्त एव वचने स व्यरमत्।

इं। चिरादतिक्रान्तमुग्धावस्थातिशायितलावण्यसम्पन्ना सम्प्राप्ता विकसितकुसुममिवोत्फुल्लयौवनदशां शोभतेतरां मे नन्दिनी। कुतः समायाता भवन्तः?

इति पृष्टो गृहीतनामान्तरोऽब्रवीदनुपमः। पुण्यपुरोपान्तवर्तिनः खड्कीनाम्नः प्रदेशादिति। अथ निशम्य नाम पुरस्य परमविस्मयसरणिमारुक्षत्सा। "अपि प्राक्तनहस्तलिखिततालपत्रेषु नित्यं व्यापृताः स्थ पूर्ववदेवे"ति तत्तादात्म्यं परीक्षितुमिच्छन्ती पप्रच्छेन्दिरा। तथेति तेनोक्ते व्यजानात्सा सद्यो यत्पुरुषे यस्मिन् निजात्मजेदानीं निबद्धानुरागास्ति तेनैवानुपमेनं संप्रति गृहीतत्यागराजनाम्ना ध्रुवं भाव्यमिति। अयं च पथिकः स एव येन परित्यक्तासीन्नातिक्रान्तशैशवा नवोढा मीराष्टदशाब्दतः पूर्वमिति। अभिज्ञानेनानेन परमानन्दतुन्दिलं समभूत्तदीयान्तरङ्गम्। अतिशयितप्रहर्षेण रोमाञ्चितगात्रयष्टेस्तस्या हर्षाश्रुपूरेण परिप्लावितं लोचनयुग्मम्। तथापि स्वान्तर्गतविचिन्तनस्येङ्गितलेशमपि तस्मै नावबोधयन्ती वत्साजामातरौ परस्परपारमार्थिकतादात्म्याज्ञौ अकल्पितविस्मयप्रहृष्टौ कारयिष्य इति झटिति निश्चित्याब्रवीदिन्दिरा। "अतिवाहितः कल्पायमानोऽयमेतावान्समयो भवन्तं प्रतीक्षमाणाया मीरायाः। कच्चिन्नासीत्क्षणमपि वर्षेषु व्यतीतेषु सकृदपि तावदस्मानवेक्षितुं मनस्यभिलाषो भवताम्" इति। निरुत्तरोऽनुपमः स्थितवान्, शुष्ककण्ठी मर्मस्पृशानुतापेन परिविद्धो हृदये। निजानुचिताशाखण्डनवैक्लव्येन नितान्तलज्जितो नताननोऽवतस्थे। वत्सामुद्दिश्य यथा यथा सा व्याहरत तथा तथाभूदनुपमो निश्चेष्टः स्तिमितश्च। पूर्वं यस्याः स पाणिमगृह्णात्सा मुग्धेदानीं क्षणमात्रं तत्स्मृतिसरणिमारूढासीत्। मूर्तिश्चान्यस्यास्तन्मानसचित्रफलकात्तिरोऽभूत्। यास्या-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वस्तावत्सदनं सत्वरमित्युक्त इन्दिरया किञ्चिद्दोलायमानमनाः सोऽब्रवीत् ।

अ। कस्यचिज्जनस्य गृहे स्थापितां पेटिकामानेतुं गन्तव्यं मयादौ। गम्यतां श्रीमत्या तावत्पूर्वम् आयास्यामि पश्चात्।

"परं मीराया अवितर्कितप्रहर्षोद्रेकस्य विलम्बो मा भूत्" इति प्रबोधितेन स्खलितवाचाऽनुपमेन कथमपि प्रत्युक्तम्। "भगवति ! अपात्रे प्रेमानुबन्धोऽयं निहितो भवत्या किल" इति निगद्य सगद्गदमङ्गुलीर्व्यावर्तयत् पुनः पुनः ससंभ्रमम् ।

मैवं मैवमित्याश्वासयन्ती रथ्याग्राममार्गेण प्रत्यचलदिन्दिरा जवेन ।

अथ निजालयस्य प्राङ्गणं प्रविष्टमात्रायां तस्यां मीराऽभ्यधात् सविस्मयम् "अम्ब ! कथमियत्सत्वरं प्रत्यागतासि ?"

इं। वत्से ! श्रुतं किञ्चिद्वृत्तं मया ।

मी। किमुक्तं पुरोहितैः ? कच्चिदनुमन्यते तैः पुनर्विवाहो मे ।

इं। देवागारं प्राप्तया मयावलोकितो द्वारि कश्चित्सुहृदनुपमस्य। सर्ववृत्तं तद्विषयं जानाति महाभागोऽयम्। भोजनाय निमन्त्रितश्च मयासौ। नचिरादागच्छत्येवात्र।

मीरा। अथ..अथ..जीवत्यद्यापि....

इं। नैतत्कथितं तेन । वत्से ! अलं चिन्तया। नचिरात्सर्वमेव नौ विदितं भविष्यति ।

मी। कथं गच्छेयं खड्कीपुरम्। अयि मातः सन्देहपिशाचाभिभता विगतप्राय णास्मि खलु ।

इं। वत्से ! समाश्वसिहि समाश्वसिहि। सर्वथापि शुभमेव भविता। एहि तावत् किञ्चिन्मिष्टान्नं प्रसाध्यम्। अनुपमस्य सुहृच्छुभवार्तासुखेन पूरयिष्यति हृदयमावयोः ।

इत्थमुक्त्वा प्रसन्नानना प्रसूर्मीरामाश्लिष्य गाढं तां महान-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समनैषीत्। अत्रान्तरे देवमन्दिराद् बहिर्विलम्ब्य किञ्चिदनुपमो रथ्याग्रामं प्रति वव्राज। अष्टादशवर्षेषु व्यतीतेषु न किञ्चिदपि परिवर्तनं तद्दृष्टिगोचरतां न्यपतत्। तान्येव क्षेत्राणि यथापूर्वं, तदेव पतत्रिणां विरुतं, त एव यथादौ शुष्कतृणराशय एकपार्श्वप्रवणाः। कर्कशस्वरं टिट्टवीविशेषाण्डजानां शृण्वतोऽस्य स्मृतिसरणिं समारुक्षत्पूर्ववृत्तमात्मनः। शनैःशनैस्तु तिरोऽभूद् भूतकालः। वर्तमानकाल एव तच्चेतसि दृढमूलः स्थितः। ततश्च प्रतिपत्तिमूढ इव किं सुप्तोऽस्मि किं जागर्मि वा? किं कुर्याम्? इत्यनिश्चितचेता विजनं ग्राममासादयत्। अदूरादिन्दिराया गृहस्य धूमनालिकोद्गीर्णधूमनिकरमीक्षमाणस्यास्य प्रादुरासीद् वेपथुस्तदीयदेहे। आरूढानेकतर्कस्यास्य व्याकुलताम-वर्णनीयामुपजगाम हृदयम्। व्यचिन्तयच्चासौ। हन्त! अष्टादश-वत्सरेभ्यः प्राङ् नवोढां सजीवां भूमौ निखातवानहम्। तत्सविधे पुनर्गमनेन प्रेयसी मे रामी परित्याज्या स्यादिति। चिन्तेयं निर्मर्यादैव प्रवृद्धिमारूढा तं चिक्लेशतराम्। पर्यन्ते शिलायामेकस्यामुपविश्य विटपिनश्छिन्नशेष इव स्तिमितोऽवतस्थे। नैकघटिका व्यतीताः। प्रत्यासन्ना निशीथिनी। समाधेर्निःशब्दतयेव समावृतोऽभूद् ग्रामोऽयम्। सूचीभेद्यतमसा द्विगुणीभूतानुतापतः शून्यदृष्टिरसह्याधिमन्वभवद्वराकोऽयम्। तदीयशोकाग्निर्नैराश्येनेव संवर्धितोऽदन्दह्यत तद् बाह्यकरणम्। सर्वतो दिशः शून्यतां गताः। निखिलं गगनन्निष्प्रभमेव बभौ। आरूढवार्धकप्रायं सहसाऽऽत्मानं सङ्कल्पयामास। तदनु कृतमतिरिवोत्थाय झटिति ग्रामगामिनो मार्गान्निवृत्य तमिस्रायां निममज्ज।

* * * *

सप्ताहद्वयोत्तरमिन्दिरया सह मीरा खड्कीप्रदेशसमीपवर्तिन्यास्तटिन्यास्तटे यथाप्रतिश्रुतमुपातिष्ठत। सुतरामवदीर्णहृदयाऽपि सन्देहात्कृतनिश्चयासीन्मीरेदानीम्। "अम्ब! किं नाम मया तस्मै निवेदनीयम्"

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इत्यविदितवल्लभतादात्म्या न्यगददसकृन्मीरा। "वत्से! कृतं चिन्तया। सर्वमेतन्मयि विसृज्य विश्रब्धं तिष्ठ। स्वयमेव तस्मै निवेदयिष्यामि" इतीन्दिरा मीरामाश्वासयन्मृदुस्वरेण। अथ दिवसोऽप्यवसितप्रायोऽभूत्। सायन्तनचित्रविचित्रकुटिलच्छायाभिः सर्वत्र किमपि रुक्षवैलक्षण्यं प्रसृतमासीत्। सङ्केतस्थाने प्रतीक्षमाणयोर्मातृदुहित्रोर्दीर्घः कालो व्यतीतः। निर्झरिणी सघर्घरशब्दं पादयोस्तयोरसुस्रुवद् विमनस्केव। क्षेत्रेषु चरतो गोव्रजस्य ग्रीवावलम्बमानघण्टानादो न्यूनीभूय श्रुतिपथमतीतः क्रमेण। प्रत्यासन्नायां निशायां वेपमानगात्रयष्टिर्मीरा शून्यहृदयेव तस्थौ। "वत्से! कच्चिज्जानासि तस्य...तव प्रियकरस्य वसतिस्थानम्।" इति मन्दस्वरेण तया पृष्टा मीराङ्गुल्यैव तन्निर्दिदेश। उभे च सद्यस्तापसस्य विविक्तावासमुपजग्मतुः। मलिनवातायनो रजःशुष्कतृणावृतः कुटीरप्रवेशो निरानन्दता नितरामेधामास। शैवलाच्छादिताभ्यो भित्तिभ्य उदभूत् क्लिन्नताशैत्यम्। कुटीरस्यान्तरत एव द्वारमर्गलीकृतमासीदिति कीलकेनान्तर्गतशृङ्खलामुद्धृत्य सलीलं द्वारकपाटमुदघाटयदिन्दिरा। प्राविशच्च सह दुहित्रा मुखप्रकोष्ठम्। कुटीरे सर्वतः परिभवनैराश्यात्ययशोकादिभावा व्यक्तीभूता आसन्। शून्यशून्यतैवावर्तिष्ट सर्वत्र। भग्नाशया समारूढा विषादस्य कोटिमिन्दिरा कुटीरान्निर्ययौ। मीरा तु ततो निर्गन्तुमनिच्छन्तीव मुहूर्तमलिन्दभूमौ चिरायिता जोषं स्थितवती। शोकातिशयेनान्तर्दन्दह्यमानहृदया बहिः शून्यकुट्याः स्तम्भितवाक् किञ्चित्कालमिन्दिरा तस्थौ।

मीरावदत्। मातः क्षेमायैव मे प्रायः सर्वमिदं संवृत्तं स्यात्। पूर्वचन्नात्मानमिदानीं गतभर्तृकमाकलयामि। दुराशामृगतृष्णिकयेवासौ तपस्वी त्यागराजो निर्लज्जया निर्लक्षणया मया प्रतारितः किल। तथापि स्वकथानिवेदनान्निवारितास्मीति शुभमेव" इति। निशम्य तस्या वचनमधिकाधिकमवदीर्णहृदयेन्दिरा व्यचिन्तयत्। जन्मान्तरोपार्जितस्य दुष्कृतस्य मे किमेष परिणामो यन्मन्मनोरथनैष्फल्यादनर्थपरम्परा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समुदभूदिति। हन्त कन्याजामातरौ विस्मापयितुमिच्छन्त्यात्यन्तविपरीतमेव व्यधायि मया। साहमेवंविधा पापकारिणी निष्फलजीविता गर्हणीया यया स्वात्मजाया निर्मूलमुन्मूलितः सुखद्रुमः। इति चिन्तयन्त्या इन्दिराया असह्यानुतापाग्निना भस्मीकृतं हृदयं वागतीततामभजत्।

अथ यावत्कुटीरान्निर्गच्छन्ती मीरा प्रवेशद्वारं पिधातुं यतते तावत् कपाटस्य पृष्ठे विलीनं छत्रमेकं तापसस्य नामाङ्कितं भूमौ सहसा न्यपतत्। सपदि तदुद्धृत्याभ्यधान्मीरा "अम्ब! अम्ब! पश्य! हन्त तस्येदं छत्रम्। तत्स्मारकार्थं रक्षिष्याम्येतत्।" इत्युक्त्वा च्छत्रं सादरं सबहुमानञ्चादाय बद्धमौनां प्रसूमुपेत्य समं तया प्राचलत्प्रदोषे। अथ कतिपयपदानि प्रचलन्तीभ्यां विजने मार्गे प्रदोषसमये दूरादेव ताभ्यामवालोकि कस्यचित्पुरुषस्याकृति र्नचिराच्च तापसस्तयोः पुरतस्तस्थौ। तमालोक्य मीरा रोमहर्षात्कम्पमाना विलुप्तवागिव बभूव। तापसस्तु स्वप्नगतदृश्यं पश्यन्निव भूलग्नस्तस्थौ। प्रहृष्टेन्दिरा करौ तयोरादाय साशीर्वादवचोभि र्वत्साजामातरावभिनन्द्य च तौ संयोजयामास। ततश्च सगद्गदं न्यगदत्, अहो! अनुपम! अमूल्यं खलु भवदीयं च्छत्रमिदं येन विंशतिवर्षेषु विश्लिष्टया भार्यया पुनः संयोजिता भवन्तः सर्वं च सुखावहं पर्यवस्यतेति हन्त तद्विना मोघोऽभविष्यन्मनोरथो मे।

(१८४ पृष्ठतोऽनुवर्तते)

तदेव चास्य चिह्नम्। अपरञ्चेदसस्माकं मतस्य चिह्नमासीत्—यद्वेदाभिहितेषु पदार्थेषु विश्वासः। सर्वोऽपि मानवः, द्विजस्तदितरो वा, पुरा वेदेषु श्रद्दधानोऽवर्तत। यदा कश्चन कस्यचन वाक्यं सादरं न गृह्णाति, तदा स वदति स्म 'किमिदं वेदवाक्यम्' इति। अयञ्चाभाणकः पुरातनो वेदवाक्येषु निरतिशयं गौरवमाविष्करोति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अस्मिन् विंशतितमेऽपि शतके आभाणकोऽयमस्ति, परं तदनुसारेण न कोऽपि समाचरति। पुरैकैकेनापि वैदिकं पन्थानमातस्थुषा उच्चावचा वैदिकाः पदार्था अङ्गीक्रियन्ते स्म, तदनुसारेण च तेऽनुष्ठीयन्ते स्म। इदमेव चिह्नमस्माकं मतस्यासीत्। अत एव चेदं वैदिकं मतमिति व्यपदेष्टुं शक्यते। अस्मन्मतमिव ग्रीक (Greece) देशस्य मतमपि प्राचीनमित्यैतिहासिका अभिवदन्ति। परं तत्साम्प्रतं नामावशेषितम्। अस्मन्मतन्तु साम्प्रतमपि कुहचित्कोणे वर्तत एव। परं तदपि लोपयितुम्—

'का मे गतिरिति पृच्छति चरमश्वासेऽपि यस्स्वार्थम्।
तस्य जनस्यापि कृते पापाः पापानि कुर्वन्ति॥'

इति रीत्या जनाश्चेष्टन्ते। नायं तेषां मनोरथस्सिद्धिमवाप्नुयादिति विश्वसिमः। यदेव हि सर्वं जगद्व्याप्योन्नतं पदमधिरुह्यावर्तत, यस्य चादिरेव न दृश्यते तस्यान्तं विधातुं न प्रभुर्विधातापि। 'विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसाम्प्रतम्' इति हि न्यायः।

होलाकाधिकरणे 'अपि वा सर्वधर्मस्स्यात्तन्न्यायत्वाद्विधानस्य' इति सूत्रयन् भगवाञ्जैमिनिः सर्वासां स्मृतीनां शिष्टैश्च परिगृहीतानां सर्वेषामाचाराणां सर्वधर्मत्वं व्यवस्थापयति। तेषु तेषु देशेषु सन्तु नाम पार्थक्येनाचाराः, ते यथासम्भवं सर्वैरेवानुष्ठेयाः। न खलु तत्र तत्तत्प्रान्तीयत्वं प्राच्यत्वमुदीच्यत्वं वा निवेश्य तेषां व्यवस्थितविषयत्वं कल्पनीयम्। आचारात्स्मृतिं स्मृतेश्च श्रुतिं परिकल्प्य तेषां प्रामाण्यमिति मीमांसकानां सरणिः। तत्र कल्प्यमानानां स्मृतीनां श्रुतीनां वा 'तदिदं कर्तव्यम्' इत्येवाकारः, न तु 'तदिदं प्राच्यैरेव कर्तव्यम्' इत्येवंरूपः। अभ्युदयप्राप्तिफलकत्वेन याः क्रियाः भगवता वेदेन समुपदिष्टाः, मन्वादिभिश्च स्मृतिषु निबद्धाः, शिष्टैश्चाचरिताः, तासु को नाम भेदावसरः—'अनेनैवेदमनुष्ठेयम्, नानेने'ति। एतेन स्पष्टमिदमभ्यूहितुं शक्यते—यत्सर्वमपीदं जगद् वैदिकेऽस्मन्मते परस्मिन् ब्रह्मजीव ओतं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रोतञ्च वर्तत इति । सक्तुमुष्टिवद्विशरणं न लोकानां कल्याणायेति प्राचामियान् प्रयासः । तदिदं साम्प्रतं पुरातत्त्वान्वेषणविभागेन तत्र तत्र भूखननद्वारा लभ्यमानैरस्मन्मतपरिचायकैर्वस्तुरत्नैर्निर्णीतप्रायमेव । ईजिप्ट् (Egypt) देशे क्रिस्तोर्बहुभ्यो वर्षेभ्यः पूर्वं लिखितं ताम्रशासनपत्रं भूखननावसरे लब्धम्, यस्मिंश्च द्वयो राज्ञोस्समयबन्धो लिखितः, यत्र च मित्रावरुणौ साक्षितया निर्दिष्टौ । एतेन किं नावगम्यते—तदानीं तेष्वपि देशेषु वेदमार्गः प्रचलति स्मेति ? आफ्रिकायाः समीपे मडगास्कर (Madagascar) इति नाम्ना प्रथिते द्वीपे विद्यमानानां नगराणां नामानि प्रायशस्संस्कृतमयानि, तत्रापि देवानां नामानि । आमेरिकाया मेक्सिकोप्रदेशे बहूनां गजाननविग्रहाणामुपलम्भः, शारदनवरात्रोत्सवानुष्ठानञ्च तत्रत्यानामस्मत्सभ्यतावलम्बित्वमेवावद्योतयतः । आस्टेक्स् (Aztecs) प्रान्तस्यैव भूषणायमाने पेरु (Peru) पदवाच्ये देशे जनास्सम्प्रत्यप्यादित्यमेवोपासते । आदित्यसमर्चनम् आदित्यहृदयपठनञ्च तेषां मुख्यं कृत्यम् । विषुवदिने रथसप्तम्याञ्च तत्र महानुत्सवः प्रचलति । तत्रत्या जना इन्कास् (Incas)-शब्देन व्यपदिश्यन्ते । इन इति भास्करस्य नाम । ते इनं पूजयन्त्यतस्तन्नाम्ना तेषां व्यवहारः । ईस्ट् इण्डीस् (East Indies) द्वीपेषु जावाप्रभृतिषु पुरातत्त्वानि बहुलमुपलभ्यन्ते । एवमादिभिः प्रमाणैरिदं निर्णेतुं शक्यम्—यदस्माकं वैदिकः पन्था जगति सर्वत्र व्याप्तः शोभमानोऽवर्तत । लोककल्याणैकतानमतयो महर्षयः स्वीयानितरसाधारण्या शक्त्या तांस्तान् वैदिकानलौकिकान् पदार्थानाविष्कुर्वन्तो वैदिकं मतं परिरक्षन्त आसन् । सर्वत्रास्माकमेव मतं तदा प्रसृतमभवत् । देशश्चैक एव पर्यगण्यत । अस्मदीया एव तत्र तत्र न्यवसन् । सर्वेऽपि 'वसुधैव कुटुम्बकम्' इति निरचिन्वन् । कस्याश्चन यवनिकाया मध्ये कमलवच्छिद्रं विधाय दीपञ्चैकं प्रज्वाल्य यदि भित्तिं पश्यामः, तर्हि तत्र कमलवदेव प्रकाशं विलोकयामः, न तु समग्रं प्रकाशम् । [क्रमशः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

TECHNICAL TERMS AND TECHNIQUE OF

Sanskrit Grammar

A Critical, Comparative and Historical Study

BY

Kshitish Chandra Chatterji, Sastri, M. A., D. Litt.

Lecturer, Calcutta University;
Formerly Editor, Calcutta Oriental Journal,
Surabharati, Oriental Literary Digest, etc., etc.

The Modern Review (December, 1950) **says:**

"Honour to whom honour is due. Dr. Chatterji has broken entirely new ground in his **Technical Terms and Technique of Sanskrit Grammar** and demonstrated clearly that Bengal, though fallen on evil days, can even now produce works on Indology that invite and bear comparison with the best work produced in any part of the world. Who ever thought that all the technical terms admitted of satisfactory explanation and who ever imagined that a work on grammatical terminology could be made as delightful as a novel? In this volume of nearly 350 pages the technical terms of Sanskrit grammar from the Brahmanas, Nirukta, Pratishakhyas, Panini, Katyayana, Patanjali, down to Prayogaratnamala and Harinamamrita have been considered critically and historically in all their bearings and apparently arbitrary technical terms like *gha*, *bha*, *lat*, *lit*, etc., have been traced to their sources. **We have nothing but admiration for this masterpiece of scholarship and warmly recommend it to our readers.**"

Price Rupees Ten only. *Foreign Rs. 12/-*

Postage Extra.

VISVANATH CHATTERJI

81, Shyambazar Street,

CALCUTTA—4

Phone: B. B. 4049

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

AMNJUSHA (Sanskrit Monthly Magazine)
Registered No. C. 3278

CANDRA VYAKARANA

Part I (Chapters 1—3).

Critically edited with Vṛtti, corresponding rules of Pāṇini, Bhoja and others, Introduction etc.

By

KSHITISH CHANDRA CHATTERJI, SASTRI, M. A., D. LITT.

Lecturer, Calcutta University ;
Formerly Editor, Calcutta Oriental Journal, Surabharati, Oriental Literary Digest, etc., etc.

Price Rupees Twelve only. *Foreign Rs. 15/-*

A No Bhadriyam

Hymn 1. 89 of the Rigveda with the critically edited commentaries of (1) Veṅkaṭamādhava (2) Skandasvāmin (3) Mahīdhara (4) Sāyaṇa (5) Kās'yapa Kṣitīsacandra unfolding the significance of each word and expression, and extracts from the commentaries of Uvaṭa, Haradatta and others, English translations, critical and explanatory notes, comparisons from other languages etc. etc. Price 2/8/-

MAHABHASHYA

(First Ahnika)

Edited with

English translation, exhaustive critical and explanatory notes, extracts from other commentaries, full Sanskrit explanation of the Vedic mantras etc. etc.

Rupees Five only.

VISVANATH CHATTERJI

81, Shyambazar Street, Calcutta—4

Printed and published by Sri Jyotish Chandra Chatterjee, B. A. from 81, Shyambazar Street, Calcutta—4. Printed at the Elm Press 63, Beadon Street, Calcutta—6.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Approved by the Directors of Public Instruction, Madras, Bihar and Mysore.

श्रीशिवः शरणम्

सप्तम-वर्षे] June, 1953 [१० संख्या

मञ्जूषा

सम्पादकः—श्रीक्षितीशचन्द्र-चट्टोपाध्यायः

Special Articles

Technical terms of Sanskrit Grammar—a comparative study.
Rasamañjari.
Rabindranātha's short story.

A boon to students of languages is **Greek Proverbs** in Roman character with their Latin and English analogues and parallel proverbs and sayings from Sanskrit, Marathi and Bengali. All the grammatical forms have been clearly explained and the student of Sanskrit will not only acquire some knowledge of the glorious Greek language but will be struck with the resemblance it bears to Sanskrit. Some of the forms have been explained over and over again for the benefit of beginners.

Price Rupees Two only.

Office : 81, Shyambazar Street, Calcutta—4
Annual Subscription : Rupees Six only.
This number—Rupees Two.
Foreign—Rupees Nine

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मञ्जूषाया नियमावली

मञ्जूषाया वार्षिकं मूल्यं रूपकषट्कम्। ग्राहकैर्वर्षस्य प्रथमसंख्यात एव ग्रहीतव्यम्।

२। प्रतिसौरमासं दशमदिने (आङ्लमासस्य चतुर्विंशे दिवसे) 81, Shyambazar Street, Calcutta 4 इत्यतो मञ्जूषा प्रकाश्यते।

३। मञ्जूषायास्तावद् भागत्रितयं वर्तते। तत्र प्रथमे भागे देवभाषां प्रविविक्षूणां कृते सरलाः श्लोकाः, आभाणकाः, कथाः, आख्यानानि च सन्निवेश्यन्ते, द्वितीये भागे दार्शनिकाः प्रबन्धाः, व्याकरणालङ्कारादीनां विमर्शाः, पाठविचारः, जिज्ञासा मीमांसा, पुस्तकपरिचयादयश्च प्रकाश्यन्ते ; तृतीये भागे सानुवादाः पारसीकाः गाथाः, ससंस्कृतानुवादं धम्मपदम्, महाभाष्यम्, समूला भाषावृत्त्यर्थविवृतिर्मुद्रयन्ते।

काव्यालङ्कारसूत्रवृत्तिः (वामनविरचिता ५।१)

अभिनवविस्तृतटीकोपेता Rs. 2/-

Convocation Address in Ancient India -12-

स्त्रीप्रशंसा—The original slokas of Varāhamihira with a splendid Sanskrit commentary. 1/-

Popular Etymology— Re. 1/-

Homer's Iliad, Book I, Edited with Literal English translation, Sanskrit parallels for students of Sanskrit.

By Dr. Kshitish Chandra Chatterji.

In the Press.

শব্দকথা—সরস সরল ভাষাতত্ত্ব— ২৲

ঊষার আলো—ছোট ছোট হাসির গল্পের সমষ্টি— ৸৹

নক্ষত্রমালা—ধর্মবিষয়ক শ্লোক ও অনুবাদ— ।/৹

Several complete sets of Vols. IV, V and VI of the Manjusha are still available for Rs. 6/8/- per set and only a few sets of Vols. I-III are available at Rs. 5/12/- for the lot.

श्रीविश्वनाथ-चट्टोपाध्यायः।

८१ श्यामबाजार ष्ट्रीट्, कलिकाता ४

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शरणं तरुणेन्दुशेखरः शरणं मे गिरिराजकन्यका ।
शरणं पुनरेव तावुभौ शरणं नान्यदुपैमि दैवतम् ।।

मञ्जूषा

June, 1953 } १८७५-शकीयाषाढस्य ७म-वर्षस्य दशमी संख्या { Vol. VII No. 10

श्रीमच्छङ्कराचार्यविरचिता

जिह्वाप्रार्थना

मत्प्रियसखि मज्जिह्वे मय्यनुकम्पां कुरुष्व नौमि त्वाम् ।
अन्यापवादरहितां जप संततमों नमः शिवायेति ।।१।।
वाणीगुणानुनिलये त्वां वन्दे मा कुरुष्व परनिन्दाम् ।
त्यज सकललोकवार्तां जप संततमों नमः शिवायेति ।।२।।
कट्वम्ललवणतिक्तस्वादुकषायादिसर्वरसवाञ्छाम् ।
जिह्वे विहाय भक्त्या जप संततमों नमः शिवायेति ।।३।।
मम चित्तकामिनीनां नवयौवनपुण्यरङ्गलक्ष्मीणाम् ।
अपहाय सर्वदुरितं जप संततमों नमः शिवायेति ।।४।।
रसने रचितोऽयमञ्जलिस्ते परनिन्दापरुषैरलं वचोभिः ।
दुरितापहमों नमः शिवायेत्यमुमादिप्रणवं भजस्व मन्त्रम् ।।५।।

इति श्रीमच्छङ्कराचार्यविरचिता जिह्वाप्रार्थना समाप्ता ।।

पाटणकरान्ववायश्रीमत्कृष्णतनूजुषा ।
रघुनाथेन लिखिता राजापुरनिवासिना ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आभाणकमाला

Man proposes, God disposes.

Latin. Homo proponit, Deus disponit.

Franch. L' homme propose, le ciel dispose.

German. Der Mensch denkt, Gott lenkt.

"अन्यन्मानुषेण विभाव्यते, अन्यदेव च प्रस्तूयते कुटिलप्रवृत्तिना दैवेन।"

"अन्यथैव विचिन्त्यन्ते पुरुषेण मनोरथाः।
दैवेनाहितसद्भावाः कर्मणां गतयोऽन्यथा ॥"
"अन्यथा चिन्तिता ह्यर्था नरैस्तात मनस्विभिः।
अन्यथैव प्रपद्यन्ते दवादिति मतिर्मम ॥"

महाभारत, द्रोण १०।५०

'मनोरथान् करोत्युच्चैर्जनो दैवहतानपि'

भागवतम्।

"यच्चिन्तितं तदिह दूरतरं प्रयाति
यच्चेतसा न गणितं तदिहाभ्युपैति।
प्रातर्भवामि वसुधाधिपचक्रवर्ती
सायं स एव विपिने जटिलस्तपस्वी ॥"

Gk. Kai ta doke:thent' ouk etelesthē,
To:n d'adoke:to:n poron heure theos.

That which we expected is not accomplished while for the unexpected God finds a way.

Kai—and. *ta*—neut. nom. pl. Skt. ता(नि). *doke:thenta*—1st aor. passive participle neut. nom. pl. of *dokeo:* to expect. *ouk*—not. *etelesthe:*—1st aor. passive 3. sing of *teleo:* I accomplish. In Greek the neuter plural agrees with a verb in the sing. *to:n*—gen. pl. of *to*, Skt. *tad*. *d'adoke:to:n* = *de* + *adoke:to:n*. *de*—and. *adoke:to:n*—*a* privative particle and *doke:to:n*—past

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

pass. participle of *dokeo:*. *poron*—means of passing a river, ford, ferry, then pathway, way, connected with Skt. पृ. *heure*—aor. 3 sing. of *heurisko:* to find out.

काशिकापाठविमर्शः

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

मतोः पूर्वमात् संज्ञायां स्त्रियाम् [पा० ६।१।२१९] इति सूत्रस्य काशिकायां दृश्यते—आदिति किम् ? इक्षुमती द्रुमवतीति। सर्वेष्वेव मुद्रिते पुस्तकेष्वयमेव पाठ उपलभ्यते। नद्यां मतुप् [४।२।८५] इति सूत्रस्य काशिकायां पुनः "इक्षुमती मती" इति पाठः सन्दृश्यते। उभयोरेव साधुत्वे 'द्रुमती'त्यपि नदीनाम, 'द्रुमवती'त्यपि नदीनामेति स्वीकरणीयम्। द्रुमवतीत्यस्य प्रामादिकत्वे द्रुमतीत्येव नदीनामेति सिध्यति। महाभाष्यस्य पर्यालोचनेन द्रुमवतीत्यस्याप्रामाणिकत्वं विस्पष्टमेव प्रतीयते। तथाहि—ओरञ् [४।२।७१] इति सूत्रस्य भाष्ये दृश्यते—ओरञ् विधेर्नद्यां मतुब् भवति विप्रतिषेधेन। ओरञोऽवकाशः। कन्नतु कान्नतवम्। मतुपोऽवकाशः। उदुम्बरावती। मशकावती। इहोभयं प्राप्नोति। इक्षुमती। द्रुमती। मतुब् भवति विप्रतिषेधेन। इति। अत्र इक्षुमती द्रुमतीति भाष्यकृतामुदाहरणद्वयम्।

संज्ञायाम्। आसन्दीवदष्ठीवच्चक्रीवत्कक्षीवद्रुमण्वच्चर्मण्वती। [८।२।११-१२] इति सूत्रगतभाष्ये दृश्यते—किमयमेकयोग आहोस्विन्नाना योगौ ॥ किं चातः॥ यद्येकयोगः—अहीवती कपीवती। अत्र न प्राप्नोति। अथ नाना योगौ, इक्षुमती द्रुमती अत्रापि प्राप्नोति॥ यथेच्छसि तथास्तु। अस्तु तावदेकयोगः। कथम् अहीवती कपीवती? आचार्यप्रवृत्ति र्ज्ञापयति भवत्येवंजातीयकानां वत्वमिति यदयम् अन्तोऽवत्या ईवत्याः [६।१।२२०-२२१] इत्याह।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथवा पुनरस्तु नाना योगौ। ननु चोक्तम्—इक्षुमती द्रुमती अत्रापि प्राप्नोतीति। यवादिषु [८।२।९] पाठः करिष्यते।

इक्षुमती द्रुमतीत्यत्र वत्वापत्तिशङ्कैवानयोर्मत्वन्तत्वं प्रत्याययति, एवञ्च द्रुमवतीत्यपपाठ इति प्रतीयते। न खलु कारणविशेषमन्तरेण वैयाकरणधुरीणेन वामनेनाहोपुरुषिकामात्रेण प्राचीनमुदाहरणमन्यथाकृतमिति युक्तं कल्पयितुम्।

अलङ्कारविमर्शः

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

किरातार्जुनीय-महाकाव्यस्य चतुर्दशसर्गे वर्तते श्लोकः—

विविक्तवर्णाभरणा सुखश्रुतिः
प्रसादयन्ती हृदयान्यपि द्विषाम्।
प्रवर्तते नाकृतपुण्यकर्मणां
प्रसन्नगम्भीरपदा सरस्वती ॥३॥

इति। व्याख्यातं चेदं मल्लिनाथसूरिणा—

"विविक्ताः संयोगादिनानाश्लिष्टाः स्फुटोच्चारिताः वर्णा अक्षराण्याभरणानि यस्याः सा। अन्यत्र तु विविक्तानि शुद्धानि वर्णो रूपम्, आभरणानि च यस्याः सा। 'वर्णो द्विजादौ शुक्लादौ स्तुतौ वर्णं तु वाक्षरे' इत्युभयत्राप्यमरः। सुखा श्रुतिः श्रवणं यस्याः सा सुखश्रुतिः। श्राव्येत्यर्थः। अन्यत्र श्रूयते इति श्रुतिर्वाक्। सा सुखा यस्याः सा मञ्जुभाषिणीत्यर्थः। द्विषामपि हृदयानि प्रसादयन्ती, किं पुनः सुहृदाम् इति भावः। प्रसन्नानि वाचकानि गम्भीराण्यर्थगुरूणि च पदानि सुप्-तिङन्तरूपाणि यस्याः सा। अन्यत्र तु प्रसन्ना विमला गम्भीरपदाऽऽलसचरणा। सरस्वती वाक् स्त्रीरत्नं च। तथा चोक्तम्—'सरस्वती सरिद्भेदे गोवाग्देवतयोरपि स्त्रीरत्ने च', इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कृतं पुण्यकर्म यैस्तेषां न प्रवर्तते न प्रसरति, किन्तु सुकृतिनामेवेत्यर्थः। भवद्वाणी चैवंविधेति धन्यो भवानिति भावः। अत्र काचिन्नायिका वाग्देवता च प्रतीयते। तत्रादौ समासोक्तिरलङ्कारः। विशेषणमात्र-साम्येनाप्रस्तुतप्रतीतेः। अत एव न श्लेषः।'' इति।

अत्र 'स्त्रीरत्नं च। ''सरस्वती सरिद्भेदे स्त्री-वाग्देवतयोरपि'' इति भागः केनचिद्वाचकेन प्रक्षिप्त इति प्रतिभाति, स्त्रिया वाच्यत्वे समासोक्तेरेव मूले कुठारापातात्। विस्पष्टीकृतं चेदमाचार्येण शिशुपालवध-सर्वङ्कषायाम्। तत्र

आच्छादितायतदिगम्बरमुच्चकैर्गा-
माक्रम्य संस्थितमुदग्रविशालश्रृङ्गम्।
मूर्ध्नि स्फुरत्तुहिनदीधितिकोटिमेन-
मुद्वीक्ष्य को भुवि न विस्मयते नगेशम्॥ [४।१९]

इति श्लोकस्य व्याख्यायामुक्तम्—

आच्छादितान्यावृतानि आयतानि दीर्घाणि दिशोऽम्बरं खं च दिगेवाम्बरं वासो येन तम् अन्यत्र आच्छादितं वसितम्, आयतं दिगेवाम्बरं वासो येन तं तथोक्तम्। उच्चकैरुन्नतां गां भुव-माक्रम्य व्याप्य संस्थितम्। तथोदग्राण्युन्नतानि विशालानि च श्रृङ्गाणि शिखराणि यस्य तम्। अन्यत्रोदग्रे विशाले श्रृङ्गे विषाणे यस्य तम्। उच्चकैरुन्नतं गां वृषभमाक्रम्य अधिष्ठाय संस्थित-मित्यर्थः। 'श्रृङ्गं विषाणे शिखरे' इति, 'गौः स्वर्गे वृषभे रश्मौ वज्रे चन्द्रमसि स्मृतः। अर्जुनीनेत्रदिग्बाणभूवाग्वारिषु गौर्मता॥' इति च विश्वः। मूर्ध्नि शिखरे अन्यत्र शिरसि स्फुरन्ती तुहिनदीधितेरिन्दोः कोटिः रश्मिः कला च यस्य तमेनं नगेशं नगश्रेष्ठं रैवतकं कैलास-नायकमीश्वरं चोद्वीक्ष्य को न विस्मयते। सर्वोऽपि विस्मयत इत्यर्थः। नेयं तुल्ययोगिता प्रकृताप्रकृतविषये तदनुत्थानात्, नापि समासोक्तिः, तस्या विशेषणसाम्यजीवितत्वात्। नापि श्लेषः, उभयश्लेषे विशेष्य-श्लेषायोगात्। तस्मात् प्राकरणिकार्थमात्रपर्यवसिताभिधाव्यापारे-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

णापि शब्देनार्थान्तरधीकृद् ध्वनिरित्याहुः। तदुक्तं काव्यप्रकाशे [२।१४]—

अनेकार्थस्य शब्दस्य वाचकत्वे नियन्त्रिते।
संयोगाद्यैरवाच्यार्थधीकृद्व्यापृतिरञ्जनम्॥

इति।" इति।

पण्डितचरितम्

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

कस्य वा न विदिता वङ्गदेशान्तर्गतान्वर्थनामा भट्टपल्ली नगरी। इदानीमप्यत्र परःसहस्रा बृहस्पतिप्रतिमा विद्वद्वर्या निवसन्ति। अत्र च केभ्यश्चिद्वर्षेभ्यः पूर्वं महामहोपाध्यायपदभूषणः शिवचन्द्रसार्वभौमो नाम नैयायिकानामग्रणीर्बहूंश्छात्रानध्यापयन् स्थितः। विद्वद्वृन्दवरणीयोऽयं पण्डितोत्तंस एकदा धनिकधुरीणस्य कस्यचन सभामुपगतः। तं दृष्ट्वा सर्वे ससम्भ्रममासनात् समुत्थाय तस्मै प्रणाममकुर्वन्। ततश्च भूस्वामिप्रवरेण महाराजेनोक्तम्, आर्य, अद्य भगवतः पादरजसा पूतं मे सदनम्। धन्योऽस्मि। बहूनि शास्त्राणि परिशीलितानि भवद्भिः, कृपया ज्ञानकथोपदेशेनास्माकमान्तरं तमो नाशयितुमर्हति भवानिति। तच्छ्रुत्वा पण्डितवयणोक्तम्, महाराज, विपुलाध्ययनेन संशया विवर्धन्ते। यथा यथाधीयन्ते मया शास्त्राणि तथा तथा नवनवाः संशयाः समुद्भवन्ति चेतसीति। शार्मण्यकविप्रवरेण गेटमहोदयेनाप्युक्तम्—

Eigentlich weiss man nur wenn man wenig weiss; mit dem Wissen wächst der Zweifel.

यदा स्वल्पं विजानीमस्तदैव सम्यग् विजानीमः ज्ञानेन साकं सन्देहोऽपि वृद्धिमुपैति। इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पृच्छा

[श्रीरमाप्रसाद-मुखोपाध्याय आयुर्वेदाचार्यः]

अनुष्टुभः **प्रथमं सूत्रम्**—"पञ्चमं **लघु** सर्वत्र सप्तमं **द्विचतुर्थयोः**।
गुरु षष्ठं विजानीयाच्छेषेष्व**नियमो** मतः ॥

" **द्वितीयं सूत्रम्**—"क्वचित् **पादे च विषमे** पञ्चमाद्यास्त्रयोऽपि लाः।
ते चापि **सर्वे गाः श्लोके** क्वचित् केवलपञ्चमः ॥"

'विषमे पादे पञ्चमाद्यास्त्रयोऽपि लाः' यथा,—

(१) "सन्तानार्थाय **विधये** स्वभुजादवतारिता" (रघु १।३४)

(२) "सुपर्वाणः **सुमनस**स्त्रिदिवेशा दिवौकसः" (अमोरकोषः)

(३) "वार्यमाणः **सुबहुशो** मारीचेन स रावणः" (रा. आदि १।५०)

'ते चापि सर्वे गाः श्लोके' यथा,—

(१) "तथाहि **सर्वे तस्यासन्** परार्थैकफला गुणाः" (रघु १।२९)

(२) "फलानु**मेयाः प्रारम्भाः** संस्काराः प्राक्तना इव" (रघु १।२०)

(३) "जहार **भार्यां रामस्य** गृध्रं हत्वा जटायुषम्" (रा.आदि १।५३)

'क्वचित् केवलपञ्चमः' यथा,—

(१) "स्वरव्ययं **स्वर्ग**नाकत्रिदिवत्रिदशालयाः" (अमरकोषः)

(२) "वृन्दारका **दैव**तानि पुंसि वा देवताः स्त्रियाम्" (अमरकोषः)

(३) तदन्वये **शुद्धि**मति प्रसूतः शुद्धिमत्तरः" (रघु १।१२)

(४) "विनायके **विघ्न**राजद्वैमातुरगणाधिपाः" (अमरकोषः)।

(५) "कश्चुरादिः **किस्तु** वा गः ऋादिर्गिः प्वादिरप्यपूः।....
णः फणादि**स्त**स्त्वदन्तो दस्तनादिर्ध्रुधादिकः" ॥
(वोपदेवकृतकविकल्पद्रुमः)

(६) "विरूपिता **शूर्प**णखा राक्षसी कामरूपिणी" (रा. आदि १।४६)

(१) प्रमाणिका (जरौ लगौ), (२) नाराचिका (तरौ लगौ) (३) कमल (नसौ लगौ)

आसु तिसृष्वष्टाक्षरास्वनुष्टुप्सु पूर्वोल्लिखितं प्रथमं सूत्रं लगति, इतराः पुनरनुष्टुभोऽष्टाक्षरा वा वृत्तयस्तत्सूत्रं नानुसरन्ति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(४) (५) (६) (७) (८) (९) (१०)
चित्रपदा, माणवक, विद्युन्माला, समानिका, गजगति, हंसरुत वितान
(११)
तुङ्ग।

द्वितीयसूत्रानुसारेण पञ्चमाद्यास्त्रयोपि लाः, यथा,—गजगति अथवा गजपति (नभलगाः)

ते चापि सर्वे गाः यथा,—विद्युन्माला । (मो मो गो गो)

"क्वचित् केवलपञ्चमः" यथा,—माणवका (भात्तलगाः)

उपरिलिखितस्य द्वितीयसूत्रस्याकरस्थानं कृपया वाचकमहोदया विज्ञापयन्तु ।

छात्र-हितैषिणी

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

आचार्यः। वत्स वामन, किमिति त्वया त्यतिष्ठत इति लिखितम् ? अपि न ज्ञायते श्रीमता प्रतिष्ठतिः परस्मैपद्येव ।

वामनः। आर्य, यः प्रतितिष्ठति स प्रायेण स्वस्यैव हितं संसाधयंति, अत एव क्रियाफलस्य कर्तृगामित्वादत्रात्मनेपदमेव युज्यते, न पुनः परस्मैपदम् ।

आचार्यः। वत्स, उभयपदिधातुविषयेऽयं नियमः प्रवर्तते, तिष्ठतिस्तु परस्मैपद्यव ।

वामनः। आर्य, यदि मम वचसि न विश्वासः, तर्हि कृपया महाभाष्यं विलोक्यताम् । पतञ्जलिस्तु सर्वथा प्रामाणिको वैयाकरणः ।

आचार्यः। पतञ्जलेः प्रामाणिकत्वे कः संशयः ? स हि प्रामाणिकानां शिरसि वर्तते । किं तत्र भवताऽवलोकितम् ?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वामनः। आर्य, example is better than precept 'अनुशासनत उदाहरणं बलीयः' इति जागर्ति पाश्चात्त्यानामाभाणकः। अस्मद्देशेऽपि वैयाकरणाः प्रयोगानुसारेण कति वा ज्ञापकान् न कल्पयन्ति ? महर्षिणा पतञ्जलिनोक्तम्—कथं पुनस्तस्यामप्रतिष्ठमानायां प्रष्ठशब्दो वर्तते इति। अत्र अप्रतिष्ठमानायामिति पदं वर्तते, तत्र शानच्प्रत्ययो देदीप्यते, शानच्-प्रत्ययश्चात्मनेपदिभ्य एव विहितः। अत एव प्रतितिष्ठतेरात्मनेपदं सिद्धम्।

आचार्यः। वत्स, भ्रान्तोऽसि। प्रतिष्ठाशब्दः प्रतितिष्ठतेरङि निष्पन्नः, प्रतिष्ठमानः पुनः प्रपूर्वकस्थाधातोः सम्भूतः। प्रपूर्वकस्य तिष्ठतेरात्मनेपदं विहितमेव। स्मर्यतां तावत् समवप्रविभ्यः स्थ इति सूत्रम्।

वामनः। आर्य, अनुगृहीतोऽस्मि। इदानीं व्यपगतो मे भ्रमः। बहव एव शुक्तिकायामिव रजतं प्रतिष्ठमाने प्रत्युपसर्गं पश्यन्ति।

दमनः। आर्य, युक्तिरप्यत्र वर्तते। परोपकारायैव सतां प्रतिष्ठा। यो हि प्रतिष्ठां लब्ध्वा परेषां परिपालनादौ न प्रवर्तते स पशुरेव। प्रतिष्ठासहकारिणी लब्धपरिपालनवृत्तिः क्लेशकारिण्येव। अत एवोक्तं कविकुलचूडामणिना कालिदासेन—

औत्सुक्यमात्रमवसाययति प्रतिष्ठा
क्लिश्नाति लब्धपरिपालनवृत्तिरेव।
नातिश्रमापनयनाय यथा श्रमाय
राज्यं स्वहस्तधृतदण्डमिवातपत्रम्॥ इति।

अत एव ब्राह्मणेषु प्रयोगः—"प्रतितिष्ठति य एवं वेद" इति।

आचार्यः। साधु वत्स, साधु। सर्वथा प्रशंसनीयं ते सूक्ष्मदर्शनम्। चिरं जीव।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कालिदास-भवभूती

[श्रीद्विजेन्द्रलाल-रायः]

पञ्चमेऽस्मिन्नङ्के किमप्यपूर्वं वस्तु पश्यामः। पश्यामस्तावदलक्षितमेवास्माभिः किमपि युद्धं प्रवर्तते। एकतस्तावत् क्षात्रं तेजः, अपरतश्च ब्राह्मं तेजः। अहो कियद्वा न भर्त्सिता दुष्यन्त ऋषिशिष्याभ्यामृषिदुहित्रा च गौतम्या। दुष्यन्तस्तावत् क्रोधं न प्रकटयति, परं स्वप्रतिज्ञायाः पदात् पदमपि न स्खलति। ब्राह्मणस्याभिशापोऽपि शिरसा तेनोह्यतेऽगतिकतयानिच्छतापि, न खलु प्रभवत्यसौ तं दूरं निक्षेप्तुम्। अहो अपूर्वम्!

अहं तावच्छकुन्तलायाः पञ्चममङ्कं जागते नाट्यसाहित्येऽतुलनीयमाकलयामि। नाधीतं मया ग्रीक्‌नाटक एवंविधं किमपि, नाधीतं फरासीसनाटके, नाधीतं शार्मण्यनाटके, नाधीतमाङ्‌लनाटके।

षष्ठेऽङ्के दृश्यते शकुन्तलापरिणयवृत्तान्तो विरहिणो नरपतेः स्मरणसरणिमनुप्राप्त इति। समागतो वसन्तोत्सवः, तथापि निरुत्सवं राजभवनम्। किङ्कर्यौ कामदेवार्चनार्थं सहकारमुकुलानि चिनुतः। कञ्चुकिना तत्रागत्य ते निषिद्धे। राज्ञा खलु स्वराष्ट्रे प्रतिषिद्धो वसन्तोत्सवः।

ततश्च कञ्चुकिना तयोः पुरतः राज्ञोऽवस्था वर्ण्यते—

रम्यं द्वेष्टि यथा पुरो प्रकृतिभिर्न प्रत्यहं सेव्यते
शय्याप्रान्तविवर्तनैर्विगमयत्युन्निद्र एव क्षपाः।
दाक्षिण्येन ददाति वाचमुचितामन्तःपुरेभ्यो यदा
गोत्रेषु स्खलितस्तदा भवति च व्रीडावनम्रश्चिरम् ॥ इति।

ततः प्रविष्टस्तापसवेषो नरपतिर्विदूषकेण प्रतीहार्या च सह। इत्थं तावत् कञ्चुकी तस्य रूपं वर्णयति—

प्रत्यादिष्टविशेषमण्डनविधिर्वामप्रकोष्ठे श्लथं
बिभ्रत् काञ्चनमेकमेव वलयं श्वासोपरक्ताधरः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चिन्ताजागरणप्रताम्रनयनस्तेजोगुणैरात्मनः
संस्कारोल्लिखितो महामणिरिव क्षीणोऽपि नालक्ष्यते ।। इति ।

राजा प्रतिहारीमवदत्—वेत्रवति, मद्वचनादमात्यपिशुनं ब्रूहि, अद्य चिरप्रबोधान्न सम्भावितमस्माभिर्धर्मासनमध्यासितुम् । यत् प्रत्यवेक्षितमार्येण पौरकार्यं तत् पत्रमारोप्य प्रस्थाप्यताम् इति ।

राजकार्यमधिकृत्य राज्ञा यथायथम् आदेशो दत्तः । केवलं पूर्वेद्यूरात्रिजागरणाद् नालमद्यासौ धर्मासनमध्यासितुम्, तथापि कार्यविशेषश्चेत्, स्वयमेव स तं निर्वाहयेत् ।

ततश्च प्रियवयस्यस्य पुरतो राज्ञा समुद्घाटितं हृदयकपाटम् । विदूषकस्तमाश्वासयन् स्थितः । राज्ञा चेत्थं भर्त्सितमङ्गुरीयकम्—अये इदं तदसुलभस्थानभ्रंशे शोचनीयम् ।

कथं नु तं बन्धुरकोमलाङ्गुलिं
करं विहायासि निमग्नमम्भसि ।
अचेतनं नाम गुणं न वीक्षते
मयैव कस्मादवधीरिता प्रिया ।। इति ।

ततश्च राज्ञा शकुन्तलामुद्दिश्योक्तम्—"प्रिये, अकारणपरित्यागादनुशयदग्धहृदयस्तावदनुकम्पतामयं जनः पुनर्दर्शनेन" इति । ततश्च स्वाङ्कितं शकुन्तलालेख्यं निरीक्षमाणोऽभिभूतः सन् बाष्पं विमोचयन् स्थितः ।

ततः समागतं राजकार्यम् । मन्त्रिणा तावदुपदेशः प्रार्थितः—विदितमस्तु देवपादानां धनवृद्धिर्नाम वणिक् वारिपथोपजीवी नौव्यसने विपन्नः, स चानपत्यः, तस्य चानेककोटिसंख्यं वसु, तदिदानीं राजस्वतामापद्यत इति श्रुत्वा देवः प्रमाणमिति । राज्ञा समादिष्टम्—तस्य काचन विधवा पत्नी गर्भिणी वर्तते । गर्भस्थेन सन्तानेन धनं लप्स्यते इति । ततश्चोक्तम्—किमनेन सन्ततिरस्ति नास्तीति ।

येन येन वियुज्यन्ते प्रजाः स्निग्धेन बन्धुना ।
स स पापादृते तासां दुष्यन्त इति घुष्यताम् ।। इति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अत्र खलु कविना नाटकस्य नायकः पुनरपि नितरां मनोहरतया क्रीडितः। न खल्वेवं शोकग्रस्तेनापि राज्ञा विस्मृतानि राजकर्माणि। शासनं तावद् यथापूर्वं यन्त्रवत् प्रवर्तते। परं शासनेऽस्मिन् राज्ञः शोकस्यच्छाया संलग्ना—कठोरेण साकं मधुरभागस्य मिश्रितम्। उद्धृत-पूर्वे राजादेशे पश्यामः—तस्य शोकश्च धर्मज्ञानं च, तस्य कर्तव्यता-बुद्धिश्च स्नेहश्च, तस्य वर्तमानञ्चतातीतञ्च मिलित्वापूर्वमेकमिन्द्र-धनुर्व्यरचयन्निति। निःसन्ततेर्वणिजः सम्पद्राज्ञात्मसात् कर्तुं सुशकासीत्। परं तस्योत्तराधिकारिणमन्विष्य तस्मै प्रदेयासौ सम्पत्। किञ्च वणिजो निरपत्यता तस्य विधवानां च शोकः स्वस्य निरपत्यतया शोकेन च साकं सम्मिलितः। न खल्विदानीं विशेषोऽस्ति राजप्रजयोः। समानेन दुःखेनोभौ निष्कृष्य समभूमित्वं विहितम्। स खलु विद्रुतोऽनुकम्पया। क इदानीं प्रभवेत् तं निवारयितुम्? यस्य यस्य प्रनष्टः प्रियजनः स (चेत् पापी न स्यात्) दुष्यन्तस्य मित्रम् इति।

सप्तमेऽङ्के राजा समुत्थितः। स्वर्गात् प्रत्यागच्छन् हेमकूटपर्वते कश्यपस्याश्रमप्रान्ते पुनरपि तेन शकुन्तला समासादिता। दृष्टा तेन—

वसने परिधूसरे वसाना
नियमक्षाममुखी धृतैकवेणिः।
अतिनिष्करुणस्य शुद्धशीला
मम दीर्घं विरहव्रतं बिभर्ति॥ इति।

शकुन्तलामुद्दिश्य तस्य प्रथमं सम्भाषणमतिमात्रं परुषम्। प्रथमतः शकुन्तलां सम्बोध्य तेन यदुच्यते तावता राजन्यपरज्यते नश्चेतः। "प्रिये क्रौर्यमपि ते मयि प्रयुक्तमनुकूलपरिणामं संवृत्तम्। तदहमिदानीं त्वया प्रत्यभिज्ञातमात्मानमिच्छामि" इति। तत ऊर्ध्वमपि तथाविधमेव। शकुन्तलोत्तरं न प्रत्यपद्यत। ततश्च राज्ञा पुनरप्युक्तम्—

स्मृतिभिन्नमोहतमसो दिष्ट्या प्रमुखे स्थितासि सुमुखि।
उपरागान्ते शशिनः समुपगता रोहिणी योगम्॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इति। ततश्च यदा शकुन्तलयोक्तम्—जयतु जयत्वार्यपुत्र इति। तदा राज्ञोक्तम्—

बाष्पेण प्रतिषिद्धेऽपि जयशब्दे जितं मया।
यत्ते दृष्टमसंस्कारपाटलोष्ठपुटं मुखम्॥

इति। इदानीमपि 'अहो मे भाग्यम्' 'जितमेव मया' इति तेनोच्यते। परं तत ऊर्ध्वं यदा शकुन्तला स्नेहमिश्रक्रोधेन क्रन्दितवती, तदा राजा

सुतनु हृदयात् प्रत्यादेशव्यलीकमपैतु ते
किमपि मनसः सम्मोहो मे तदा बलवानभूत्।
प्रबलतमसामेवंप्रायाः शुभेषु हि वृत्तयः
स्रजमपि शिरस्यन्धः क्षिप्तां धुनोत्यहिशङ्कया॥

इत्युक्त्वा शकुन्तलायाः पादयोः पतितः। तदैवावगच्छामः—अनुभूतिश्चेत् सकृन्मुक्तरश्मिः क्रियते सा सर्वथा तमभिभविष्यति। वचनोच्चारणस्याप्यवसरं न दास्यति। अत एवासावेतावन्तं कालमनुभूतिं निष्पीड्य स्वान्तरेव संस्तभ्य वदन्नासीत्।

ततश्च दुष्यन्तः शकुन्तलामध्यगच्छत्, तयोश्च मेलनं सञ्जातम्।
(क्रमशः)

मुक्तेरभ्युपायः

[कवीन्द्र-रवीन्द्रनाथ-ठाकुरः]

१

फकिरचन्द्रो बाल्यात् प्रभृति गम्भीरप्रकृतिकः। न खलु कदाप्यसौ स्थविराणां समाजेऽशोभनः सन्दृश्यते स्म। नालमासीदसौ लेशतोऽपि सोढुं शीतलं सलिलमवश्यायं हास्यपरिहासञ्च। एकतस्तावदसौ गम्भीरस्तत्रापि वत्सरस्य समधिकभागमेव मुखमण्डलस्य समन्तात् कृष्णोर्णमयगलत्राणस्य संलग्नतया स खलु भीषणोच्चस्तरीयः पुरुष इति प्रतीयते स्म। किञ्च [illegible] वयसि तस्यौष्ठाधरस्य गण्डस्थलस्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

च पुष्कलश्मश्रुसमाच्छन्नतया समग्रे वदनाभोगे हास्यविकासस्य स्थानं तिलमात्रमपि नावशिष्टम् ।

पत्न्या हैमवत्या वयोऽल्पम्, मानसमपि तस्याः सर्वथा पार्थिवेषु विषयेष्वभिनिविष्टमासीत् । सा खलु बङ्किमचन्द्रस्य कथाग्रन्थान् पठितुमिच्छति, पतिं च साक्षाद् देवतारूपेण पूजयित्वा न तृप्तिमधिगच्छति। सा खलु किञ्चित् हास्यप्रमोदं रोचयते । यथा च विकासोन्मुखं पुष्पं पवनान्दोलनाय प्राभातिकालोकाय च समुत्कण्ठते, सापि तथैवाभिनवं यौवनमनुभवन्ती पत्युः सकाशात् प्रेमोपचारं हास्यामोदं च यथावत् प्रत्याशास्ते । परं यदा यदा पतिरवसरं लभते तदा तदा तां श्रीमद्भागवतमध्यापयति, सायं श्रीमद्भगवद्गीतां श्रावयति, तस्याश्चाध्यात्मिकीं समुन्नतिमुद्दिश्यान्तरान्तरा शारीरेणापि दण्डेन योजनादपि न सङ्कुचति। यस्मिन् दिवसे हैमवत्या उपधानस्याधस्तात् 'कृष्णकान्तस्य निर्वाणम्' बहिर्भवति, तस्मिन् दिने लघुप्रकृतिकां तां युवतिं सर्वरात्रम् अश्रूणि मोचयित्वा फकिरचन्द्रो विरमति । प्रथमतस्तावत् कथाग्रन्थपठनम्, तत्रापि पतिदेवतायाः प्रतारणम् । यद् वा भवतु, निरन्तरम् आदेशेनानुदेशेनोपदेशेन धर्मनीत्या दण्डनीत्या चान्ततो हैमवत्या मुखस्य हासं मनसः सुखं यौवनस्य चावेगं सर्वथा समूलं निष्क्रष्टुं प्रबभूवासौ पतिदेवता ।

परमनासक्तानां जनानां विघ्नबहुलः संसारः । आदौ पुत्रस्य ततश्च दुहितुर्जन्मना फकिरस्य संसारबन्धनं दृढीभूतम् । पितुश्च शासनेन तथाविधगम्भीरप्रकृतिकस्यापि फकिरस्य कर्मणः प्रार्थनया करणात् करणे गममनमावश्यकीभूतं कर्मणस्तु लाभस्य सम्भावना लेशतोऽपि नादृश्यत ।

तदा तेन चिन्तितम्, अहमपि बुद्धदेव इव गृहं त्यक्ष्यामि । एवं विचिन्त्यासौ कदाचिन्निशीथे गृहं त्यक्त्वा बहिर्गतः ।

अन्तराऽपरस्यापीतिवृत्तस्य कथनमावश्यकम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आसीन्नवग्रामवास्तव्यस्य षष्ठीचरणस्यैक एव पुत्रः। तस्य च नाम माखनलाल इति। विवाहतोऽनतिविलम्बेन सन्तानस्यालाभात् पितुः प्रार्थनेनाभिनवत्वस्य च प्रलोभनेन कृतस्तेन द्वितीयो दारपरिग्रहः। एतस्य विवाहस्यानन्तरं क्रमेण पत्न्योः सप्त दुहितरः पुत्रश्चैकः समजायन्त।

माखनस्तावन्नितान्तं विलासप्रियश्चपलप्रकृतिकश्च, स खलु केनापि गुरुतरेण कर्तव्येनात्मनो बन्धनं नानुमन्यते स्म। एकतस्तावत् पुत्राणां भारो वोढव्यः, अपरतश्च यदा कर्णधारीद्वितयं कर्णद्वयं बलादाक्रष्टुमुपचक्रमे, तदा सर्वथा सोढुमशक्नुवन् सोऽपि निशायामेकस्यामन्तर्धानं गतः।

चिरं तस्य साक्षात्कारो न लभ्यते। अन्तरान्तरा श्रूयते स किलैकस्मिन् विवाहे कीदृशं सुखमिति परीक्षितुकामः वाराणसीं प्रपद्य तत्र निगूढं विवाहान्तरं विहितवान्। श्रूयते च विपरीतभागधेयेन वराकेण कथञ्चिन्निर्वृतिरधिगतेति। केवलं स्वग्रामस्य सन्निधाने प्रत्यागमनार्थमन्तरान्तरा मनो भृशं खिद्यते, परमात्मीयास्तं लक्षयिष्यन्तीति भिया नोत्सहते प्रत्यागन्तुम्।

३

कियन्तिचिद्दिनानि परिभ्राम्यन्नुदासीनः फकिरचन्द्रो नवग्राममुपस्थितः। मार्गपार्श्ववर्तिनः कस्यचिद्वटवृक्षस्याधस्तान्निषण्णो दीर्घं विनिश्वस्यावदत्—अहो वैराग्यमेवाभयम्! दारा वा पुत्रा वा धनं वा किमपि कस्यापि न भवति। का ते कान्ता कस्ते पुत्रः?" एवमुक्त्वा प्रारब्धं तेन गीतम्—

शृणु रे शृणु, अबोध मनः,
शृणु साधोरुक्तिं येन मुक्ति-
स्तां सुयुक्तिं स्वीकुरु भोः।
भवस्य शुक्तिं भङ्क्त्वा मुक्तिमौक्तिकस्य कुर्वन्वेषणम्।
रे प्रमादि मनः, प्रमादि मनो रे।

सहसा निरुद्धं गीतम्। "अहो! कोऽयम्। पितरमिव पश्यामि।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लब्धं वा तेन सूत्रम् ? तर्हि हा हतोऽस्मि। पुनरपि संसारस्यान्धकूपे समाकर्ष्यति। पलायितव्यम्।"

४

फकिरः ससम्भ्रमं समीपवर्तिनः कांश्चिद् गृहान् प्राविशत्। स्थविरो गृहस्वामी तूष्णीमवस्थाय तमाखुधूमं पिबन्नास्ते। फकिरं गृहं प्रविशन्तमवलोक्यापृच्छत् कस्त्वं भो इति।

फकिरः। तात! अहं तावत् सन्न्यासी।

वृद्धः। सन्न्यासी ननु! पश्यामि तावत्, पश्यामि वत्स। आलोके तावदागच्छ, पश्यामि।

एवमुक्त्वालोके समाकृष्य फकिरस्य वदनसन्निधौ समवनतपूर्वकायो वृद्धो यथा महता क्लेशेन हस्तलिखितं पुस्तकं वाचयति तथैव फकिरस्य मुखं निरीक्ष्य किमप्यन्तर्दर्शनं वक्तुं प्रचक्रमे।

अहो स एवायं मदीयो माखनलालः। सैव नासिका, तदेव नयनं केवलं ललाटं परिवर्तितम्। तदेव च चन्द्रवदनं श्मश्रुणा सर्वथा समाच्छन्नम्। इत्युक्त्वा स्थविरः सस्नेहं फकिरस्य श्मश्रुलं मुखमेकद्वान्वारान् करतलेन परामृश्य प्रकाशमवदद् वत्स माखन इति।

नैतत् पृथग् वक्तुमावश्यकं वृद्धस्य नाम षष्ठीचरण इति।

फकिरः। (सविस्मयम्) माखन इति। न खलु माखन इति मदीयं नाम। पूर्वं मम नाम यद्वा तद्वा भवतु, इदानीं मम नाम चिदानन्दस्वामीति। यदीच्छसि परमानन्दस्वामीत्यपि वदेः।

षष्ठी। वत्स, इदानीं तावदात्मानं पृथुक इति वा व्यपदिश, परमान्नमिति वा, त्वं मदीयो माखन एवेति कथमपि न प्रभविष्यामि वत्स! विस्मर्तुम्। वत्स, केन वा दुःखेन परित्यक्तवानसि त्वं गृहान्? किं वा वस्तु ते नास्ति? द्वे पत्न्यौ, ज्यायसी चेद् न रोचते, कनीयसी वर्तत एव। पुत्रादीनामप्यभावो नास्ति। भगवत्कृपया ते सप्त दुहितरः, एकश्च तनयः। अहञ्च वृद्धः पिता, कियच्चिरं वा जीविष्यामि, त्वदीया एव गृहपरिजनास्त्वदीया एव स्थास्यन्ति। [क्रमशः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Technical Terms of Sanskrit Grammar

Samāsa.

"Samāsa" is derived from *as* 'to throw' preceded by *sam* 'together' with the suffix *ghañ*. *Sam-as* occurs in AV., S'B. etc. in the sense of 'to throw or put together, add, combine,' e.g., उभावन्तौ समस्यताम् AV.vi. 89. 3, 'let the two ends be united', रज्जुं सप्तधा समस्यति 'combines the string in seven ways' etc. In AB. x. 3 we find प्रथमे पदे विहरति......समस्यत्युत्तरे पदे 'he separates the first two pādas,... ...he unites the last two pādas', न निविदः पदे समस्येत् 'he should not unite the two sentences of the Nivid.' The participle "samasta" is used in S'B. in the sense of 'combined, united.' The noun Samāsa is used for the first time in the Brāhmaṇas. Thus in AB. we find : सप्तदशो वै प्रजापतिर्द्वादश मासाः पञ्चर्तवो हेमन्तशिशिरयोः समासेन i. i. 'Prajāpati is seventeenfold, the months are twelve, the seasons five through the union of winter and the cool season.' In grammatical literature the sense of "samāsa" became naturally restricted to 'the union of words'. In the Nirukta also "samāsena" is used in the sense in which it is used in AB. 'षष्टिश्च ह वै त्रीणि च शतानि संवत्सरस्याहोरात्रा इति च ब्राह्मणं समासेन iv. 27 (i. e. taking days and nights together). Samāsa is used in its grammatical sense in Nir. ii. 2: अथ तद्धितसमासेष्वेकपर्वसु चानेकपर्वसु च पूर्वं पूर्वमपरमपरं प्रविभज्य निर्ब्रूयात् 'now with regard to words formed with secondary suffixes and compounds whether of one or more than one member, one should explain their component parts in their respective order, having first divided the words into them.' Samāsa occurs in RP. several times in the sense of 'compound' समासांस्तु पुनर्वचन एव्येत् x. 16, 'samāsas one should separate by an avagraha in their second mention.' According to Uvata, Samāsa is

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

used here in the more general sense of 'separable words' (अवग्रह्याणि पदानि). See also xi. 25, 31. Samāsāṅgam occurs in न समासाङ्गमुत्तरम् i. 94, where "uttaram samāsāṅgam" means 'the second member of a compound'. It is not found in TP but VP. and the Prātis'ākhyas of AV. use it. Thus in VP. i. 27 we find "तिङ् कृत्तद्धितचतुष्टयसमासाः" where acc. to commentators "catuṣṭaya-samāsāḥ" means 'compounds comprising four classes' but 'catuṣṭaya' may also have been used in a technical sense. In the Kātantra school *catuṣṭaya* is explained thus :

शब्दानां साधनं यत्र कारकाणां च निर्णयः ।
समासस्तद्धितो यत्र स चतुष्टय उच्यते ॥

This is not applicable here, as 'taddhita' and 'samāsa' are separately mentioned.

CA. iv. has :

समासावग्रहविग्रहान् पदे यथोवाचच्छन्दसि शाकटायनः ।
तथा प्रवक्ष्यामि चतुष्टयं पदं नामाख्यातोपसर्गनिपातानाम् ॥

According to Kātre this is a portion of the text (*New Indian Antiquary*, I. p. 391).

The opposite of *samāsa* is *vyāsa* or *vigraha*.

Samāsa in the sense of a compound occurs in the above passage as also in समासयोश्च CA. iv. 43 'separation by avagraha takes place also between two compounds' etc. In क्वचित् समासे वा नानापदद्दर्शनात् iv. 27 the word samāsa is used in the sense of 'combination'. In the sense of 'compound' it occurs in Apr. iii. 3. 5. RT. uses both "samāsa" (99) and "māsa" (103, 125). BD. not only uses 'Samāsa' but mentions its six varieties also (ii. 105-106):

द्विगुर्द्वन्द्वोऽव्ययीभावः कर्मधारय एव च ।
पञ्चमस्तु बहुव्रीहिः षष्ठस्तत्पुरुषः स्मृतः ॥
विग्रहान्निर्वचः कार्यं समासेष्वपि तद्धिते ।
प्रविभज्यैव निर्ब्रूयाद् दण्डार्थो [illegible] इत्यपि ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'In compounds as well as in a secondary derivation explanation should proceed from analysis : one should explain after separating (the parts) ; thus 'punishable' (daṇḍ-ya) as deserving punishment (daṇḍārha). We have seen that RT. uses "māsa" for "samāsa." In the Gaṇapaṭha of Pāṇini 'sa' is sometimes found for 'sāmasa', e. g., वाजासे iv. 1. 105, वक्क्यासे iv. 1. 86. J. naturally pounces upon the abbreviation and Mu. follows J. S'. follows Pāṇini and K. , and uses the full form 'samāsa' as do Sam., Su., PR. and even HN. C. uses "ekārtham" abbreviated from "ekārthībhāva" for samāsa. He, however, uses the term "samāsa" in "चार्थसमासमनोज्ञादिभ्यः" iv. 1. 149 and in "ओष्ठोत्वोः समासे वा" v. 1. 97, "इकोऽसस्थाने ह्रस्वस्वासमासे" v. 1. 132, "शुजेरसमासे" v. 4. 26, "पत्युः समासे" vi. 2. 51, "समासेऽनुत्तरस्य" vi. 4. 39. "समासेऽङ्ग लेः सङ्गः" vi. 4. 66. For Pāṇini's "तिककितवादिभ्यो द्वन्द्वे" ii. 4. 68 Candra has "तिककितवादिभ्यस्वार्थैकार्थ्ये" ii. 4. 115. Again for Pāṇini's "शिशुक्रन्दयमसभद्वन्द्वेन्द्रजननादिभ्यश्छः" iv. 3. 88 Candra has शिशुक्रन्दादीनधिकृत्य कृते ग्रन्थे छः" and "चार्थानदेवासुरादीन्" 3. 3. 56-57. Here Vṛtti says : चार्थसमासेभ्यः.

Pāṇini does not define Samāsa but "समर्थः पदविधिः" ii. 1. 1 is generally taken to be the definition of the term. Saṁkṣiptasāra also does not define Samāsa. In the Vṛtti we find "समासोऽनेकपदस्यैकपदवत्ता".

पाणिनिः । प्राक् कडारात् समासः । २।१।३
कातन्त्रम् । नाम्नां समासो युक्तार्थः । २।१५९
चन्द्रः । सुप् सुपैकार्थम् । २।२।१
जैनन्द्रः । सः । सुप् सुपा । १।३।२-३
शाकटायनः । सुप् सुपा समासो बहुलम् । २।१।१
सरस्वतीकण्ठाभरणम् । सुप् सुपा सहैकार्थीभावे समासः । ३।२।१
हेमचन्द्रः । नाम नाम्नैकार्थ्ये समासो बहुलम् । ३।१।१८
संक्षिप्तसारः । ततपुरुषो वा नञः समासः । ७।१

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मुग्धबोधम् । दैक्यं सोऽन्वये । ३१८

सारस्वतम् । समासश्चान्वयो नाम्नाम् । ९।१

सुपद्मम् । समर्थानां समासः । २।४।३१

प्रयोगरत्नमाला । समासश्चानेकपदस्यैकलिङ्गत्वमुच्यते । ऐकस्वर्यं च फलम् । तदिहाहुः—नरसिंहवदखण्डः समास इति । ७२१

हरिनामामृतम् । कृष्णस्य विग्रहे भाति समासेनाखिलं पदम् ।
इतीव स्मारकं वक्ष्ये समासपदविग्रहम् ॥
सबहुव्रीहिद्विगुतामात्रे लुब्धोऽस्मि सद्वन्द्वः
तत् पुरुष कर्म धारय भक्तेर्येनाव्ययीभावः ॥

समासा बहुलं । अन्तर्भिन्नपदत्वेऽप्येकनामत्वेन योजनं समासः । ....समासवाक्यं विग्रहः । ६।१३५

Coming now to the different varieties of compounds we find Pāṇini begins with Avyayībhāva (ii. 1. 5) and passes successively on to Tatpuruṣa (ii. 1. 22), Karmadhāraya (ii. 1. 49), Dvigu (ii. 1. 52), Bahuvrīhi (ii. 2. 23) and Dvandva (ii. 2. 29). Of these Avyayībhāva is self-explanatory, since in this class of compounds the resulting word becomes an indeclinable (Avyaya). The suffix *cvi* shows "abhūta-tadbhāva" — that which was not an Avyaya now becomes an Avyaya. The name is so apt that most systems of grammar (including S'āk.) have accepted it. Candra, true to his promise, cannot use it. He uses "असंख्यार्थे" instead. It may be mentioned in this connexion that C. uses Asaṁkhya for Pāṇini's Avyaya. Thus for Pāṇini's अव्ययीभावे शरत्प्रभृतिभ्यः v. 4. 107, Candra has शरदादिभ्योऽसंख्यार्थे" iv. 4. 90. (For अव्ययीभावे चाकाले vi. 3. 81, Candra has 'अकाले स्वार्थे v.2.100).

J. uses "ha" for "avyayī-bhāva", probably because "ha" is the last letter of the alphabet and "avyaya" marks the last stage. Mu. selects the "v" and final "a" of "avyaya" and uses "va" for "avyayī-bhāva". HN. sees no reason to reject the generally accepted name.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पा०। अव्ययीभावः। २।१।५ स० ३।२।८

का०। पूर्वं वाच्यं भवेद् यस्य सोऽव्ययीभाव इष्यते। २।२७२

जै०। हः। १।३।४

शा०। अव्ययम्। एकार्थं च।२।१।४-५, मिथो ग्रहणे प्रहरणे च सरूपं युद्धेऽव्ययीभावः। २।१।६

हे०। तत्रादाय मिथस्तेन प्रहृत्येति सरूपेण युद्धेऽव्ययीभावः। ३।१।२६

सं०। समृद्ध्यादावव्ययस्याव्ययीभावः। ७।५७

मु०। वः क सामीप्यसादृश्यसाकल्यानुक्रमर्द्धिषु।
वीप्सापर्यन्तयोग्यत्वपश्चादर्थानतिक्रमे।
शब्दप्रादुर्भावाभावयौग्यपद्येष्वनेकधा।

सा०। पूर्वोऽव्ययीभावः। ९।१३

सु०। अव्ययीभावः। ४।३।३

प्र०। सोऽव्ययीभावो यत्र नानाविभक्तिष्वेकरूपता। १।८८६

ह०। अव्ययीभावः। ६।१५१

Tatpuruṣa is taken as the type of the class of compounds known by that name. It is itself a ṣaṣṭhi-tatpuruṣa, the analysis being "tasya puruṣaḥ". The Prakriyā-sarvasva says:

स्यात् तस्य पुरुषस्तत्पुरुषः षष्ठीसमासतः।
तेन तज्ज्ञातिजाः सर्वे कृद्वत् तत्पुरुषा मताः॥

'तस्य पुरुषः' becomes तत्पुरुषः by षष्ठीसमासः, so all words of this type are regarded as Tatpuruṣa, even as all suffixes of the type of Kṛt are regarded as Kṛt.'

J. calls it 'ṣa' after the final syllable (i.3.20), Mu. follows J. HN. calls it Kṛṣṇa-Puruṣa—hardly a happy designation. C. generally expresses Tatpuruṣa by Ananyāsaṁkhya i. e., except in Bahuvrīhi and Avyayībhāva. Cf. "asaṁkhyāc-cāṅguler-ananyāsaṁkhyārthe" iv.4.74 for Pāṇini's "tatpuruṣasyāṅguleḥ saṁkhyāvyādeḥ" v.4.86.

The word "Tatpuruṣa" occurs first in TA. x.1.5 "तत्पुरुषाय विद्महे महादेवाय धीमहि" in the sense of 'the Supreme Being'

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

and is a Karmadhāraya. As a Tatpuruṣa it occurs for the first time in Kātyāyana S'rauta Sūtra vii.i. 8 : **चतुरो वाद्यांस्तत्पुरुषा इतरे यथावेदम्** 'or the first four, the others are their retainers according to the respective Vedas'.

पा० । तत्पुरुषः ।२।१।५

का० । तत्पुरुषावुभौ । [उभौ द्विगुकर्मधारयौ]

विभक्तयो द्वितीयाद्या नाम्ना परपदेन तु ।

समस्यन्ते समासो हि ज्ञयस्तत्पुरुषः स च ॥२६५-२६६ ।

जै० । षम् । २।१।२ षमिति प्राग् वसादधिकारो ज्ञेयः । वृत्तिः ।

शा० । तिदुस्स्वत्याङ्क्वन्यस्तत्पुरुषः । २।१।२०

तिसंज्ञानि (ति=गति) दुस् सु अति आङ् कु इत्येतानि चाव्ययानि सुबन्तानि सुपा नित्यं समस्यन्ते स च समासोऽन्यो बहुव्रीह्यादिलक्षण-रहितस्तत्पुरुषसंज्ञो भवति । यक्षवर्मवृत्तिः ।

स० । तत्पुरुषः । ३।२।३३

स० । तत्पुरुषो वा नञः समासः । ७।१

हे० । गतिक्वन्यस्तत्पुरुषः । ३।१।४२

मु० । षः कृष्णमाश्रितः कृष्णाश्रितः ।

सा० । अमादौ तत्पुरुषः ९।६

प्र० । मयूरव्यंसकादित्वात् केचित् तत्पुरुषाः स्मृताः ।१।७७३

ह० । पीताम्बरात् प्राक् समासः कृष्णपुरुषः ६।८

Next comes Karmadhāraya. The word must have been self-explanatory at one time, but the exact sense is now shrouded in obscurity. The Prakriyā-sarvasva explains :

द्वयोर्हि पदयोरेकवृत्त्याखिलं पदम् ।

क्रियासम्बन्धि यत्र स्यात् स शान्तः कर्मधारयः ॥

'Where the entire word becomes connected with the verb by means of the same action of both the words, the Samāsa is Karmadhāraya.' Abhirāma Vidyālaṁkāra says in his Saṁkṣiptasāra-ṭippanī : Karma kriyānvayam dhārayatīti Karmadhārayaḥ. Wackernagel mentions two views in his

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Alt-Indische Grammatik : Karmadhāraya means the subject-holder, as opposed to Bahuvrīhi in which the second member pertains to another subject, or it may mean (ii) owing an object i.e. having no object to show forth or exhibit.

It is just possible that in ancient systems of grammar, Karmadhāraya was distinguished not from Tatpuruṣa, but from Bahuvrīhi. Thus instead of the rule तत्पुरुषः समानाधिकरणः कर्मधारयः there might have been such a rule as बहुव्रीहिरुत्तरपद-प्रधानः कर्मधारयः. In that case Karmadhāraya would mean that which holds i.e. is connected with the action, as distinguished from Bah. where the action does not affect the members of the compound but something else. Indian commentators generally explain Karmadhāraya in this way.

Another view may be suggested here. Karman is a masc. substantive ending in *an*, accented on the final syllable, meaning 'doer' and 'dhāraya' is another substantive formed with *s'a* meaning 'holder'. The word Karmadhāraya is a Karmadhāraya compound of 'karman' *masc.* and 'dhāraya': karmā cāsau dhārayas'ceti 'maker and maintainer'.

Or karman may mean 'sense'. In the Nirukta we find पञ्चमीकर्मन् having the function of the ablative, शब्दकर्माणो धातवः 'roots denoting to make sound'. यस्य पदद्वयस्य समासः, तत्पदोपस्थाप्यार्थौ यदि समासवाच्यः स्यात्, तदैवायं समासः। कविराजः।

In the system of Pāṇini it is possible to take "karman" in the sense of "sāmānādhikaraṇya" 'agreement or apposition of the two members'.

समानमभिन्नम् एकम् अधिकरणं वाच्यं येषां पदानां तानि समानाधिकरणानि पदानि। तानि आश्रयभूतानि यस्य तत्पुरुषस्य स समानाधिकरणपदस्तत्पुरुषः। एतेन तत्पुरुषार्थानां पदानां समानाधिकरणत्वादुपचारेण तत्पुरुषो वृत्तिसूत्रे समानाधिकरणशब्देनोक्त इति दर्शयति। कथं पुनर्बाह्यान्यपदापेक्षया तत्पुरुषस्य मुख्ये सामानाधिकरण्ये सम्भवति सत्यौपचारिकस्य ग्रहणमुपपद्यते ? कर्मधारय इति महत्याः संज्ञायाः करणात्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इह हि लाघवार्थत्वात् संज्ञाकरणस्य लघीयस्यां संज्ञायां कर्तव्यायां कर्मधारय इति महतीं संज्ञां कुर्वताऽन्योऽप्यत्र कश्चिद् विपर्ययः संज्ञायामित्याश्रितः। तेन गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्यय इति मुख्यस्य समानाधिकरणस्य ग्रहणे प्राप्ते तद्विपरीतस्य ग्रहणं विज्ञायते। न्यासः।

कर्म क्रियां धारयति स्वपदार्थे व्यवस्थापयतीति कर्मधारयः। साहिशातिधारिपारीत्यनेन शः। प्रयोगरत्नमाला ६।७६५ कर्मपदेन क्रियोच्यते, धारयतीत्यस्यार्थः स्वेति। स्वं समस्यमानपदं तस्यार्थे समस्यमानपदानतिरिक्तपदार्थे धारयति व्यवस्थापयति। प्रभाप्रकाशिका।

J. and Mu. call it *ya* from the last syllable. H.N. calls it S'yāma-Rāma.

पा०। तत्पुरुषः समानाधिकरणः कर्मधारयः।१।२।४२

का०। पदे तुल्याधिकरणे विज्ञेयः कर्मधारयः।२।२६३

जै०। पूर्वकालैकसर्वजरत्पुराणनवकेवलं यश्चैकाश्रये १।३।४२

शा०। विशेषणं व्यभिचार्येकार्थं कर्मधारयश्च। २।१।५८

भेदकं विशेषणम्। भेद्यं विशेष्यम्। तत्र चान्यत्र च सम्भवद्व्यभिचारि तद्विशेषणवाचि एकार्थं समानाधिकरणं सुबन्तं विशेष्यवाचिना सुबन्तेन सह वा समस्यते, स च समासस्तत्पुरुषसंज्ञः कर्मधारयसंज्ञश्च भवति। यक्षवर्मवृत्तिः।

हे०। विशेषणं विशेष्येणैकार्थं कर्मधारयश्च ३।१।९६

सं०। विशेषणस्य विशेष्यैः कर्मधारयः। ७८६

मु०। भिन्नान्यैकार्थद्व्यादिसंख्याव्यादीनां च-ह-य-ष-ग-वाः।

सा०। कर्मधारयस्तुल्यार्थे।९।१०

सु०। विशेषणमेकार्थेन कर्मधारयो बहुलम्।४।३।५८

प्र०। स्वार्थे तुल्याधिकरणसमासः कर्मधारयः।२।७४७

ह०। विशेषणं तुल्याधिकरणेन। पीताम्बरात् प्राक् समासाः कृष्णपुरुषसंज्ञाः। तेष्वयं श्यामराम-संज्ञः।६।७-९

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Now we come to Dvigu which means 'bought for two cows' etc. and is itself an example of "taddhitārtha dvigu". It is taken as the type of all the three varieties of Dvigu compounds and is a generic term for those Karmadhārayas in which the first member is a numeral. The Prakriyāsarvasva explains the term thus : द्वयोर्गवोर्भवादिर्द्वि द्विगु येनैष स द्विगुः. J. fixes on the 'ra' of 'samāhāra' and calls Dvigu "ra". Mu. probably thinks it rather far-fetched and names it "ga" after the final syllable. HN. substitutes a samāhāra dvigu for a taddhitārtha dvigu and uses "trirāmī" (Rāma, Paras'urāma, Balarāma) for all dvigu compounds.

पा० । [तत्पुरुषः समानाधिकरणः कर्मधारयः । २।१।५१] संख्यापूर्वो द्विगुः । २।१।५२

का० । [पदे तुल्याधिकरणे विज्ञेयः कर्मधारयः ।] संख्यापूर्वो द्विगुरिति ज्ञेयः । २।२६४

जै० । [दिगधिकं खुहृद्ग्रौ १।२।४३] स्यिः समाहारे रश्चाखौ । २।३।४४

स्यिः संख्यावाची सुबन्तेनोत्तरपदेन सह षः सः [तत्पुरुषसमासः] भवति, यश्च [कर्मधारयश्च] समाहारे कार्ये खुहृद्ग्रौ च [खु=संज्ञा, हृत्=तद्धित, ग्रु=उत्तरपद] रसंज्ञश्चाखौ ।

शा० । संख्या समाहारे च द्विगुश्चानाम्न्ययम् । २।१।६१

सं० । तद्धितार्थे समाहारे द्विगुः संख्यायाः । उत्तरपदे च । ६।११९-१२०

हे० । संख्या समाहारे च द्विगुश्चानाम्न्ययम् । ३।१।९३

मु० । तस्यार्थे विषये वाच्ये अपत्यार्थष्णिकादिकम् ।
प्रोज्झ्य राजादेः समाहारे गस्त्रिधोत्तरदे परे ॥

सा० । समाहारे अत ईप् द्विगुः । ९।२

सु० । द्विगुः संख्यातद्धितार्थसमाहारयोः । उत्तरपदे च । ४।३। ७५-७६

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्र०। संख्यापूर्वः स द्विगुः स्यात्। १।७६६

ह०। संख्यापूर्वोऽसौ त्रिरामीसंज्ञः। ६।४७

Bahuvrīhi means literally 'having much rice' and is itself an instance of a Bahuvrīhi compound. The Prakriyā-Sarvasva says : बहवो व्रीहयोऽस्येति यत्र स्यात् स तथोच्यते. J. calls it "ba" after the first syll, and Mu. "ha" after the last. Candra uses "anyārtha" for "bahuvrīhi". HN. substitutes Pītāmbarah, an epithet of Kṛṣṇa, for Bahuvrīhi. Pītāmbara is chosen because it is itself an instance of a Bahuvrīhi compound.

पा०। अनेकमन्यपदार्थे। २।२।९४

का०। स्यातां यदि पदे द्वे तु यदि वा स्युर्बहून्यपि।
तान्यन्यस्य पदस्यार्थे बहुव्रीहिः। २।२६७

जै०। अवान्यार्थेऽनेकं बम्। १।३।८९ वान्तवर्जितस्य [प्रथमान्तवर्जितस्य] अन्यस्य पदस्यार्थेऽभिधेयेऽनेकं सुबन्तं बसंज्ञः सः [समासः] भवति।

स०। शेषो बहुव्रीहिः। ३।३।१, अन्यपदार्थे ३।३।६, अनेकं मतुपोऽर्थे। ३।३।१६

हे०। सुज् वार्थ संख्या संख्येये संख्यया बहुव्रीहिः। ३।१।१९

सं०। अन्यपदार्थो बहुव्रीहिः। द्वितीयाद्यन्यपदार्थ इत्याचार्याः। ७।१२२-१२३

मु०। भिन्नान्यैकार्थद्व्यादिसंख्याव्यादीनां चहयषगवाः ३१९

सु०। अनेकमन्यपदार्थे बहुव्रीहिः। ४।३।७६

सा०। बहुव्रीहिरन्यार्थे। ९।९

प्र०। समानार्थानेकपदं बहिरर्थे समस्यते।
नित्यं यत् स बहुव्रीहिः १।८।९

ह०। अनेकमन्यपदार्थे पीताम्बरः। ६।१०२

Dvandva is the reduplication of dva (द्वम् द्वम्) and means two by two, two and two, hence pair. It was naturally chosen

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

as the name of those compounds in which the majority of instances denoted pairs. The word Dvandva occurs first in the Saṁhitās of the Yajus school. Thus we find in TS. i. 6.9. 3 द्वादश मासाः संवत्सरो द्वादश द्वन्द्वानि दर्शपूर्णमासयोः 'The year has twelve months, there are twelve pairs of new and fullmoon sacrifices.' Of the works belonging to the RV. it occurs first in AB. ix. 3: प्राणा वै द्विदेवत्या एकपात्रा गृह्यन्ते तस्मात् प्राणा एकनामानो द्विपात्रा हूयन्ते, तस्मात् प्राणा द्वन्द्वम्. "(The cups) for two deities are the breaths; they are drawn in one vessel; therefore the breaths have one name. They are offered in two vessels, therefore the breaths are in pairs." Keith. Even J. and S'āk. have retained the name Dvandva, but Mu. is not inclined to sacrifice consistency and so gives the monosyllabic name "ca" to this class of compounds in pursuance of Pāṇini's definition 'cārthe dvandvaḥ'. HN. names it Ramakṛṣṇa and frames the rule: इतरेतरसमाहारयो रामकृष्णः vi. 117. The singular in Rāma-Kṛṣṇa is jarring to the ear and as Rāma-Kṛṣṇa is neither an instance of *itaretara dvandva* (being singular) nor one of *samāhāra dvandva* (being masculine), it is not quite apt here.

Dvandva as the name of a variety of compounds occurs in VP. देवताद्वन्द्वानि चानामन्त्रितानि ii. 48, द्वन्द्वं चेन्द्रसोमपूर्वं पूषाग्निवायुषु ii. 55, पूर्वो द्वन्द्वेष्ववायुषु iii. 127, द्वन्द्वानि द्विवचनान्तानि स्वरान्तपूर्वपदानि v. 28 and in CA. देवताद्वन्द्वे च iv. 49.

पा० । चार्थे द्वन्द्वः । २।२।२९ (Cl. ८।१।१५)

का० । द्वन्द्वः समुच्चयो नाम्नोर्बहूनां वापि यो भवेत् । २।२६९

जै० । चार्थे द्वन्द्वः । १।३।९६

शा० । द्वन्द्वः सहोक्तौ । २।१।८०

स० । चार्थे युगपदधिकरणवचनतायां द्वन्द्वः । ३।३।१९

हे० । चार्थे द्वन्द्वः सहोक्तौ । ३।१।११७

सं० । द्वन्द्वोऽन्योन्यसंयोगे ७।१२१

सा० । चार्थे द्वन्द्वः । ९।८

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मु० । इतरेतरयोगे च समाहारे च चो द्विधा । ३२०

प्र० । चार्थे द्वन्द्वः । १।८३४

ह० । इतरेतरसमाहारयो रामकृष्णः ६।११७

The order of the different compounds in the different systems of grammar is as follows :

P. Avyayībhāva, Tatpuruṣa, Karmadhāraya, Dvigu, Bahuvrīhi, Dvandva.

BD. Dvigu, Dvandva, Avyayībhāva, Karmadhāraya, Bahuvrīhi, Tatpuruṣa.

K. Karmadhāraya, Dvigu, Tatpuruṣa, Bahuvrīhi, Dvandva, Avyayībhāva.

C. Avyayībhāva (2), Tatpuruṣa (11), Karmadhāraya (18), Bahuvrīhi (46), Dvandva (48). Candra does not make any provision for Dvigu. See Vṛtti on ii. 2. 18.

Jai. Avyayībhāva, Tatpuruṣa, Karmadhāraya, Dvigu, Bahuvrīhi, Dvandva.

S'āk. Bahuvrīhi, Avyayībhāva, Tatpuruṣa, Karmadhāraya, Dvigu, Dvandva.

S. K. Avyayībhāva, Tatpuruṣa, Bahuvrīhi, Dvandva. S.K. has no special name for Karmadhāraya and Dvigu, the generic name Tatpuruṣa being used for these also.

HC. Bahuvrīhi, Avyayībhāva, Tatpuruṣa, Karmadhāraya, Dvigu, Dvandva.

Sār. Dvigu, Avyayībhāva, Tatpuruṣa, Dvandva, Bahuvrīhi, Karmadhāraya.

Sam. Tatpuruṣa, Avyayībhāva, Karmadhāraya, Dvigu, Dvandva, Bahuvrīhi.

Mu. Dvandva, Bahuvrīhi, Karmadhāraya, Tatpuruṣa, Dvigu, Avyayībhāva.

Su. Avyayībhāva, Tatpuruṣa, Karmadhāraya, Dvigu, Bahuvrīhi, Dvandva.

PR. Karmadhāraya, Dvigu, Tatpuruṣa, Bahuvrīhi, Dvandva, Avyayībhāa.

Karmadhāraya ādyaḥ syād Dvigus Tatpuruṣo' paraḥ.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Bahuvrīhiratha Dvandvo' vyayībhāvaḥ ṣaḍīritāḥ. I. 725.

HN. Karmadhāraya, Dvigu, Tatpuruṣa, Bahuvrīhi, Dvandva, Avyayībhāva.

Yāska (ii, 3) distinguishes between "eka-parvan" and "anekaparvan" compounds. By "eka-parvan" he means 'compounds of two members' and by "aneka-parvan" 'compounds of more than two members' (Cf. CA. iv. 77). The examples given by him are rāja-puruṣaḥ, vis'cakadrākarṣaḥ* and kalyāṇa-varṇa-rūpaḥ†. On "rājapuruṣa" was founded the name Tatpuruṣa by the saving of a syllable, but rājapuruṣaḥ has remained the stock example of Tatpuruṣa compounds from Yāska's time down to the present day.

Acc. to some scholars Pāṇini deliberately used Tatpuruṣa with a view to including Karmadhārayas also: महत्याः पूर्वाचार्यसंज्ञाया अङ्गीकरणं प्रजार्थं तस्य पुरुषः स चासौ पुरुषश्चेति संज्ञयैवोदाहरणप्रदर्शनं च भवति। हृदयहारिणी ३।२।२३

It will be noticed that Pāṇini starts with Avyayībhāva in which the sense of the first member is prominent, then passes on to Tatpuruṣa in which the sense of the last member is prominent, then treats of Karmadhāraya which is a subclass of Tatpuruṣa and Dvigu which is a subclass of Karmadhāraya. Then he takes up Bahuvrīhi in which the sense of none of the members is prominent and concludes with Dvandva in which the sense of each of the members is prominent. Bahuvrīhi is closely connected with Karmadhāraya and Dvigu in that in each of these classes of compounds, the members are in apposition with each other, hence it is placed immediately after Dvigu.

Padmanābha, Candra (who does not make provision for Dvigu) and Bhojarāja (who ignores both Karmadhāraya and Dvigu) follow Pāṇini.

---

* 'Attraction of a dog'. "Vis'cakadra" appears to be the earlier form of "vis'vakadru".

† One whose complexion and form are auspicious.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Since in the vast majority of compounds the sense of the final member is prominent, the Kātantra starts with Karmadhāraya where the members are in apposition and proceeds to Dvigu which is merely a special case of Karmadhāraya. Then it passes on to Tatpuruṣa where the members are not in apposition with each other. The mention of Karmadhāraya naturally leads to Bahuvrīhi in which also generally the two members are in apposition with each other. Of the remaining two, Dvandva and Avyayībhāva, Dvandva being a savyaya (declinable) is placed before Avyayībhāva which being an indeclinable is dealt with last of all.

K. is followed by PR. and HN.

S'āk. and Hc. start with the anyapadārtha-pradhāna compounds and proceeds on to pūrvapadārtha-pradhāna, uttarapadārtha-pradhāna and ubhayapadārtha-pradhāna compounds.

Mu. follows the Bhagavad-gīta where the Lord says : द्वन्द्वः सामासिकस्य च 'of the compounds, I am Dvandva' and accords the place of honour to Dvandva and gives the name of the two deities generally worshipped as an example : Hariharau.

'नाम्नां समासो युक्तोर्थः' सुसहस्रकृतो हरेः ।
हन्त्यघं यत् खला विष्णो [निखिलं जन्तो ?] 'स्तत्स्था लोप्या विभक्तयः' ॥ सुभाषितावलिः ।

This a samasyāpūraṇa stanza on Kātantra's definition of Samāsa but the reading is corrupt and the sense obscure.

'The collection of the well-known thousand names of Hari along with (a knowledge of) their meanings destroys all sins of created beings. The distinctions between these different names must be obliterated.'

द्वन्द्वो द्विगुरपि चाहं मद्गेहे नित्यमव्ययीभावः ।
तत्पुरुष कर्म धारय येनाहं स्यां बहुव्रीहिः ॥

"We are a couple and I have two cows. In my home there is perpetual absence of expenditure. Act in such a way, sir, that I become possessed of a good deal of rice."

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

This is the form in which this stanza is current in Bengal. The Subhāṣitāvali reads the first line thus: द्विगुरपि सद्वन्द्वोऽहं गृहे च मे सततमव्ययीभावः. Peterson translates: Though I have but two cows I have a wife to support, and in my house the outgoing of money is unknown (because there is none to go out): therefore, O man take some steps to make me rich in rice.

कृष्णस्य विग्रहे भाति समासेनाखिलं पदम् ।
इतीव स्मारकं वक्ष्ये समासपदविग्रहम् ॥
सबहुव्रीहिद्विगुतामात्रे लुब्धोऽस्मि सद्वन्द्वः ।
तत्पुरुष कर्मधारय भक्तेर्येनाव्ययीभावः ॥

'I shall speak of compound words and their dissolution, to remind (the reader) as it were (of the fact) that all things shine in epitome in the body of Kriṣṇa.'

'I have got a mate and I am greedy merely of two cows along with a vast quantity of grain. O lord, act in such a way that my devotion may not be fruitless."

षष्ठीतत्पुरुषं रामो बहुव्रीहिं महेश्वरः ।
रामेश्वरपदे ब्रह्मा कर्मधारयमब्रवीत् ॥

After the image of Rāmes'vara had been set up at Setubandha, Nārada asked Rāma, S'iva and Brahmā about the name of the compound. Rāma said: Saṣṭhī-Tatpuruṣa (i.e. lord of Rāma), S'iva said: Bahuvrīhi (he whose lord is Rāma), Brahmā said: Karmadhāraya (Rāma and at the same time S'iva).

अहं च त्वं च राजेन्द्र लोकनाथावुभावपि ।
बहुव्रीहिरहं राजन् षष्ठीतत्पुरुषो भवान् ॥

शार्ङ्गधरपद्धतिः ।

'Both I and you, O great king, are lokanāthas. I am a Bahuvrīhi (he who has the world for his master), while you are a Saṣṭhītatatpuruṣa (he who is master of the world).'

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भाषन्ते वनिता: कलौ प्रतिवचोऽप्रीतिप्रदं स्वामिन-
स्तासां यत् पतिदेवतेति वचनं षष्ठीसमासाश्रितम् ।
लज्जाधर्मभयं न तासु कतिचित् कार्ये यथेच्छं रता
नासाबद्धगवोपमान् निजपतीन् कुर्वन्ति धन्य: कलि: ।।

उद्भटसागर: २।१५१

'Women return unpleasant replies to their husbands in the Kali age. The epithet *pati-devatā* when applied to them is to be dissolved as a **षष्ठीसमास** (the deities of their husbands). In them there is neither shame nor virtue nor fear. Acting according to their own sweet will they turn their husbands into (domesticated) bulls led by the nose. Blessed is Kali !'

स ंशयाय दधतो: सरूपतां
दूरभिन्नफलयो: क्रियां प्रति ।
शब्दशासनविद: समासयो-
र्विग्रहं व्यवससु: स्वरेण ते ।। शिशुपालवध: १४।२४

"The officiating priests conversant with the rules of grammar ascertained by means of accents the correct dissolution of compounds which though far different in their fruits had assumed the same form.'

परार्थव्यासङ्गादुपजहदथ स्वार्थपरता-
मभेदैकत्वं यो वहति गुणभूतेषु सततम् ।
स्वभावाद् यस्यान्त: स्फुरति ललितोदात्तमहिमा
समर्थो यो नित्यं स जयतितरां कोऽपि पुरुष: ।।

Paṇḍitarāja Jagannātha himself says :

अत्र समर्थसूत्रगतमहाभाष्यार्थस्य । तत्र हि "अथ ये वृत्तिं वर्तयन्ति किं त आहु:" इत्यादिना जहत्स्वार्था वृत्तिरजहत्स्वार्था वृत्तिरिति पक्षद्वयं निरूपितम् । तत्रैवोपसर्जनार्थेऽभेदैकत्वस ंख्यापि ध्वनिता । प्रकटीकृता च हरिणा—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

TECHNICAL TERMS AND TECHNIQUE OF

Sanskrit Grammar

A Critical, Comparative and Historical Study

BY

hitish Chandra Chatterji, Sastri, M.A., D. Litt

Lecturer, Calcutta University ;

Formerly Editor, Calcutta Oriental Journal,

Surabharati Oriental Literary Digest, etc., etc.

The **Modern Review** (December, 1950) **says :**

'Honour to whom honour is due. Dr. Chatterji has broken ely new ground in his **Technical Terms and chnique of Sanskrit Grammar** and demonstrated arly that Bengal, though fallen on evil days, can even now duce works on Indology that invite and bear comparison h the best work produced in any part of the world. Who er thought that all the technical terms admitted of satis-tory explanation and who ever imagined that a work on mmatical terminology could be made as delightful as a vel ? In this volume of nearly 350 pages the technical ms of Sanskrit grammar from the Brahmanas, Nirukta, atishakhyas, Panini, Katyayana, Patanjali, down to ayogaratnamala and Harinamamrita have been considered itically and historically in all their bearings and apparently itrary technical terms like *gha*, *bha*, *lat*, *lit*, etc., have en traced to their sources. **We have nothing but dmiration for this masterpiece of scholarship nd warmly recommend it to our readers."**

Price Rupees Ten only. *Foreign Rs. 12/-*

Postage Extra.

VISVANATH CHATTERJI

81, Shyambazar Street,

CALCUTTA—4

Phone : B. B. 4049

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

AMNJUSHA (Sanskrit Monthly Magazine)
Registered No. C. 3278

CANDRA VYAKARANA

Part I (Chapters 1—3).

Critically edited with Vṛtti, corresponding rules of Pāṇini, Bhoja and others, Introduction etc.

By

KSHITISH CHANDRA CHATTERJI, SASTRI, M. A., D. LITT.

Lecturer, Calcutta University ;
Formerly Editor, Calcutta Oriental Journal, Surabharati, Oriental Literary Digest, etc., etc.

Price Rupees Twelve only. *Foreign Rs. 15/-*

A No Bhadriyam

Hymn 1. 89 of the Rigveda with the critically edited commentaries of (1) Veṅkaṭamādhava (2) Skandasvāmin (3) Mahīdhara (4) Sāyaṇa (5) Kās'yapa Kṣitīsacandra unfolding the significance of each word and expression, and extracts from the commentaries of Uvaṭa, Haradatta and others, English translations, critical and explanatory notes, comparisons from other languages etc. etc. Price 2/8/-

MAHABHASHYA

(First Ahnika)

EDITED WITH

English translation, exhaustive critical and explanatory notes, extracts from other commentaries, full Sanskrit explanation of the Vedic mantras etc. etc.

Rupees Five only.

VISVANATH CHATTERJI

81, Shyambazar Street, Calcutta—4

Printed and published by Sri Jyotish Chandra Chatterjee, B.A. from 81, Shyambazar Street, Calcutta—4. Printed at the Elm Press 63, Beadon Street, Calcutta—6.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Approved by the Directors of Public Instruction, Madras, Bihar and Mysore.

श्रीशिवः शरणम्

सप्तम-वर्षे] July, 1953 [एकादशी संख्या

मञ्जूषा

सम्पादकः—श्रीक्षितीशचन्द्र-चट्टोपाध्यायः

Special Articles

Technical terms of Sanskrit Grammar—a comparative study.

Rasamañjari.

Rabindranātha's short story.

A boon to students of languages is **Greek Proverbs** in Roman character with their Latin and English analogues and parallel proverbs and sayings from Sanskrit, Marathi and Bengali. All the grammatical forms have been clearly explained and the student of Sanskrit will not only acquire some knowledge of the glorious Greek language but will be struck with the resemblance it bears to Sanskrit. Some of the forms have been explained over and over again for the benefit of beginners.

Price Rupees Two only.

Office : 81, Shyambazar Street, Calcutta—4

Annual Subscription : Rupees Six only.

This number—Rupees Two.

Foreign—Rupees Nine

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मञ्जूषाया नियमावली

मञ्जूषाया वार्षिकं मूल्यं रूपकषट्कम्। ग्राहकैर्वर्षस्य प्रथमसंख्यात एव ग्रहीतव्यम्।

२। प्रतिसौरमासं दशमदिने (आङ्लमासस्य चतुर्विंशे दिवसे) 81, Shyambazar Street, Calcutta 4 इत्यतो मञ्जूषा प्रकाश्यते।

३। मञ्जूषायास्तावद् भागत्रितयं वर्तते। तत्र प्रथमे भागे देवभाषां प्रविविक्षूणां कृते सरलाः श्लोकाः, आभाणकाः, कथाः, आख्यानानि च सन्निवेश्यन्ते, द्वितीये भागे दार्शनिकाः प्रबन्धाः, व्याकरणालङ्कारादीनां विमर्शाः, पाठविचारः, जिज्ञासा मीमांसा च, पुस्तकपरिचयादयश्च प्रकाश्यन्ते ; तृतीये भागे सानुवादाः पारसीकानां गाथाः, ससंस्कृतानुवादं धम्मपदम्, महाभाष्यम्, समूला भाषावृत्त्यर्थविवृतिर्मुद्र्यन्ते।

काव्यालङ्कारसूत्रवृत्तिः (वामनविरचिता ५।१)

अभिनवविस्तृतटीकोपेता Rs. 2/-

Convocation Address in Ancient India -12-

स्त्रीप्रशंसा—The original slokas of Varāhamihira with a splendid Sanskrit commentary. 1/-

Popular Etymology— Re. 1/-

Homer's Iliad, Book I, Edited with Literal English translation, Sanskrit parallels for students of Sanskrit.

By Dr. Kshitish Chandra Chatterji.

In the Press.

শব্দকথা—সরস সরল ভাষাতত্ত্ব— ২৲

ঊষার আলো—ছোট ছোট হাসির গল্পের সমষ্টি— ৸৹

নক্ষত্রমালা—ধর্মবিষয়ক শ্লোক ও অনুবাদ— ১৷৹

Several complete sets of Vols. IV, V and VI of the Manjusha are still available for Rs. 6/8/- per set and only a few sets of Vols. I-III are available at Rs. 5/12/- for the lot.

श्रीविश्वनाथ-चट्टोपाध्यायः।

८१ श्यामबाजार स्ट्रीट्, कलिकाता ४

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शरणं तरुणेन्दुशेखरः शरणं मे गिरिराजकन्यका ।
शरणं पुनरेव तावुभौ शरणं नान्यदुपैमि दैवतम् ॥

मञ्जूषा

July, 1953	१८७५-शकीयश्रावणस्य ७म-वर्षस्यैकादशी संख्या	Vol. VII No. 11

श्रीमच्छङ्कराचार्यविरचितम्

उपदेशस्तोत्रम्

रज्जुज्ञानाद् भाति रज्जुर्यथाऽहिर्
आत्माज्ञानादात्मनो जीवभावः ।
आप्तोक्त्यादिभ्रान्तिनाशे स रज्जुर्
जीवो नाऽहं देशिकोक्त्या शिवोऽहम् ॥१॥
नाऽहं देहो नेन्द्रियाण्यन्तरङ्गो
नाहङ्कारः प्राणवर्गो न बुद्धिः ।
दारापत्यक्षत्रवित्तादिदूरः
साक्षी नित्यः प्रत्यगात्मा शिवोऽहम् ॥२॥
मत्तो नान्यत्किंचिदत्रास्ति विश्वं
सत्यं बाह्यं वस्तु मायोपक्लृप्तम् ।
आदर्शान्तर्भासमानस्य तुल्यं
मय्यद्वये भाति तद्वच्छिवोऽहम् ॥३॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आभातीदं विश्वमात्मन्यसत्यं
सत्यज्ञानानन्दरूपे विमोहात् ।
निद्रामोहात्स्वप्नवत्तन्न सत्यं
शुद्धः पूर्णो नित्य एकः शिवोऽहम् ॥४॥

नाहं जातो न प्रवृद्धो न नष्टो
देहस्योक्ताः प्राकृताः सर्वधर्माः ।
कर्तृत्वादिश्चिन्मयस्यास्ति नित्यो
नाहङ्कारश्चात्मनो मे शिवोऽहम् ॥५॥

नाहं जातो जन्ममृत्यू कुतो मे
नाहं प्राणः क्षुत्पिपासे कुतो मे ।
नाहं चित्तं शोकमोहौ कुतो मे
नाहं कर्ता बन्धमोक्षौ कुतो मे ॥६॥

इति श्रीमच्छङ्कराचार्यविरचितमुपदेशस्तोत्रं समाप्तम् ॥

उपदेशस्तोत्रमिदं शंकररचितं मनोहरं दिव्यम् ।
पाटणकरवंशोद्भवकृपातनुजेन रघुनाथेन ॥
गुर्जरगजाननोपाध्यायप्रतिमां विलोक्य यत्नेन ।
लिखितं पौषे हि सिते विधुवारे तृतीयायाम् (?) ॥

आभाणकमाला

Gk. Pathein mathein.
Pain is gain.

Lat. Quae nocent docent.
What pains us, trains us.

Gk. Pathe:mata mathe:mata.
Sufferings are lessons.

Gk. Pollakis ta pathe:mata toi:s anthro:pois mathe:mata ginontai.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Sufferings frequently become instruction to men.

प्रायेणेह हि दुःखानि नृणां सुखाय कल्पन्ते ।

"There is a moral improvement rising out of sorrow, which is not gained from enjoyment however blameless."

'Tis held that sorrow makes us wise.' TENNYSON.

Wer nie sein Brot mit Thränen ass,
Wer nie die kummervollen Nächte
Auf seinem Bette weinend sass,
Der kennt euch nicht, ihr himmlichen Mächte.

GOETHE

Who ne'er his bread in sorrow ate,
Who ne'er the mournful midnight hour
Weeping upon his bed has sate,
He knows you not, ye Heavenly powers.

"क्लेशस्याङ्गमदत्त्वा सुखमिह हि सुखानि नोपलभ्यन्ते ।
मधुभिन्मथनायस्तैराश्लिष्यति बाहुभिर्लक्ष्मीम् ॥"

"विपदः सन्तु ताः शश्वत् तत्र तत्र जगद्गुरो ।
भवतो दर्शनं यत् स्यादपुनर्भवदर्शनम् ॥"

"न हि सुखं दुःखैर्विना लभ्यते ।"

(वङ्गीयः) कष्ट ना करिले केष्ट पाय ना ।

न खल्वन्तरेण क्लेशमधिगम्यते कृष्णः ।

मुक्तेरभ्युपायः

[कवीन्द्र-रवीन्द्रनाथ-ठाकुरः]

(पूर्वतोऽनुवर्तते)

फकिरः सर्वथा भीतचकितोऽवदत्, शान्तं पापम् । श्रवणेनाप्यस्य भीतिरुपजायते इति ।

इदानीं तावत् प्रकृतो व्यापारो बोधगम्यः सञ्जातः । सोऽचिन्तयत्, को दोषः ? दिनकतिपयं कृतस्य गुप्तभावेनात्र निगूढमवस्थातव्यम्,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ततश्चान्वेषणे विफलप्रयासेन पित्रा प्रतिगतमात्र एवेतः पलायिष्ये इति।

फकिरं निरुत्तरं दृष्टवतो वृद्धस्य मानसे संशयलेशोऽपि नावाशिष्यत। कृष्णाख्यं भृत्यमाहूयावदत्, रे कृष्ण, सर्वेषां सविधे गत्वा निवेद्यताम् —मदीयो माखनः प्रत्यावृत्त इति।

स्वल्पीयसैव कालेन लोकारण्यं संवृत्तम्। पल्लीस्था जनाः प्रायेणावदन्, स एवेति। केचित् पुनः संशयं प्राकटयन्। परं विश्वसितुमेव जनास्तथा व्यग्रा यथा सन्दिहानेभ्यः सर्वे निरतिशयं प्रकुपिताः। ते हि स्वेच्छया केवलं रसभङ्गं विधातुं समागता इव, ते हि पल्लीस्थानामष्टाक्षरा अनुष्टुभो द्वादशाक्षरा विहितवन्त इव, येन केनापि प्रकारेणैतेषां संक्षेपं विधायैव सर्वा पल्ली निर्वृतिं लभेत। न खलु ते भूतेषु विश्वसन्ति, न वा भूतापसारकेषु प्रतियन्ति। अत्यद्भुताख्यानसमाकर्णनेन यदा सर्वे विस्मयविमूढचेतसस्तदैव ते प्रश्नमुत्थापयन्ति। एते हि प्रकारान्तरेण नास्तिका एव। परं भूतेष्वविश्वासश्चेद् विशेषतो हानिर्नास्ति, वृद्धस्य पितुनष्टप्रत्यागते पुत्रेऽविश्वासः पुनर्हृदयहीनतायाः परा काष्ठा। सर्वेषां सविधे ताडनानि लब्ध्वा सांशयिकानां समाजो व्यरमत्।

फकिरस्यातिभीषणमविचाल्यं गाम्भीर्यं सर्वथाविगणय्य पल्लीस्थाः सर्वे तस्य समन्तात् समुपविष्टा अवदन्, अरे रे, स एवास्माकं फकिरोऽद्य ऋषिः संवृत्तः, तपस्वी संवृत्तः, आजीवनं येन वयस्यैः साकं नर्मालापेषु नियोजित आत्मा, स एवाद्य सहसा महामुनिजमदग्निरूपेणाधिष्ठित इति।

वचनमिदं समुन्नतचेतसः फकिरस्य नितरामुद्वेजकमेवासीत्, परमुपायाभावादगतिकतया तेन विसोढम्। कश्चन तस्य गात्रेषु निपत्यावदत्, रे माखन, त्वं तावद् भ्रमरकृष्ण एवासीः, कथं वा त्वयैवं गौरत्वमापादितो वर्णः? इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

फकिरेण प्रत्युक्तम्—योगाभ्यासेनेति।

Digitized by Arya Samaj Foundation Chennai and eGangotri

सर्वैरुक्तम्—अहो प्रभावो योगस्येति !

एकेन प्रत्युक्तम्—किमिवात्राश्चर्यम् ? यदा तावद् भीमसेनो हनूमतो लाङ्गूलं धृत्वोत्थापयितुं प्रायतत, कथमपि न प्रबभूवोत्तोलयितुम्। कथं वा तत् संवृत्तम् ? तत् खलु योगबलेनैव।

सर्वैरेवैतदनिच्छद्भिरपि स्वीकृतम्।

अवसरे चास्मिन् षष्ठीचरणस्तत्रागत्य फकिरमुक्तवान्—वत्स, सकृदन्तःपुरमागन्तव्यमिति।

सम्भावनेयं फकिरस्य मनसि नोदिता, सहसा पविपात इव प्राविशन्मस्तिष्कम्। सुचिरं तूष्णीं स्थित्वा पौराणां बहुतरानन्याय्यान् परिहासान् अङ्गेषु जरयित्वान्ततोऽवदत्, तात, मया तावत् सन्न्यासः स्वीकृतः, नालमस्म्यन्तःपुरं प्रवेष्टुमिति।

षष्ठीचरणः पौरान् सम्बोध्यावदत्, तर्हि भवद्भिः सकृद् गात्रोत्थानं विधातव्यम्। वधूमातरावत्रैवानयामि। अतिमात्रं व्याकुले ते सञ्जाते इति।

सर्व उत्थाय प्रातिष्ठन्त। फकिरोऽचिन्तयत्, अत्रान्तरे इतो धावामीति। परं रथ्यायां निर्गतमात्रमेव मां पल्लास्थाः सर्वऽनुधावेयुरिति विचिन्त्य तेनागत्या तूष्णीं स्थितम्।

प्रविष्टमात्रयोरेव माखनलालस्य पत्न्योः फकिरोऽवनतशिराः प्रणम्यावदत्, मातरौ, अहं खलु भवत्योस्तनय इति।

तदात्व एव फकिरस्य नासिकायाः पुरतः परिहितवलयः करविशेषः खड्ग इव विक्रीडितः, कांस्यविनिन्दितेन च कण्ठविशेषेण वादित्रध्वनिर्विहितः, अरे रे दग्धललाट पुरुषापसद, का वा त्वया मातृपदेन सम्बोधिता इति। तदात्व एव स्वरद्वयेनोच्चैस्तरस्य कण्ठान्तरस्य पल्लीं कम्पयन् झङ्कारः समुद्भूतः—अपि भक्षयित्वा चक्षुषो मस्तकमवतिष्ठसे ? किमिति मरणं ते न भवति ? इति।

न खलु स्वस्याः पत्न्या वदनत एवंविधं प्राकृतवचनं कदापि तेन श्रुतम्, अत एव सविशेषं कातरः फकिरः कृताञ्जलिरवदत्,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भ्रान्ते भवत्यौ। अहं तावत् अत्रालोके तिष्ठामि, अवधानेन मां निरीक्षेताम् इति।

प्रथमा द्वितीया च क्रमेणावदताम्, बहुशो निरीक्षितम्। निरीक्षणेन चक्षुषोः क्षयः सञ्जातः। न खलु त्वं शिशुरसि, न खल्वद्यैव प्रत्यग्रं भूमिष्ठोऽसि। भूयान् कालो व्यतीतस्ते दुग्धदन्तस्य विगलितस्य। वर्तते वा वयसस्ते वृक्षप्रस्तरम् (=इयत्तया परिच्छेदः)? यमेन विस्मृतोऽसीति किमस्माभिरपि विस्मर्येथाः? इति।

ईदृश एकपक्षीयो दाम्पत्यालापः कियन्तं कालं प्रासरिष्यदिति वक्तुं न शक्यते, फकिरो हि सर्वथा वाक्शक्तिविरहितो नतशिरा अवतस्थे इति। अत्रान्तरे निरतिशयं कोलाहलं समाकर्ण्य पथि च जनसंमर्दं सन्निरीक्ष्य षष्ठीचरणः प्राविशत्, अवदच्च, इयन्ति दिनानि गृहं मे स्तब्धमेवासीत्, लेशतोऽपि शब्दो नासीत्, काममद्य प्रतीयते माखनो मे प्रत्यावृत्त इति।

फकिरः कृताञ्जलिपुटमवदत्, आर्य, भवतः पुत्रवध्वो र्हस्ततस्त्रायस्व मामिति।

षष्ठी। वत्स, बहोः कालादनन्तरमायातोऽसीति प्रथमतः कथञ्चिदसह्यमिव प्रतीयते। तद् वत्से, इदानीं युवामभ्यन्तरं प्रविशतम्। वत्सो माखनः साम्प्रतमत्रैव स्थितः, कथमप्येतं गन्तुं न ददामि।

गते ललनाद्वये फकिरः षष्ठीचरणमवदत्, आर्य, भवतः पुत्रेण कथं गृहं परित्यज्य गतं तदहं सर्वथानुभवामि। आर्य, गृहाण मे प्रणामम्, चलितोऽस्मि इति।

वृद्धस्तथोच्चैः क्रन्दनध्वनिमुदस्थापयद् यथा पल्लीस्थाः सर्वेऽमन्यन्त माखनः पितरं ताडितवानिति। ते हि ससम्भ्रमं द्रुतं समापतन्। समीपञ्चागम्य फकिरं व्यज्ञापयन्, न खलु भण्डतपस्वित्वमत्र प्रसरेत्। सज्जनस्य तनयेनेवात्र कालो नेयः। इति। एकेनोक्तम्, न खल्वत्र भवान् परमहंसः, परं परमबकः। इति।

गाम्भीर्यस्य, श्मश्रुणः, गलत्राणस्य च प्रभावेणैवंविधं कुत्सितं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वचनजालं पूर्वं फकिरेण कदापि न श्रुतम्। यद् वा भवतु, मा तावज्जनोऽयं पुनः पलायिष्टेति पल्लीस्थाः सर्वेऽतीव सावधाना अवर्तन्त। स्वयं भूस्वामी षष्ठीचरणस्य पक्षमवलम्बितवान्।

६

फकिरोऽपश्यत्, रक्षणं तथा कठोरं यथानपेतेषु प्राणेषु ते तं गृहाद् बहिर्नानेष्यतीति। एकाक्येव गृहेऽवस्थाय गातुमुपचक्रमे—

श्रृणु साधोरुक्तिं यन मुक्ति-
स्तां सुयुक्तिं स्वीकुरु भोः। इति।

गीतस्यास्याध्यात्मिकोऽर्थः क्षीणतरः सञ्जात इति नैतत् पृथग् वक्तुमावश्यकम्।

एवमपि कथञ्चिद् दिनानि व्यगमिष्यन्, परं माखनस्यागमनवार्तामुपश्रुत्य पत्नीद्वयस्य सम्पर्केण श्यालकानां श्यालिकानां च निचयस्तत्र समुपस्थितः।

आगत्यैव ते प्रथमतस्तावत् फकिरस्य श्मश्रु समाकर्षन्। उक्तं च तैः—न खलु पारमार्थिकमिदं श्मश्रु, छद्मवेषविधानार्थं लेपेन संयोजितमिति। नासिकानिम्नवर्तिनः श्मश्रुणः पुनः पुनः समाकर्षणेन फकिरेणेवातिमहतापि पुरुषेण महात्म्यरक्षणं दुष्करं भवति। किञ्च, कर्णयोरपि निकार आसीत्, प्रथमतो मर्दनेन, द्वितीयतस्तथाविधाया भाषायाः प्रयोगेण—यया किल मर्दनमन्तरेणैव लौहित्यमासजति कर्णयोः।

ततश्च फकिरं ते तथाविधानां गीतानां गानाय समादिशन् येषामाध्यात्मिकव्याख्यानाविष्करणात् पण्डितप्रकाण्डा अपि पराजयन्ते। किञ्च, निद्रावसरे फकिरस्य स्वल्पावशेषं गण्डस्थलं चूर्णेन मस्या च लिप्तवन्तः, भोजनवेलायां कसेरुकस्य स्थाने कचुकस्य, नारिकेलसलिलस्य स्थाने ताम्रकूटसलिलस्य, दुग्धस्य स्थाने निष्पिष्टार्द्रतण्डुलरसस्यायोजनं विहितम्। पीठस्याधस्तात् पूगानां संरक्षणेन तस्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पातनं निष्पादितम्। लाङ्गूलं विनिर्मितम्, प्रचलितानां चोपायानां सहस्रेण फकिरस्याभ्रभेदि गाम्भीर्यं भूमिसात् कृतम्।

न खलु फकिरः क्रोधेन वा स्फुरणेन वा स्फीत्या वा झङ्कारेण वाऽऽक्रोशेन वा कथमपि निकर्तॄणां मनःसु प्राभवद् भीतिं सञ्चारयितुम्। केवलं सर्वेषामेव पुरतः समधिकं हास्यास्पदमभवत्। किञ्च गण्डस्योपरि पिण्डकः संवृत्तः। अन्तरान्तरान्तरालात् कस्यचिन्मधुरकण्ठस्योच्चैर्हासः श्रवणसरणिं न्यपतत्। स च परिचित इव प्रत्यभात्, मानसञ्च द्विगुणमधैर्यमभवत्।

परिचितोऽयं कण्ठो न खल्वपरिचितः पाठकानाम्। अत्रैतदेव वचनं पर्याप्तं स्याद् यत् षष्ठीचरणः सम्पर्कविशेषेण हैमवत्या मातुल इति। विवाहादनन्तरं श्वश्र्वा नितरां निगृहीता मातापितृहीना हैमवत्यन्तरान्तरा कुटुम्बविशेषाणां गृहेष्वाश्रयं स्वीचक्रे। बहोः कालादनन्तरं मातुलालयमागत्य नेपथ्यतोऽसौ परमकौतुकावहमभिनयविशेषं निरीक्षते स्म। तदानीं च हैमवत्या नैसर्गिक्या रङ्गप्रियतया साकं प्रतिहिंसाप्रवृत्तेरपि समुद्रेकः सञ्जातो वा न वेत्यत्र चरित्रतत्त्वज्ञा विपश्चित एव प्रमाणम्, नालं वयं तन्निर्णेतुम्।

नर्मसम्पर्कीया अन्तरान्तरा व्यश्राम्यन्, स्नेहसम्पर्कीयाणां हस्तात् परित्राणलाभः पुनर्दुष्कर एव, सप्त दुहितरः पुत्रश्चैको दण्डमात्रमपि तं न त्यजन्ति। पितुः स्नेहस्याधिकाराय मातरौ तेषामनुक्षणं तान् न्ययुञ्जाताम्। द्वयोश्च मात्रोः सङ्घर्ष आसीत्। यथा स्व एव सन्तानः समधिकं समादरमभिविन्देत तथोभे एव प्रायतेताम्। उभाभ्यामेव स्वे स्वे सन्तानाः समुत्तेज्यन्ते स्म – द्वौ च पक्षौ युगपदेव पितुः कण्ठग्रहणाङ्कोपवेशनमुखचुम्बनादि-प्रबलस्नेहाभिव्यक्तिव्यापारेषु परस्परं जेतुं प्रायस्यताम्।

एतत्त्वकथितमपि ज्ञायते यत् पुरुषोऽयं फकिरो नितान्तत एव निर्लिप्तप्रकृतिकः, अन्यथा नैवालमभविष्यदसावनायासेनैव स्वपुत्रौ परित्यज्यागन्तुम्। न खलु शिशवो जानन्ति भक्तिं प्रकटयि-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तुम्, नैव शिक्षितस्तैः साधुत्वेनात्मनोऽभिभवः, अत एव शिशुजातौ फकिरस्य लेशतोऽप्यनुरागो नासीत्। स खलु कीटपिपीलकमिव तान् स्वदेहाद्दूरत एव स्थापयितुं समीहते स्म। साम्प्रतञ्चासावहरहः शिशुपतङ्गपाल्या समाच्छन्नः वज्र्जाइसाक्षरमुद्रितस्वल्पबृहत्पादटीकाभिरान्तं समाकीर्ण ऐतिहासिकः प्रबन्ध इव व्यशोभत। तेषां च वयोगतमतिमात्रं तारतम्यमासीत्, नापि च सर्व एव ते तेन साकं वयःप्राप्तसभ्यजनोचितं व्यवहारं व्यदधुः, एतेन च शुचेः शुद्धस्य फकिरस्य नयनयोरश्रुणः सञ्चारः समजायत, न च तदानन्दजमश्रु।

यदा तावत् परकीयास्तनया विविधेन गीतस्वरेण तं तात तात इत्याह्वयन्, अश्लिष्यन्, तदा साङ्घातिक्याः पाशवशक्त्याः प्रयोगे तस्य तीव्राकाङ्क्षा समजायत, भयात् तु तथा कर्तुं न प्रबभव, वदननयनं विकृतं विधाय तूष्णीमेवावतस्थे।

७

अन्ततश्च फकिरस्तारस्वरेणोदघोषयत्, गमिष्याम्येवाहम्। पश्यामि तावत् को मां रोद्धुं प्रभवेदिति।

ततश्च ग्रामवासिनो व्यवहाराजीवमेकमुपास्थापयत्। व्यवहाराजीवश्चोपागम्यावदत्, अपि, ज्ञायते भवता, द्वे पत्न्यौ भवत इति।

फकिरः। आर्य, अत्रागत्यैव प्रथममेतज् ज्ञातम्।

व्यवहाराजीवः। किञ्च, भवतः सप्त दुहितरः पुत्रश्चैकः, तेषाञ्च द्वे दुहितरौ विवाहयोग्ये।

फकिरः। आर्य, भवान् किल मत्तोऽप्यतिमात्रमधिकतरं विजानातीति पश्यामि।

व्यवहाराजीवः। बृहतोऽस्य भवतः परिवारस्य भरणपोषणस्य भारो भवता चेन्न स्वीक्रियते, तर्ह्यनाथाभ्यां पत्नीभ्यां धर्माधिकरणमाश्रयिष्यत इति पूर्वत एव मयोच्यते।

फकिरः सर्वत एव धर्माधिकरणादेवाधिकतरं बिभेति स्म। तेन

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

खलु विज्ञातं व्यवहाराजीवाः पर्यनुयोगावसरे महापुरुषाणां सम्मान-प्रतिपत्तिगाम्भीर्याणि न विगणयन्ति, प्रकाशमेव तानवमन्यन्ते, वृत्तान्त-पत्रेषु च तद्विवरणं प्रकटयते। फकिरोऽश्रुसिक्तलोचनः सविस्तर-मात्मपरिचयं दातुं प्रायतत—व्यवहाराजीवस्तस्य चातुर्याः, तस्य प्रतिभायाः, तस्य मृषाकथारचनायामनितरसाधारणस्य प्रावीण्यस्य भूयोभूयः प्रशंसावादमकरोत्। तच्छ्रवणेन फकिरस्य स्वपाणिपाद-दंशनस्येच्छा प्रादुरभूत्।

षष्ठीचरणः फकिरं पुनरपि पलायनोद्यतं दृष्ट्वा शोकेनाधीरः समजायत। ग्रामीणाः सर्वे तं समन्तात् परिवृत्याजस्रं गालिवर्षणं व्यदधुः, व्यवहाराजीवश्च तं तथाभीषयत यथा न प्रासरत् तस्य वदनकमलतो वाणी।

तत्रापि यदाष्टौ बालका बालिकाश्च गाढस्नेहेन तं समन्तात् समाश्लिष्य तस्य श्वासरोधं कर्तुं प्रवृत्तास्तदान्तरालस्थिता हैमवती हसनीयं वा रोदनीयं वेति निर्णेतुं न प्राभवत्।

उपायान्तरमलभमानः फकिर इतःपूर्वमेव पित्रे पत्रमेकं विलिख्यात्मनः समवस्थां निवेदितवान्। तत् पत्रमुपलभ्य फकिरस्य पिता हरिचरण-महोदयोऽद्य समुपस्थितः, ग्रामीणा भूस्वामी व्यवहाराजीवश्च कथमपि स्वाधिकारं न परितत्यजुः।

न खलु पुरुषोऽयं फकिरः परं माखन इत्युक्ते तैः सहस्रमखण्ड-नीयानि प्रमाणान्युपन्यस्तानि। किं बहुना यया किल धात्र्या माखनः शैशवादारभ्य परिपोषितः सापि जरतिका तत्रोपस्थापिता। सा किल कम्पमानकरेण फकिरस्य चिबुकमुन्नमय्य वदनं निरीक्ष्य तस्य श्मश्रुणि दरविगलितधारयाऽश्रूणि मुमोच।

यदा तावद् दृष्टं तथापि फकिरो न शक्यते नियन्त्रयितुं रश्मि-भिस्तदावगुण्ठनप्रावृतवदने पत्न्यावुपातिष्ठेताम्। ग्रामीणाः सर्वे ससम्भ्रमं गृहाद्बहिः प्रस्थिताः। केवलं पितरौ फकिरः शिशवश्च कक्षेऽवस्थिताः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पत्न्यौ तावत् पाणी विहरन्त्यौ फकिरमपृच्छताम्, कस्याश्चिताया आरोहणे, यमस्य कतमस्मिन् द्वारे गमने, वाञ्छा ते सञ्जातेति।

न खलु फकिरो विनिर्दिश्य वक्तुं प्राभवत्, अत एव तूष्णीमेवावस्थितः। परन्तु तस्याकारेणेङ्गितेन च प्रतीयते स्म न खलु यमस्य कस्मिन्नपि द्वारविशेषे तस्य विशेषतः पक्षपातोऽस्तीति। तदात्वे यत् किमपि द्वारं लब्ध्वा स प्रत्यागतप्राणः स्यात्, केवलं सकृद् बहिर्गमनमेवापेक्षते।

अवसरे चास्मिन्नपरा रमणीमूर्तिर्गृहं प्रविश्य फकिरं प्रणनाम। फकिरः प्रथमतो विस्मयस्तब्धवचनस्ततश्च हर्षोत्फुल्ललोचनोऽवदत्, अहो, एषा हैमवतीति।

पत्न्याः सन्दर्शनेनैतादृशं प्रेमेतः पूर्वं कदापि तस्य नयनयोर्न प्रकटितम्। सोऽमन्यत मुक्तिः स्वयं मूर्त्तिं परिगृह्य समागतेति।

अपरोऽपि पुरुषो महार्घोत्तरीयप्रावृतवदनोऽन्तरालाद् व्यतिकरमिमं संपश्यन् स्थितः। अपरिचितं निर्विरोधं पुरुषं स्वपदेऽभिषिक्तं दृष्ट्वयन्तं कालं स परमं सुखमनुभवति स्म। अन्ततश्च हैमवतीमुपस्थितां दृष्ट्वाबुध्यत—प्रोक्तपूर्वोऽनपराधः पुरुषः स्वस्यैव भगिनीपतिरिति। ततश्च दयापरतन्त्रः प्रकोष्ठं प्रविश्यावदत्, मा तावत्। स्वजनस्येदृश्यां विपदि पातनं महापातकमेव। पत्न्यौ चाङ्गुलिभ्यां विनिर्दिशन्नुवाच—एषा मे रज्जुः, एषा मे कलशीति।

माखनलालस्यानेनासाधारणेन महत्त्वेन वीरत्वेन च प्रतिवेशिनो विस्मयमुपगताः।

कुमारसम्भवपाठ-विमर्शः

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

सहृदयाः, विदितमेवैतद्भवतां यत् कुमारसम्भव-समाख्ये काव्यरत्ने कविकुलचूडामणिना कालिदासेन वैदिकं त्रियम्बकपदं प्रायोजीति। तथाहि तत्र तृतीयसर्गस्य ४४ तमः श्लोकः—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स देवदारुद्रुमवेदिकायां
शार्दूलचर्मव्यवधानवत्याम् ।
आसीनमासन्नशरीरपात-
स्त्रियम्बकं संयमिनं ददर्श ।। ३।४४

इति। अत्रारुणगिरिनाथेनोक्तम्—त्रियम्बकमिति यणादेशे प्राप्तेऽपि छन्दोभङ्गे छन्दोविचितिकारैरियङुवङादेशस्योक्तत्वादियङादेशः। प्रपञ्चितं चेदं नारायणेन—त्रियम्बकमित्यत्र यणादेशे प्राप्ते छन्दोभङ्गप्रसङ्गे छन्दोविचितिकारैरियङुवङादेशयोर्विहितत्वादियङादेशः। 'त्रियम्बकान्नान्यमुपास्थितासौ'* इति भर्तृहरिप्रयोगाच्च नायं दोष इति। मल्लिनाथ-सूरिणाप्युक्तम्—"त्र्यम्बकमित्युक्ते पादपूरणव्यत्यासात् त्रियम्बकमिति पादपूरणार्थोऽयमियङादेशश्छान्दसः, महाकविप्रयोगादभियुक्तैरङ्गीकृतः। केचित् साहसिकाः त्रिलोचनमिति पेठुः।" इति। रामगोविन्दसिद्धान्तवागीशेन "तं त्र्यम्बकम्" इति पाठोऽङ्गीकृतः। अयमेव पाठश्चारित्रवर्धनस्यापि सम्मतः।

अत्र च प्रयोगे बीजं "त्रियम्बकं यजामहे" इति प्रसिद्धतमो मन्त्र इति प्रतिभाति। "अचि श्नु-धातु-भ्रुवां य्वोरियङुवङौ" [६।४।७७] इति सूत्रे वार्त्तिकम्—"इयङादिप्रकरणे तन्वादीनां छन्दसि बहुलम्" इति। तत्र च भाष्यम्—"तन्वं पुषेम। तनुवं पुषेम। विष्वं पुषेम। विषुवं पुषेम। त्र्यम्बकं यजामहे। त्रियम्बकं यजामहे" इति।

घटिकायन्त्रम्

प्रारब्धः पूजावकाशः। वामदेवेन कलिकातातो मेदिनीपुरे स्वगृहं प्रस्थितम्। धूमशकटे काष्ठासने निषण्णोऽसौ वृत्तान्तपत्रं वाचयति।

* सुप्रसिद्धं भट्टिकाव्यं भर्तृहरिप्रणीतमित्यभिमानः। "न त्र्यम्बकादन्यमुपास्थितासौ" इत्येव पाठः प्रायेणोपलभ्यते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तस्यैव काष्ठासनस्यापरस्मिन् प्रान्ते कश्चन रमणीयदर्शनस्तरुणो निरन्तरं शिरः सञ्चालयन् टिक् टिक् टिक् टिक् टिक् टिक् टिक् टिक् इति वदन्नास्ते। कियतश्चित् कालादनन्तरं नितरामुद्वेजितो वामदेवो युवानमवदत्, महाभाग, कामं स्वाधीनेऽस्मिन् भारते वर्षे सर्वेषामेव वचनेऽनुष्ठाने च स्वातन्त्र्यं वर्तते, अत एव भवतापि यत्किञ्चिदपि वक्तुं शक्यते। तथाप्यनवरतं टिक् टिक् शब्देन खिद्यते मे श्रवणयुगलम्। न चद्रहस्यं श्रोतुमिच्छामि किमिति भवतैवमाचर्यते इति।

तरुणनोक्तम्—टिक् टिक् टिक् टिक् अहं तावद् घटिकायन्त्रम्। टिक् टिक् टिक् टिक्।

उच्यतां तर्हि कः कालोऽयमिति।

..षड्वादनतो दश निमेषा अवशिष्यन्ते।..

वामदेवेन मणिबन्धस्थितं घटिकायन्त्रं निरीक्ष्योक्तम्, नहि नहि पञ्चैव निमेषा अवशिष्यन्त इति।

अहो मन्दगमनोऽस्मि संवृत्तः! टिक्टिक्टिक्टिक्टिक्टिक्टिक्....।

महाभाष्यार्थविमर्शः

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

ह्म्यन्तक्षणश्वसजागृणिश्व्येदिताम् [७।२।५] इति सूत्रस्य भाष्ये दृश्यते—

यदा पुनर्दन्ता अपतंस्तदा वरुणेन प्रतिबोधितः सविनयमपेक्षते स्म—"पुनर्दन्ता जायन्ताम् । यतः पुनरुत्पन्नानामेव दन्तानां स्थिरत्वेन सम्पूर्णावयवत्वात् पशुः शुद्धो भवति" इति । एवं तदा तदा वरुणं प्रतिवाक्येनैव समाधित्सुः पुत्रवत्सलः सः "पुत्रः क्षत्रियोचितधनुर्बाणकवचादियुक्तो भवतु, ततस्त्वां यजानि" इत्यवोचत् ॥

ततः क्षत्रियोचितसन्नाहप्राप्तेः परं वरुणोक्तिमभ्युपगम्य स्वप्रतिज्ञां कथंचित्सिषाधयिषुः हरिश्चन्द्रः पुत्रमामन्त्रयामास । दूरादेव प्रणमन्तं रोहितं शिरस्युपाघ्राय सविलक्षस्मितमाबभाषे,—वत्स ! अयमेव वरुणो मह्यं त्वां पुत्ररूपेण दत्तवान् ।

रोहितः । बाढं, ज्ञायते ।

हरिश्चन्द्रः । वत्स ! त्वत्प्राप्तये देवेऽस्मिन्प्रार्थना कृता ।

रोहितः । कीदृशी प्रार्थना ?

हरिश्चन्द्रः । पुत्रो मे जायताम् । ततस्तेन ·······कथमुपरि न स्फुरति । हन्त ! कुत्राहं वर्ते ? देव प्रसीद !

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रोहितः। तात! किमिदम्? असमये विषादस्तव संशयं जनयति। मनः समाधीयताम्। प्रार्थनां श्रावय।

हरिश्चन्द्रः। किं वदामि? सर्वथा दुष्टोऽहम्। यत्त्वया पुत्रेण वरुणं प्रति यागरूपां पूजां करवाणि।

रोहितः। श्रुता प्रार्थना। "इत्थमात्मकृतमप्रतिहतं चापलं दहति।" अलमहमात्मरक्षणाय।

एवं स रोहितः पितुर्वाक्यं निषिध्य आत्मरक्षणार्थं धनुरादाय अरण्यं प्रत्युपगतोऽभूत्। संवत्सरपर्यन्तं कस्मिंश्चिदरण्ये चचार।

पुत्रप्रवासेन हरिश्चन्द्रस्य सर्वं शून्यमदृश्यत। दिनचर्यापि तस्य क्लिष्टाऽऽसीत्। कथमपि परिवारप्रार्थनया तत्तत्परिचिनोति स्म। वरुणोऽपि पितृपुत्रयोर्विवादमसहमानः स्वयमुपशान्तामर्षोऽपि सत्यधर्मप्रतिष्ठापनाय स्वार्थे कदाचिन्न व्यतिषजति, नापि न व्यतिषजति स्म।

समुद्रस्योर्मिमालेव द्वादशमासी, सझङ्कारमान्दोलयन्ती हरिश्चन्द्रम्, कुत्राप्यपासरत्। सम्पत्सम्पदं विपद्विपदमनुबध्नातीति न्यायेन तत्रापि वरुणमानससृष्टः भयानको नक्र इव महोदरनामकरोगः भीमरूपः हरिश्चन्द्रमजीगलत्। हन्त! वरुणेन गृहीतस्य तस्योदरं जलेन पूरितमुच्छूनमजनि। तच्च सर्वमरण्ये स्थितो रोहितः मनुष्यमुखाच्छुश्राव नितरां विषण्णश्च स रोहितः पितरं द्रष्टुमरण्याद् ग्रामं प्रतस्थे। तदाऽऽत्मनः स्वार्थिता, साहसिकता च तं पर्यदेवयताम्॥

प्रस्थितं तं मध्येमार्गमिन्द्रः ब्राह्मणवेषेण प्रच्छन्नरूपः समागत्येदमाबभाषे—"भद्रमुख! एकत्रैव निवासशीलस्यानाश्रान्तस्य बहुविधा श्रीर्नास्तीति नीतिकुशला वदन्ति। विद्यादिभिः श्रेष्ठोऽपि बन्धुगृहेषु सदावस्थितस्तैरवज्ञातः तुच्छो मन्येत मानुषः। अतस्तव पितुर्गृहे न वासो युक्तः। अरण्ये चरतस्तव सहायो नास्तीति मा शङ्किष्ठाः, परमेश्वर एव ते सहायो भविष्यति। अतः अरण्ये एव चर" इति॥

ब्राह्मणोऽयमरण्ये चरैवेत्येवं मामुक्तवानिति तद्वाक्ये महान्तमादरं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कृत्वा, पुनरप्येकं संवत्सरमरण्ये चरित्वा पश्चाद् ग्राममागच्छन्तं रोहितं यथापूर्वमिन्द्र आगत्यैवमुवाच—"सौम्य ! चरतः पुरुषस्य जङ्घे श्रमजयेन पूज्ये भवतः। यथा वर्धमानो वृक्षः कालेन फलानि गृह्णाति, एवं चरतः पुरुषस्य मध्यदेशो वर्धिष्णुः आरोग्यरूपं फलं गृह्णाति। किं च चरतः सर्वे पाप्मानः प्रकृष्टतत्तत्तीर्थक्षेत्रादिषु देवतादिदर्शनेन विनाशिता भवन्ति। तस्मात्सर्वथा अरण्ये चर। मा पितुर्गृह-मधिवात्सीः" इति।

पुनरप्यरण्ये अपरं संवत्सरमुषित्वा प्रत्यायान्तमिन्द्रः, 'सौभाग्यमुप-विष्टस्य न वर्धते, अपि तु क्षीयते। अतः पर्यटनं कुरु। निद्रातत्परि-त्यागोत्थानसंचर ख्याश्चत्वारः पुरुषावस्थाः। ताश्चोत्तरोत्तरश्रेष्ठत्वात् कलिद्वापरत्रेताकृतयगैः समानाः। एवं च चरणस्य सर्वोत्तमत्वात् चरैव" इति व्याजहार।

सकृदपि प्रतिहतप्रयाणः विषीदन्नपि ब्राह्मणवाक्यप्रत्ययादपरं संवत्सरमरण्ये चचार। ततः कदाचित्प्रस्थास्यमान इन्द्रेण सादरमवोचि —"सत्यव्रत ! विजयी भूयाः। इतः सूर्यं पश्य। सर्वत्र चरन्नप्ययं न कदाप्यलसो भवति। किं बहुना ! अस्य जगद्वन्द्यत्वं पर्यटनेनैव दिवारात्रम्। अतस्तद्वत् त्वं पर्यटनेन जगत्पूज्यो भूयाः" इति॥

एवमुपदिष्टः स रोहितः षष्ठं संवत्सरमरण्ये संचरन् एकदा अजीगर्तनामकं सुयवसपुत्रमृषिं दारिद्र्यपरिभूतमद्राक्षीत्। तस्य चर्षेः गार्हस्थ्यं यथावदनुचरतः, शुनःपुच्छशुनश्शेपशुनोलाङ्गूलनामान-स्त्रयः पुत्रा आसन्। समयेऽस्मिन् स्वकार्यं सिषाधयिषू रोहितः पुत्र-वन्तं तमृषिं सप्रश्रयमेवमुवाच। "महर्षे, महातपस्विनोऽपि भवतः अतीव दुर्गतत्वमनुभवामि। अतः प्रार्थये—यदि न प्रत्यवायः, मया दास्यमानेन गोशतेन आत्मनो दारिद्र्यमपोह्यताम्। तथा गोशत-प्रतिरूपपुत्रप्रदानेन मम वरुणान्निष्क्रयश्च सम्पाद्यताम्। एवं चेत् 'आम्राश्च सिक्ताः पितरश्च तृप्ता एका क्रिया द्व्यर्थकरी बभूव' इति आभाणकः सार्थको भवति।" इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एवमुक्तः सोऽजीगर्तः ज्येष्ठपुत्रं हस्तेन परामृशन् रोहितमुवाच। "सार्वभौम ! यत्सत्यमात्मनो दौर्गत्यं, भवतः प्रार्थनां चानुचिन्त्य दीयेताप्यस्मत्पुत्रेष्वन्यतमः। अपि तु नाहमिच्छामि अनेन कनीनिकयेव मम ज्येष्ठपुत्रेण भवतो गोशतं प्रतिनिर्यातयितुम्" इति॥ सहधर्मिणी च तस्य कनिष्ठं शुनोलाङ्गूलं हस्तेन गृहीत्वैवमभाषत।— "भद्र ! नूनं भवतः प्रार्थना अङ्गीक्रियते। 'लभेत वा प्रार्थयिता न वा श्रियं श्रिया दुरापः कथमीप्सितो भवेत् ?' किं तु कुमारोऽयं मम सर्वथा न दीयते" इति॥

पारिशेष्यात् मध्यमः पुत्रः शुनश्शेपः दातव्यतया अभ्युपगतः। हन्त ! किं नाम न कारयतीयं निर्धनता ? यत्पुत्रोऽपि गोशतेन विक्रीयते। अथवा विधेः प्रभावः। सत्यं खलूच्यते 'नैव खल्विह मर्त्येषु स्वतन्त्रः कोऽपि वर्तते। मनुजो दास एवात्र नियतेर्वा धनस्य वा॥" इति। अथवा दुर्घटा मध्यस्थता ! अत एव नाम किं समानयोगक्षमेषु पञ्चस्वपि पाण्डुतनयेषु मध्यम एव सिद्धये वनं गन्तुमन्वशिष्यत नारदेन ?

शुनश्शेपो रोहितमनुसरन्मनस्यचिन्तयत्—भ्रातराविवाहमपि प्रतीष्ट एव पितुः। विद्यया विनयेन च सम एव भ्रात्रोः। तत्किं मामनाथमिव दातुमुद्युक्तौ ? अथवा किमेतेन दुर्विचारेण ? सर्वथा मम भाग्यम्, यन्मया दत्तेन पितरौ सुखमेष्यतः, रोहितश्च कृतकृत्यो भविष्यति। कर्तव्यमनुप्राप्तं कृतमेव हि मनश्शान्तिमुपनयति इत्यादीन्यन्यानि च। "तस्य सर्वं पवित्रं स्यात् पवित्रं यस्य मानसम्" इति सूक्तेर्निदर्शनभूत इव शान्तमनाः स तमनुससार॥

रोहितश्च तस्मा अजीगर्ताय गवां शतं दत्त्वा शुनश्शेपमाहूय ग्राममेयाय। रुग्णं पितरं रक्षितुं व्यग्रमनाः स ससंभ्रममेवमुवाच— "तात ! प्रसीदतु भवान्। अहमनेनात्मानं वरुणान्निष्क्रीणे" इति। हरिश्चन्द्रः प्रहृष्टमनाः सहसा वरुणमेत्य "अनेन शुनश्शेपेन त्वां

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यक्ष्यामि'' इत्यवोचत्। वरुणोऽपि तथेत्यङ्गीचकार, उवाच च— "क्षत्रियात्तव पुत्रादयं ब्राह्मणो भूयान्मम प्रियः'' इति ॥

शुभमुहूर्ते यागार्थं सम्भृतसम्भारः राजा यजमानः दीक्षामाविशत्। विश्वामित्रादयो महर्षयस्तस्य ऋत्विज आसन्। एकत्र ऋचः अघोष्यन्त। अन्यत्र सामान्यगीयन्त। इतरत्र याजुषा मन्त्रा उदैर्यन्त। सर्वत्र वैदिकवाङ्मयस्य गन्धेन साकम् आहुतिगन्धः समजृम्भत।

'पशुप्रतिरूपं शुनश्शेपं यूपे को वा बध्नातु' इत्येकः प्रश्नः ऋत्विजां कर्मधुरन्धरतामिव परीक्षितुमुदभूत्। किंतु आत्मवतां तेषां मन्त्र-प्रभावादिव क्षणमवतस्थे। तदानीं सुयवसपुत्रः अजीगर्तः स्वयमागत्य सोपष्टम्भमवोचत्—"यजमानपुरोहिताः! मह्यं यद्यपरं गवां शतं दीयते तर्हि एनं यूपे नियोक्ष्ये'' इति। कार्यवैषम्यात्ते तस्मा अपरं गोशतं दातुमीशते स्म। सद्यस्तमजीगर्तः यूपे न्ययोजयत्। देवः दानवतामासदत्। नैतावदेव केवलम्। तथा यूपबन्धनसंस्कारयुक्तस्य तस्य विशसितारं न कमप्यासादयत्सु ऋत्विक्षु पूर्ववदपरं गोशतं गृहीत्वा अजीगर्तः शुनश्शेपविशसनाय निशितमसिं जग्राह। लोभः खलु काममुद्दीप्तः पुरुषमन्धयति, गर्ते चावक्षिपति।

ऋत्विजां क्रमगतं पितुरुत्पथं च कर्मावेक्ष्य व्याकुलोऽपि कथं-चिदात्मानं रिरक्षिषुः मनस्यचिन्तयत् शुनःशेपः—हन्त! अमानुषमिव मामिह विशसिष्यन्ति। यूपनिबद्धोऽहमवश्यमनेन पित्रा मारयितव्यः। किं करोमि? रोहितस्यार्थोऽपि सम्पादनीयः, आत्मापि रक्षितव्यः। अहो कथमुभयतस्पाशा रज्जुः? भवतु। 'उद्धरेदात्मनाऽऽत्मानम्।' 'न हि देवताभ्य ऋते ममेदानीं शरणम्।' इति निर्धार्य प्रथमं प्रजापतिं देवं सिषेवे। प्रजापतिना 'अग्निरेव मुख्यो देवानाम्' इत्युक्तः तं मनसा तुष्टाव। तस्योपदेशेन सवितारं, सवितुरादेशेन वरुणं, तस्य साहाय्येन विश्वान्देवान्, इन्द्रम्, अश्विनौ, उषसं च क्रमेण बह्वीभिर्ऋग्भिरस्तौत्। एवमेकैकस्यामृचि स्तुता देवाः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रसन्नाः शुनश्शोपमन्वगृह्णन्। शनैश्शुनश्शोपस्य पाशः विमुमुचे। रोहितसंकल्पानुसारं हरिश्चन्द्रस्य महोदरमपि स्वस्थमभवत्। अगदस्य तस्य राज्ञो हर्षातिरेकः स्वमभितः रोहितेऽप्यभासीत्। ऋत्विजां विस्मयस्य सीमरेखाप्यमेया कदाचित्तान् स्वदेशकालौ यदि व्यस्मारयिष्यत्तर्हि तत्र विस्मयो नाऽभविष्यत्।

यागस्याभिषेचनीयसमाप्तेरनन्तरं यथार्हं यथाभिमानं च सभाजिताः ऋत्विजः वेदिमभितः सभामातेनुः। विशिष्य बहुश्रुताः केचन "शुनश्शेपः इत ऊर्ध्वं कस्य पुत्रोऽस्तु" इत्यन्योन्यमन्वयुञ्जत। ततः केचन प्रत्यूचुः —"कोऽयं प्रश्नः? गोशतेन विक्रीतोऽयं हरिश्चन्द्रस्यैव" इति। "कथमेवम्? हरिश्चन्द्रेण किल वरुणाय स्वपुत्रप्रतिरूपोऽयं दत्तः।" "बाढं वरुणेन च अक्षतमबाधं च शुनश्शेपः प्रसाद्यैव प्रतिदत्तोऽस्माकम्।" "भवतु, तदीयेच्छैव नियामिका" इति क्रमवादं समाप्य शुनश्शेपस्य निर्धारणं प्रतीक्षांचक्रिरे। क्रमवादेऽस्मिन् केचन स्वप्रस्तावदृढीकरणाय यतन्ते स्म। प्रस्तावश्रावणायावकाशमाकाङ्क्षन्ति स्म केचन। केचित्तु मौनेन "उत्तरोत्तरशुभो हि विभूनां कोऽपि मञ्जुलतमः क्रमवादः" इति अनुमोदमानाः आसाञ्चक्रिरे।

एवं तेषां विवादं श्रुत्वा शुनश्शेपः "विश्वामित्रस्य महर्षेः पुत्रोऽहमस्मि" इति स्वयं निश्चित्य तदीयमङ्कमाससाद। तदानीं पार्श्वस्थितोऽजीगर्तः विश्वामित्रं सधैर्यमवेक्षाञ्चक्रे—"महर्षे! मम पुत्रोऽयं मह्यं दीयताम्" इति। विश्वामित्रः प्रत्यभाषत—"प्रजापत्यादयो देवा एवेमं मह्यं दत्तवन्तः। कुमारोऽपि मामुपगतः। तस्मान्न पारयाम्यहं तुभ्यमिमं दातुम्" इति। देवैर्दत्तत्वात् 'देवरात'-नाम्ना प्रसिद्धिमुपेयिवान् शुनश्शेपः आत्मानं कृतकृत्यममन्यत।

किंकर्तव्यतामूढः विश्वामित्रेण निराकृतश्चाजीगर्तः सानुकम्पं पुत्रमुवाच—"वत्स! मैवं विप्रतीपं गमः। तव माता अहं च त्वदर्थं परिदूयामहे। तदस्मद्गृहमेहि" इति। तूष्णीमवस्थितः शुनश्शेपः पित्रा पुनरवोचि—तात! त्वमाङ्गिरसः अजीगर्तस्य गोत्रापत्यमिति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सर्वत्र प्रसिद्धः। अतस्त्वं पैतामहात्तन्तोर्मापगतो भूः" इति। शुनश्शेपः सकोपविवादमुत्तरयामास—"पितः! किं तवेदमुपपद्यते ? यत्पुत्रस्य मम वधाय सर्वसमक्षं खड्गमग्रहीः। यत्क्रूरं कर्म नीचेष्वपि न दृश्यते तत्त्वया कृतम्। कथमेवमङ्गिरोगोत्रोत्पन्नतामात्मनो वृथा प्रथमानः मदुपेक्षया त्रिवारं गोशतमग्रहीः? कलुषितं त्वया कुलगौरवम्। नाहं त्वामनुसरामि" इति। व्याकुलितहृदयः पुनरप्यजीगर्तः प्रसादयामास—"तात! दहत्येव मामपीदं पापाचरणम्। किं करोमि ? निर्धनता मां परिभावयति। त्वदर्थमिदानीं प्रतिगृहीतं तद् गोत्रिशतं प्रत्यर्पयितुं सन्नद्धः। मैवमितोऽपि मां क्लेशय" इति। एवमनुनीतोऽपि शुनश्शेपः निर्भयमुक्तवान्—"न हि सर्वोऽपि निर्धनः परिभवं प्रपद्यते। आत्मवतः कथं परिभवः? एवमपि यो धर्मशास्त्रेभ्योऽप्यभीतः सकृत्पापमाचरेद-भ्यासवशात्पुनरप्याचरेदेव। अतस्त्वां नैव प्रत्येमि। प्रतिसन्धानरहितं च पापकर्म त्वया कृतम्" इत्युक्त्वा विरराम।

किंचित्क्षणानन्तरं नीरवतां निर्भिन्दती सहसा विश्वामित्राजीगर्तयो-रभिनन्दनवाग्भरी विस्मापयामास सभासदः। अहो सेयं वाग्भरी अस्माकमपि श्रोत्रगोचरीभवतीव—यथा सौम्य! शरदां शतं जीव्याः। धन्यस्त्वम् यन्महत्यप्यपाये आत्मानं स्थिरीकुर्वता त्वया वृद्धा अप्यनु-शिष्टाः। युज्यत एतत्—यत् "गुरोरप्यवलिप्तस्य कार्याकार्यमजानतः। उत्पथं प्रतिपन्नस्य कार्यं भवति शासनम्॥" इति। शुनश्शेपः सावधानं विश्वामित्रमवदत्—"भगवन्! 'पुरात्मानं नृपं विप्रं तपसा कृतवानसि। एवमाङ्गिरसं मां त्वं वैश्वामित्रमृषे कुरु॥' " इति। "शुनश्शेप! त्वं मे पुत्राणां ज्येष्ठो भव। दायं च प्राप्नुहि। उत्पत्स्यमानास्तव पुत्रा अपि श्रेष्ठा भूयासुः" इत्याशशंसे विश्वामित्रः। दृढीकरणाय शुनश्शेपः पुनरपि प्रार्थयामास—'सर्वेऽपि ते पुत्रा मां ज्येष्ठं व्यवहरन्तु" इति। ततोऽसा-वृषिः पुत्रानाहूय आज्ञापयामास—"पुत्रकाः! सावधानं शृणुत! अद्यप्रभृति अयं मम ज्येष्ठः पुत्रः। यूयं सर्वेऽप्यस्माज्ज्यैष्ठ्याय मा कल्पध्वम्" इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एकशतसंख्याकेषु पुत्रेषु मधुच्छन्दसो ज्योष्ठाः पञ्चाशत्संख्यकाः व्यवस्थामिमां नाङ्गीकृतवन्तः। तेनातितरां क्रुद्धो विश्वामित्रः—"मदीयाज्ञातिलङ्घिनां युष्माकं पुत्राः नीचजातिं भजन्ताम्" इत्यशपत्। त एते शप्ताः सन्तः अन्ध्राः, पुलिन्दाः, शबराः, मूतिबाः, इति व्यवहृता नीचजातिविशेषा अभवन्। कनिष्ठाश्च पितुराज्ञां समीचीनामङ्गीकृत्य सर्वामृद्धिमन्वविन्दन्।

रस-मञ्जरी

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

अध्यापकः। वत्स वामदेव, तव प्रबन्धे वर्णाशुद्धयः संलक्ष्यन्ते। सर्वथा सावधानेन भवितव्यं श्रीमता। मूर्धन्यशब्दे यो नकारो वर्तते स दन्त्य एव।

वामदेवः। आर्य, एतत्तु न समीचीनम्। "अनुष्ठाय स्वयं धर्मं शिक्षणीया इहेतरे" इति प्रामाणिकानामुपदेशः। "यद् यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः" इति च स्वयमेवोक्तं भगवता। स्वयं चेत् मूर्धन्येन मूर्धन्यो नकारः प्रत्याख्यायेत को वापरस्तं स्वीकुर्यात्? स्वयञ्चासिद्धः कथमन्यान् साधयेत्?

अध्यापकः। वत्स रणदेव, किं वात्र श्रीमता मन्यते?

रणदेवः। आर्य, "अन्यदुच्छृङ्खलं सत्त्वमन्यच्छास्त्रनियन्त्रितम्" इति जागर्त्येवात्र माघवचनम्। दुर्बला एवानुसरन्ति शास्त्रानुशासनानि, बलवन्तस्तु तानि तृणावज्ञायम् अवजानन्ति। अत एवाङ्गलभाषायां नियमानुपालिन्यः क्रियाः दुर्बलाः (weak verbs) इति व्यपदिश्यन्ते, उच्छृङ्खलाः पुनः सबलाः (strong verbs) इति। तत् किमिवात्राश्चर्यं यच्छब्दशिरोमणिना मूर्धन्येन सुदूरमुत्सार्येत मूर्धन्यो णकारः।

अध्यापकः। अहो सम्यगभिहितमायुष्मता। शाब्दिकास्तावद्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दन्त्यस्य मूर्धन्यापत्तिं नतिरिति व्यपदिशन्ति। कथङ्कारं नाम मूर्धन्यो नतिं स्वीकुर्यात् ?

गणदेवः। आर्य, ईदृशमुच्छृङ्खलत्वं भाषान्तरेष्वपि समीक्ष्यते। दृश्यतां तावदाङ्गलभाषायां *to* टु इत्युच्चार्यते, न पुनः टो इति, *do* डु इत्युच्चार्यते, न पुनः डो इति।

अध्यापकः। वत्स, अस्त्यत्र कारणविशेषः। भाषान्तरेषु ये ये शब्दाः समुपलभ्यन्ते ते सर्वे संस्कृतभाषात एव संगृहीताः, क्वापि यथावदेव परिगृहीताः, प्रायेण पुनर्विकृतिमापन्नाः। आङ्लभाषायां बहुत्र क्रियाभ्यः पूर्वं *to*-शब्दः सन्निवेश्यते, यथा *to be* or not *to be* that is the question, *to err* is human, *to do* or die, *to keep* the wolf from the door इत्यादिषु। पाणिनीयधातुपाठेऽपि बहुभ्यो धातुभ्यः पूर्वं टुशब्दः सन्दृश्यते। यथा टु दू उपतापे, टु वेपृ कम्पने, टु वम उद्गिरणे, टु क्षु शब्दे, टु भ्राजृ टु भ्राशृ टु भ्लाशृ दीप्तौ। आङ्लभाषायां क्वचित् टुशब्द-धात्वोर्व्यवधानमपि दृश्यते यत् खलु split infinitive इति व्यपदिश्यते वैयाकरणैः। संस्कृतभाषायामपि टु ओ श्वि गतिवृद्धयोः, टु ओ स्फुर्जा वज्रनिर्घोष इत्यत्र ओकारेण व्यवधानं दृश्यते। अत एवाङ्लभाषायां यः टुशब्दो वर्तते स संस्कृतभाषात एव गृहीत इत्यत्र नास्ति लेशतोऽपि संशयावकाशः। संस्कृतभाषातश्च ये शब्दाः संगृहीतास्तेषामुच्चारणमन्तरान्तरा संस्कृतवदेव भवति। तथाहि sugar-शब्दः संस्कृतशर्कराशब्दस्यैवापभ्रंश इति तत्रत्यः s शकारवदुच्चार्यते।

एवं डुशब्दोऽपि संस्कृतत एव स्वीकृतः। श्रुतमेव श्रीमद्भिरसकृत् —प्राप्ते सन्निहितेऽत्र मरणे नहि नहि रक्षति डु कृञ् करणे इति। पाणिनीयधातुपाठे दृश्यते डु कृञ् करणे, डु लभष् प्राप्तौ इत्यादि। डु कृञ् इत्यत्र डुशब्दस्याप्यर्थः करणम्, कृशब्दस्यापि स एवार्थः। द्विर्बद्धं सुबद्धं भवतीति न्यायेन द्वयोरुपादानम्। आङ्लैर्डुधातुः स्वीकृत इत्यस्माभिरसौ 'प्रदाय पुनर्ग्रहणे' पातकभिया परिहृतः। स्मर्यतां तावदस्माकमाभाणकः—प्रदाय पुनरादाने कालीघट्टस्य कुक्कुरः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(दियो निले कालीघाटेर कुकुर हय) इति । Plato-महोदयेनाप्युक्तम् —Kathaper hoi paīdes, hoti tōn orthōs dothentōn aphairesis ouk esti (As children put it, you cannot take back a gift once fairly given) इति । आङ्ग्लानामप्याभाणकः—Give a thing and take again, and you shall ride in hell's wain इति, To give a thing and take a thing is fit for the devil's darling इति च । किंराजेत्यत्रापि राजार्थकः किंशब्दस्तदर्थकश्च राजन्-शब्दः सन्दृश्यते, king-शब्दश्चाङ्ग्लै गृहीतः, अत एव किंराजेति पदस्यार्थः कुत्सितो राजेति संवृत्तः । एवं डु लभष् प्राप्तौ इति सूत्रमाङ्ग्लैः सूचनात् सूत्रमित्याहुरिति न्यायेनेत्थं विवृतम् । डु (do) धातुः करणार्थकः । लभ् (love) धातुः लष् (lust) धातुश्च इच्छार्थकः, इच्छापूर्वकत्वात् प्राप्तेः ।

स्थिरदेवः । आर्य, सर्वमेतदभित्तिचित्रकल्पं मे प्रतिभाति । मूर्धन्यशब्दे धकारव्यवधानात् णत्वस्य प्राप्तिरेव नास्ति । तत् कथं वा णत्वं स्यात् ?

अध्यापकः । अरे मूढ, मूर्धन्यस्य सर्वातिशायित्वादेव नकारस्य णत्वनिवारणाय धकारेण व्यवधानं संवृत्तम् । सर्वत्र श्रीमद्भिः कारणमन्वेष्टव्यं न पुनर्गतानुगतिकत्वं स्वीकरणीयमिति शिवम् ।

समालोचनम्

The Amaramandana of Krishnasuri critically edited with notes, Introduction etc. by V. Raghavan, M. A., Ph. D. Deccan College Post-Graduate and Research Institute, Poona 6. Pages 19 & 43. Price Rupees Three.

यद्यप्यमरसिंहविरचितः कोशः सर्वेषामभिधानकोशानां मूर्ध्नि वर्तत इति विपश्चितां प्रतीतिस्तथापि सन्ति तत्र केचन शब्दा येषां साधुत्वे संशेते स्वान्तं विदितवेदितव्यानाम् । सन्ति चापरे शब्दा येषां रूपाणां लिङ्गानां च कालक्रमेण परिवर्तनं सञ्जातम् । ईदृशान् कांश्चन

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शब्दानधिकृत्य विरचितं श्रीहर्षेणामरखण्डनम्। तस्यैव खण्डनं विहितं कृष्णसूरिणाऽमरमण्डनसमाख्येऽस्मिन् प्रबन्धे।

परिवर्तिनि संसारे शब्दा अपि रूपतोऽर्थतश्च परिवृत्तिं भजन्ते। गच्छता कालेन बहवः प्राचीनाः शब्दाः स्मृतिशेषतामापद्यन्ते, कालात्यये च पुनरप्युज्जीव्यन्ते, अभिनवाश्च शब्दाः प्रतिदिनमेव प्रादुर्भवन्ति। आदौ तावदृकारान्तो नृशब्द एव प्रयुज्यते स्म, ततश्च तत्समानार्थको नरशब्दोऽपि रङ्गभमिमवतीर्णः। आदौ तावद् ग्रीवाशब्दो नित्यं बहुवचनान्त एवासीत्, ततश्चैकवचनेऽप्यस्य प्रयोगः प्रसारमलभत। प्राचीनवरो धर्मन्-शब्दो भाववचनो नपुंसकलिङ्गः कालक्रमेण पुंलिङ्गधर्माकारं पर्यगृह्णात्। इत्था इत्थं-रूपेण कथा च कथं-रूपेण परिणतः। अर्थशब्दः प्रथमतो नपुंसकलिङ्ग एवासीत् ततश्च पुंलिङ्गः सञ्जातः। समासस्य चरमावयव एवाधीनशब्दः सन्दृश्यते स्म, क्रमेण च स्वातन्त्र्येण प्रयोगार्हः संवृत्तः। एवं मनुजानामिव शब्दानामपि "नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण" इत्यवश्यमेवाभ्युपेतव्यम्। तत् किमिवात्राश्चर्यं यदमरकोशस्य प्रणयनानन्तरं केचन शब्दा इदंप्रथमतया भाषां प्रविशेयुः, केचन चार्थस्य लिङ्गस्य वचनस्य वा परिवर्तनमनुभवेयुः। श्रीहर्षेण प्रायेणार्वाचीनाभिधानकोषानवलम्ब्यामरसिंहस्य दोषा उद्घाटिताः!!! कृष्णसूरिणापि प्रायेण कुशं काशं वावलम्ब्य श्रीहर्ष-प्रदर्शितानां दोषाणां निरसनं विहितम्।

बहोः कालात् पूर्वं Government Oriental Manuscripts Library, Madras इत्यतोऽमरखण्डनस्य प्रतिलिपिरस्माभिः संगृहीता। ततश्च Journal of Oriental Research, Madras (January-March, 1931) पत्र चिन्तामणिमहोदयेन मुद्रापितममरखण्डनम्। इदानीं विद्वद्वर्येण राघवमहोदयेन उपोद्घातटिप्पणादिमण्डितं प्रकाशितममरमण्डनम्। यद्यपि पाठविषये राघवमहोदयेन साकं बहुत्र वैमत्यं वर्ततेऽस्माकं तथापि पुस्तकमिदमतीव चित्ताकर्षकं सञ्जातमिति निर्मायमेव ब्रूमः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

४१-तमे पृष्ठे दृश्यते —

यच्च "व्रीहिभेदस्त्वणुः पुमान् (Amar II. 9. 20)' इति यत्, तन्न मनोहरम् । 'तृणोऽस्त्री च शुके व्रीहि. . . .ड्ताादिके' इति शब्दरत्ने । 'कणः कणं च लेशे स्यात् तृणेऽपि तृणमस्त्रियाम्' इति शब्दशब्दार्थमञ्जूषायाम्" इति ।

तदेतत् पृष्ठताडनप्रयुक्तदन्तभङ्गायितम् । यद्धि अणुशब्दे पुंल्लिङ्गं दूषयन्निव तृणकणशब्दयोः स्त्रीपुंल्लिङ्गत्व (पुंनपुंसकलिङ्गत्व) प्रदर्शनमिति ।" इति ।

अत्र राघवमहोदयेनोक्तम् । "इदं प्रसिद्धदाक्षिणात्याभाणकानुवादः । यद्धीति । न तावदेवम् उपेक्षायोग्यं खण्डनकारवाक्यम् । यतो न तेन अणुशब्द-विचारमुपक्रम्य शब्दान्तरविचारेणोपसंहृतम् । यथा च अणुशब्दोऽमरेण व्रीहिभेदे अन्यत्र लेशार्थे वा (III. 1. 162) पुंस्येव पठितः, तथैव तृणशब्दः सत्यपि पुंल्लिङ्गे नपुंसक एव, कणशब्दश्च सत्यपि नपुंसकलिङ्गे पुंस्येव च पठित इति श्रीहर्षस्य तात्पर्यम् । समाधानं तु मण्डनकारेण इतरत्र प्रदर्शितया दिशा सुलभमेव, एकलिङ्गस्य विधाने, कण्ठोक्त्या कस्यापि लिङ्गस्य अविधाने च न सम्भवल्लिङ्गान्तरनिषेध इति ।" इति ।

सर्वमेतदविचारितरमणीयमिति प्रतिभाति । यथास्माभिर्दृश्यते तथा श्रीहर्षेण "व्रीहिभेदस्तृणः पुमान्" इति पाठमुररीकृत्य शब्दरत्नस्य शब्दशब्दार्थमञ्जूषायाश्च मतमुद्धृत्यामरस्य न्यूनता प्रकटीकृता, अमरेण महता कण्ठेन तृणशब्दस्य पुंलिङ्गत्वस्य वचनात्, अन्यत्र नपुंसकपुंलिङ्गयोर्दर्शनात् । कृष्णसूरिणा "व्रीहिभेदस्त्वणुः पुमान्" इति प्रचलित एव पाठोऽङ्गीकृतः, अत एव तेनोक्तम्—तदेतत् पृष्ठताडनप्रयुक्तदन्तभङ्गायितमिति । एतदपि न विस्मर्तव्यं यदादर्शे "व्रीहिभेदस्तृणः पुमान्" इत्येव पाठः सन्दृश्यते । काममयं पाठः कृष्णसूरेर्न सम्मतः, तथापि श्रीहर्षस्यायं पाठ इत्यत्र नास्ति लेशतोऽपि संशयावकाशः ।

तदेतत् पृष्ठताडनप्रयुक्तदन्तभङ्गायितम् । यद्धि अणुशब्दे पुंल्लिङ्ग दूषयन्निव तृणकणशब्दयोः स्त्रीपुंल्लिङ्गत्व (पुंनपुंसकलिङ्गत्व) प्रदर्शनमिति ।

अत्र भङ्गायितमित्यतोऽनन्तरं पूर्णच्छेदो निष्कासनीयः, दूषयन्निवेति पाठोऽपि सर्वथा दुष्ट एव । पुंल्लिङ्गमित्यत्र लकारद्वयसन्निवेशो लिपिकरस्यानवधानं सूचयति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Sweet cowslip's grace
Is her nom'native case,
And she's of the feminine gender.
Rorum, corum, sunt Divorum !
Harum, scarum, Divo !
Tag,rag, merry derry, periwig and hatband !
Hic hoc horum Genitivo !

Vibhakti

The word Vibhakti* is derived from *vi-bhaj* 'to divide, distribute' and means 'separation, partition, division, modification'. विभक्तिशब्दः सुपां वाचकः । विभागवचनो वा । कारकशक्तिविभागः । विभज्यते प्रातिपदिकार्थोऽनयेति कृत्वा । Nyāsa i.2.44. In TS. i.5.22, discriminations from the usual form in the Ādhāna are termed Vibhakti. In the Kauṣītaki Brāhmaṇa i.4 also Vibhakti is used in the sense of discrimination according to Keith. Eggeling and Hillebrandt, however, hold that

*Acc. to Kās'ika on Pāṇini ii.3.32 the names of the seven case-endings, prathamā to saptamī, have been taken over from Purvācāryas, and indeed we find them with the same meaning and in the same order in Yāska. The origin of the name for case-ending itself, viz. vibhakti, goes still farther back to an ancient custom in connexion with the Punarādheya or Punarādhāna, the repeated employment of the three sacrificial fires, if the first employment did not show the required result. In it a cake has to be offered to Agni alone and for the six stanzas to be employed *mutatis mutandis* for this, such stanzas must be chosen in which the name of the deity always appears in a different form because repetitions weaken the ceremony—अजामितायै । जामि ह कुर्याद् यद् द्वे चित् सह स्याताम् । शतपथब्राह्मणम् । We do not learn about this custom from AB. which does not treat of Agnyādheya but from TS. and other Brāhmaṇas. LIEBICH, *Zur Einfuehrung in die indische einheimisehe Sprachwissenschaft*, 11.55.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Vibhakti is used here in the sense of case. Whatever be the true meaning of Vibhakti in this passage, the fact remains that it is concerned with the different cases of the word Agni.

अग्न आयाहि वीतये RV.vi.16.10	'Agni, come for refreshment.'
अग्निं दूतं वृणीमहे i.12.1.	'We choose Agni as our messenger.'
अग्निनाग्निः समिध्यते i.12.6.	'Agni is kindled with Agni.'
अग्निर्वृत्राणि जङ्घनत् vi.16.34.	'May Agni smite the foes.'
अग्नेः स्तोमं मनामहे v.13.2.	'We meditate the praise of Agni.'
अग्ना यो मर्त्यो दुवः vi.14.1.	'To Agni that mortal who doth service.'

The first word in each of the above verses is known as Vibhakti. From this it was an easy transition to nominal endings (the Nirukta speaks of Nāmavibhakti) and from thence to verbal endings also.

In the Tāṇḍya-Mahā-Brāhmaṇa we find :

अग्न इति प्रथमस्याह्नो रूपमग्निविभक्तेः, अग्निमिति द्वितीयस्याग्निनेति तृतीयस्य, अग्निरिति चतुर्थस्य। १०।७।१

[अग्निविभक्तेः अग्निशब्दस्य या विभक्तयस्तासां मध्ये अग्ने इति सम्बुद्ध्यन्तं प्रथमस्याह्नो रूपम्। अग्न आयाहि वीतये इति हि तस्मिन्नहनि दृश्यते। अग्निमिति द्वितीया विभक्तिर्द्वितीयस्याह्नो रूपम्। अग्निं दूतं वृणीमहे इति तत्र मन्त्रवर्णः। अग्निनेति तृतीया तृतीयस्याह्नो रूपम्। अत एव तत्रापि अग्निनाग्निः समिध्यते इति दृश्यते। अग्निरिति प्रथमैव चतुर्थस्याह्नो रूपम्। जनस्य गोपा अजनिष्ट जागृविरग्निः सुदक्ष इति तत्र दर्शनात्। सायणः।]

यस्मादेषा समाना सत्यग्निविभक्तिर्नानारूपा तस्माद् यथर्त्वादित्यस्तपति। ताण्ड्यमहाब्राह्मण १०।७।५

[एषा उक्ताग्निविभक्तिः समाना अग्निविभक्तित्वेन सरूपा सती यस्मात् नानारूपा सम्बुद्ध्यादिविभक्तिभेदेन परस्परं विलक्षणाकारा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar.

Digitized by Arya Samaj Foundation Chennai and eGangotri

तस्माद्वतोर्यथर्तु ऋतावृतौ वसन्तादिके आदित्यो नानारूपः सन् तपति सर्वं जगद् भासयति। सायणः]

इन्द्रेति प्रथमस्याह्नो रूपमिन्द्रविभक्तेः। इन्द्रमिति द्वितीयस्य। इन्द्रेणेति तृतीयस्य। इन्द्र इति चतुर्थस्य। इन्द्रादिति पञ्चमस्य। इन्द्रेति षष्ठस्य। योनैव रूपेण प्रयन्ति तदभ्युद्यन्ति। यस्मादेषा समाना सतीन्द्रविभक्तिर्नानारूपा तस्माद् यथर्त्वोषधयः पच्यन्ते। ताण्ड्यमहाब्राह्मण १०।८।४

The Nāṭyas'āstra (xv.30) explains the significance of Vibhakti thus:

एकस्य बहूनां वा धातोर्लिङ्गस्य पदानां वा।
विभजन्त्यर्थं यस्माद् विभक्तयस्तेन ताः प्रोक्ताः॥

'Since they discriminate the meaning of one or many words, of dhātu and prātipadika, they are known as "vibhaktis".'

The Nirukta exemplifies the Nāma-vibhaktis thus:

इन्द्रो दिव इन्द्र ईशे पृथिव्याः। ऋ० सं० १०।८९।१०

Indra over Heaven rules, rules Indra over the earth.

इन्द्रमिद् गाथिनो बृहत्। ऋ० सं० १।७।१

Indra alone the chanters praise highly.

इन्द्रेणैते तृत्सवो वेविषाणाः। ऋ० स० ७।१८।१५

With Indra the Tṛtsus being active.

इन्द्राय साम गायत। ऋ० सं० ८।९८।१

To Indra chant the sāman.

नेन्द्रादृते पवते धाम किञ्चन। ऋ० सं० ९।६९।६

Without Indra no place whatsoever is pure.

इन्द्रस्य नु वीर्याणि प्र वोचम्। ऋ० स० १।३२।१

Of Indra, now will I proclaim the heroic deeds.

इन्द्र कामा अयंसत।

On Indra our desires rest.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

It will be seen that Yāska does not regard the Vocative as a Vibhakti, Pāṇini and other grammarians agree with Yāska on this point. S'aunaka, in his Bṛhad-devatā, however, distinctly speaks of eight Vibhaktis अष्टौ यत्र प्रयुज्यन्ते नानार्थेषु विभक्तयः (i. 43) and is perfectly justified in doing so. No doubt the dual and plural of the Vocative are identical with those of the Nominative, still the singulars differ in the case of the *a*-declension and several other declensions. The dual and plural of the Ablative are identical with those of the Dative, still the Dative and the Ablative are reckoned as separate Vibhaktis.

It is clear from the following passage of the Mahābhāṣya (ii. 2. 24) that in ancient works on grammar the Vocative was placed after the Locative.

चित्रा यस्य गावश्चित्रगुस्तिष्ठति। चित्रा यस्य गावश्चित्रगुं पश्य। चित्रा यस्य गावश्चित्रगुणा कृतम्। चित्रा यस्य गावश्चित्रगवे देहि। वित्रा यस्य गावश्चित्रगोरानय। चित्रा यस्य गावश्चित्रगोः स्वम्। चित्रा यस्य गावश्चित्रगौ निधेहि। चित्रा यस्य गावः हे चित्रगो इति।....राज्ञो या कुमारी राजकुमारी तिष्ठति। राज्ञो या कुमारी राजकुमारीं पश्य। राज्ञो या कुमारी राजकुमार्या कृतम्। राज्ञो या कुमारी राजकुमार्यै देहि। राज्ञो या कुमारी राजकुमार्या आनय। राज्ञो या कुमारी राजकुमार्याः स्वम्। राज्ञो या कुमारी राजकुमार्यां निधेहि। राज्ञो या कुमारी हे राजकुमारि इति।

One cannot help thinking that originally the Vocative terminations, were *si*, *au*, *jas* and these were placed immediately after the Nom. terminations, which were *su*, *au*, *jas*. Grammarians regarded the Vocative singular as a special form of the Nominative for the sake of lāghava or brevity but the *si* is preserved as the ending for the Nominative singular in Kātantra, J., S'āk., Hc., Mu. etc.

The seven Vibhaktis are generally known as prathamā,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

dvitīyā, tṛtīyā, caturthī, pañcamī, ṣaṣṭhī, saptamī. The Nominative naturally comes first as being the Kāraka *par excellence* (svatantraḥ kartā i. 4. 64) and as being of most frequent occurrence, since we can have a sentence without the other cases, but a sentence without a Nominative, expressed or understood, is hardly possible. The Accusative comes second, because in the neuter the Nominative and Accusative are identical in all cases and also because in the case of those declensions which distinguish between strong and weak stems the Nominative shares the strong character with the singular and dual of the Accusative. In other words, it is necessary to place the Accusative immediately after the Nominative for the purpose of the Sarvanāmasthāna-saṁjñā. In order of frequency also the Accusative comes after the Nominative, because it is primarily affected by the action of the agent. The Accusative plural is weakest, the Instrumental singular is also weakest, so the Instrumental comes immediately after the Accusative. The Instrumental dual is identical in form with the Dative dual, so the Dative is placed after the Instrumental. The Ablative comes after the Dative as its dual and plural are identical with those of the Dative. The Genitive singular is identical with the Ablative singular except in the *a*-declesion and so it comes after the Genitive. This is how the names Prathamā, Dvitīyā etc. came to be given to the different case-endings.

It is just possible that the lakāras (moods and tenses) were at one time called Prathamā, Dvitīyā etc., two of which names Pañcamī (Imperative) and Saptamī (Potential) are still preserved in the works of the Kātantra and its followers, Hemcandra and others.

In "ṅe prathamayor am" P. vii. 1. 28, Prathamā in the dual stands for prathamā and dvitīyā. The practice of the Pratis'ākhyas is to use the second word in the dual.

The word vibhakti occurs in CA. न विभक्तिरूपरानिरयन्तरेषु CA. ii. 51, विभक्त्यागमप्रातिपदिकान्तस्य CA. iii. 78.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

J. takes the dual vibhaktī as standing for nominal and verbal endings and resolving the word into its constituent letters *v, i, bh, a, k, t, ī* adds *ā* to the consonants, because prathamā ends in *ā* and *p* to the vowels because sup, the generic term for the case-endings, ends in *p*. Thus the seven Vibhaktis, according to J., are : *vā, ip, bhā, ap, kā, tā,* and *īp*. Mu. appears to have improved upon the terminology of J. by adding *ī* to the initial consonant or consonants of the oldest names. In the case of the Locative, however, since *sī* sounds very much like ṣī, *ī* is added to the consonants of the second syllable. The reason why *ī* is added and not *ā* is that out of the seven names of Vibhaktis four end in ī. The names according to Mu. are : prī, dvī, trī, cī, pī, ṣī and ptī.

S'āk. defines vibhakti in 1. 3. 181 and prathamā etc. in 1. 3. 182 ff., so in the previous rules he has to use *svaujas* etc. for "prathamā," as in **अव्ययात् स्वौजस्** 1. 3. 99, **द्वाधिक्...** **अमौट् ग्रस्** 1. 3. 100 etc.

Saṁ. uses the pratyāhāra sup and the Vṛtti says under "**सुपोऽव्ययात्** "vi. 2 : "**प्रथमादिसप्तविभक्तीनां सुप् प्रत्याहारः**" and in the text the word vibhakti is used in **भवदादियुक्तेभ्यः सर्वविभक्तेस्त्रहातश्च** vi. 32 etc.

Pāṇini and Kātantra used the term Vibhakti also to denote the Taddhita suffixes tas, tra, ha, dhā, rhi, adhunā, dānīm, thā, tham, astāt, atas, etc., which practically serve the purpose of Vibhaktis.

Every system of grammar uses the word Vfbhakti with the exception of Mu. which uses the last syllable "kti" and HN. which uses the name of Viṣṇu and converts Vibhakti into Viṣṇubhakti.

पा० । तिङस्त्रीणि त्रीणि प्रथममध्यमोत्तमाः । तान्येकवचनद्विवचनबहुवचनान्येकशः । सुपः । १।४।१०१-३ । प्राग् दिशो विभक्तिः । ५।३।१

का० । तस्मात् परा विभक्तयः । २।१।२

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अर्थस्य विभञ्जनाद् विभक्तयः। वृत्तिः। संख्याकर्मादयो ह्यर्था आभिर्विभज्यन्त इति विभक्तयः। पञ्जी ३।१।१

विभक्तिसंज्ञा विज्ञेया वक्ष्यन्तेऽतः परं तु ये।

अद्व्यादेः सर्वनाम्नस्ते बहोश्चैव पराः स्मृताः ॥ २।२१३

च०। तान्येतानि सप्त त्रयाणि सप्त विभक्तयो भवन्ति। विभागो विभक्तिरिति कृत्वा। २।१।१ वृत्तिः।

जै०। आप्परा विभक्ती हलचः। १।२।१८५

शा०। त्रयी त्रयी विभक्तिः। प्रथमादिः। १।३।१८१-१८२

स०। तिङ् सुपो विभक्तिः। तेषां त्रीणि त्रीणि प्रथममध्यमोत्तमाः। सुपां प्रथमाद्वितीयातृतीयाचतुर्थीपञ्चमीषष्ठीसप्तम्यः। १।१।१९-२१

हे०। स्वौजसमौट्..त्रयी त्रयी प्रथमादिः। स्त्यादिर्विभक्तिः। १।१।१८-१९

विभज्यन्ते विभागशः प्रकाश्यन्ते कर्तृकर्मादयोऽर्था अनया। विभजनं वा। लघुन्यासः।

म०। सित्यादिः क्तिः। १२, त्रिशः प्रीद्वीत्रीचीपीषीप्त्यः।७९

सु०। सुप्तिङां त्रिकमेकद्विबहुष्वेकवचनद्विवचनबहुवचनमेकशो विभक्तिश्च २।१।३५

संख्या अर्थो विभज्यतेऽनया इति विभक्तिः। मकरन्दः।

प्र०। विभक्ती सुप्तिङौ स्मृतौ। १।१७१, प्रथमाद्यभिधानास्ता वचनैः स्युस्त्रिभिस्त्रिभिः। १।१७४ ङिवत्, तसादौ १।१४०४।

हे०। स्वादितिबाद्या विष्णुभक्तयः। १।१४९

क्रियते चेत् साधुविभक्तिचिन्ता
व्यक्तिस्तदा सा प्रथमाभिधेया।
या स्वौजसां साधयितुं विलासै-
स्तावत् क्षमा नामपदं बहु स्यात् ॥ नै० चरितम् ३।२३

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'If one thinks of distinguishing good men, that individual has to be mentioned first who by the display of his prowess is able to bring to subjection many refractory states, (when one thinks of a good Vibhakti, then the first case-ending has to be taken into consideration, which by the manifestation of *su*, *au*, *jas* is able to convert a large number of stems into inflected words.'

उभयी प्रकृतिः कामे सज्जेदिति मुनेर्मतम् ।
अपवर्गे तृतीयेति भणतः पाणिनेरपि ॥

नैषधीयचरितम् १७।७०

"Both the sexes should tread the primrose path of dalliance" is the view of Pāṇini who says : Salvation is for the third sex (eunuch). Of course the real meaning of the rule is that the third case-ending is to be used with words denoting time and place to denote the completion of the action.

षष्ठी and **सप्तमी** are used in peculiar senses in the second of the following two stanzas :

पतत्यविरतं वारि नृत्यन्ति शिखिनो मुदा ।
अद्य कान्तः कृतान्तो वा दुःखस्यान्तं करिष्यति ॥
सन्तप्ता दशमध्वजाद्यगतिना संमूर्छिता निर्जने
तुर्यद्वादशवद्द्वितीयमतिमन्नेकादशाभस्तनी ।
सा षष्ठी नृपपञ्चमस्य नवमभ्रूः सप्तमीवर्जिता
प्राप्नोत्यष्टमवेदनां प्रथम हे तूर्णं तृतीयो भव ॥

It is said that the daughter-in-law of King Vallāla Sen, pining from the pangs of separation from her husband wrote on the wall of her boudoir :

It is raining incessantly. Peacocks are dancing in joy. Either my beloved or Yama will put an end to my sufferings to-day.

This stanza happened to catch the eye of the king who forthwith wrote to his son :

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

This peerless (सप्तमीवर्जिता = तुलारहिता) daughter (षष्ठी = कन्या) of the lion of kings (नृपपञ्चमस्य = नरपतिसिंहस्य) with (heaving) breasts like the temples of elephants (एकादशाभस्तनी = करिकुम्भप्रतिस्पर्धिपयोधरा) and (arched) eye-brows like bows (नवमभ्रूः = धनुराकारभ्रूः) tormented by the first flush of youth (दशमध्वजाद्यगतिना = मकरध्वजस्य प्रथमप्रवेशो यत्र तादृशस्याभिनवयौवनस्याविर्भावेण) and having fainted like a crab or a fish (तुर्येद्वादशवत्) on a place devoid of water is suffering the stings of the scorpion (अष्टमवेदनाम् = वृश्चिकदंशनयातनाम्), O thou with the intellect of a bull (द्वितीयमतिमन् = वृषभवन्मूढ़मते), O ram (हे प्रथम = मेष), join her quickly (तूर्णं तृतीयः भव = सत्वरं मिथुनीभव) ।

Amantrita and Sambuddhi

The vocative is termed Āmantrita by Pāṇini and as the singular has often special forms differing from the Nom. sing., the Voc. sing. is designated Sambuddhi. *A-mantra* occurs in the Taittirīya Brāhmaṇa in the sense of 'to address'. Āmantraṇa occurs in the sense of 'address' in the S'atapatha Brāhmaṇa : अम्बेति वै योषाया आमन्त्रणम् vi.6.2.5. "Āmantrita" is the past passive participle of *āmantra* and denotes the person addressed. With the suffix -*kta* in the bhāva-vācya (नपुंसके भावे क्तः iii. 3.114), it means the same thing as āmantraṇa or sambodhana. Āmantrita in the sense of the voc. occurs first in the Prātis'akhyas and in Pāṇini. ओकार आमन्त्रितजः प्रगृह्यः RP. i.68, पदपूर्वमामन्त्रितमनानार्थेऽपादादौ VP. ii.17; आमन्त्रितं च ii. 24, न सप्तम्यामन्त्रितयोः iii. 139, अनुदात्तमाख्यातमामन्त्रितवत् vi.1, आमन्त्रितं चेतावनार्थे CA. i. 81. It *has* एकामन्त्रिते for the voc. sing. : एकामन्त्रिते रौद्विवचनान्तस्य ii. 47. Apr. uses "āmantrita" several times : अर्थपादादिषूदात्तमाख्यातामन्त्रितं पदम् । i. 18. आमन्त्रितादाद्युदात्तादाख्यातं न निहन्यते 1.27.

आमन्त्रितादाद्युदात्तात् परमामन्त्रितं पदम् ।
आद्युदात्तं तदप्याहुः समानाधिकरणं तु वा ॥ i. 286

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Sarvavarman does not define or explain "āmantrita" but takes it for granted. Sambodhana and Sambuddhi mean the same thing, Sambuddhi is made use of by Pāṇini in a special sense and in this instance he is followed by Sarvavarman, though in the vast majority of cases Sarvavarman's technical terms are self-explanatory. Candra uses Sambodhane su for Sambuddhi in vi. 2. 44. He uses āmantrita in vi.3.24 and Sambuddhi in vi.3.49. Jainendra shortens Sambodhana into Bodha and for Sambuddhi it has "ki" with the first consonant of the alphabet and the *i* of sambuddhi. Jainendra's use of the first consonant would lead one to suppose that acc. to this grammar, the Voc. preceded the Nominative. S'ākaṭāyana uses the trisyllabic "āmantrya" (lit. one who has to be addressed) for the polysyllabic "Sambodhana" and for "Sambuddhi" he uses "ekāmantraṇa". वोश्नोश्ननन्नचोभगोभोस् समश्चैकामन्त्रणे i.2.121. Bhoja follows Pāṇini. Hemacandra uses āmantrya for Sambodhana and adds "si" to denote the sing.: मातुर्मातः पुत्रेऽर्हे सिनामन्त्र्ये i.4.40. Kramadīs'vara uses both Sambodhana and Sambuddhi for āmantrita and adds 'si' to denote the sing.: न बहुव्रीहावक्लीबे सम्बोधने i. 163, ह्रस्वेङ् भ्रां सोः सम्बुद्धौ vi.5. In the Subanta section there is a rule एकवचनसम्बुद्ध्यन्ताच्च 379 where एकवचनसम्बुद्धि appears to have been used for Pāṇini's Sambuddhi. Commentators, however, are of opinion that सम्बुद्ध्यन्ताच्च is the correct reading here. Thus Goyīcandra says: एकवचनसम्बुद्ध्यन्तादिति लक्षणं बहुषु पुस्तकेषु दृश्यते, किन्तु तत् पूर्ववृत्तिदर्शनोद्भूतसंस्कारव्याकुलबुद्धिभिरनभिज्ञैः कृतमिति लक्ष्यते। यत एकवचनसम्बुद्ध्यन्तादेव त्वामादयो न भवन्तीति पाणिनिसर्ववर्मचन्द्रविरचितेषु कुत्रापि न दृष्टम्। Vaṁs'ivadana remarks in his Tippaṇī: सम्बुद्ध्यन्ताच्च इत्येव लक्षणं सर्वसम्मतमित्यभिप्रायः. Curiously enough Vopadeva who uses monosyllabic technical terms throughout contents himself with changing the polysyllabic Sambodhana into the trisyllabic Sambuddhi. For the voc. sing. he uses "dhi" which is a vast improvement

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

on Devanandin's "ki" being the last syllable of "sambuddhi". Sār. follows Mu. The Supadma, like the Saṁkṣiptas ra, uses Sambuddhi for Sambodhana and "su" for sing. The Prayogaratnamālā follows Pāṇini. The Harināmāmṛta uses the popular word Sambodhana for "āmantrita" and Buddha, the name of the avatāra which is nearest in sound to Sambuddhi, for that term.

Kaccāyana (Pali Grammar, ii. 1.4), has "ālapana" for "āmantrita and "ga" for Sambuddhi.

पा० । सामन्त्रितम् । [सा=सम्बोधने प्रथमा ।] एकवचनं सम्बुद्धिः । २।३।४८-४९

का० । आमन्त्रिते सिः सम्बुद्धिः ।२।१।५

जै० । सम्बोधने बोध्यम् । सुः किः ।१।४।६६-६७

स० । सम्बोधनप्रथमान्तमामन्त्रितम् । तदेकवचनं सम्बुद्धिः । १।१।७५-७६

मु० । सम्बुद्धौ सिर्धिः ।८१

सम्बोधने विहितः सिर्धिसंज्ञः स्यात् । वृत्तिः ।

सा० । आमन्त्रणे सिर्धिः । ८।३

सु० । सम्बोधनैकवचनं सम्बुद्धिः ।२।२।६, नामन्त्रितात् त्वामादयः २।४।५१

प्र० । आमन्त्रिते सिः सम्बुद्धिः । अनवहितस्य स्वविषयज्ञानोत्पादनमामन्त्रणम् ।१।१८०

ह० । सम्बोधने सुर्बुद्धसंज्ञः । सम्बुद्धिश्च । १।१७२

संज्ञाकान्तसुते कृतान्तभगिनि श्रीकृष्णनित्यप्रिये
पापोन्मूलिनि पुण्यधात्रि यमुने कालिन्दि तुभ्यं नमः ।
एवं स्नानविधौ पठन्ति खलु ये नित्यं गृहीतव्रता-
स्तानामन्त्रितसंख्यजन्मजनितं पापं क्षणादुज्झति ॥

पण्डितराजजगन्नाथविरचिता यमुनालहरी ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'O daughter of the dear husband of Saṁjñā, O sister of Yama, O constant beloved of Srīkṛṣṇa, O annihilator of sins, O receptacle of virtue, O Yamuna, O Kālindī, salutation to thee. Those who having taken a vow read these names while performing ablutions, sins of as many lives as there are vocatives in this stanza forthwith leave them.'

ताराविष्णूरणत्विट्खगहृदयरमास्कन्दसम्बुद्धयः क्व
क्व स्याद् धातुत्रयं लुग्विकरणपठितं कुत्र तत्त्वावबोधः ।
चत्वारस्तद्धिताः स्युः क्व च खलु विगतैकैकवर्णस्वरूपाः
किं सूत्रं पाणिनीयं विकसति न सहस्रोक्तिभिर्भास्वरेऽपि ॥

शार्ङ्गधरपद्धतिः ।

Where are the combined vocative singulars of the star (भ), Viṣṇu (अ), the sheep (अवे), lustre (भाः), bird (वे) and of her who is pleasing to the mind (भावे)? Where are three roots belonging to the ad-class (भा दीप्तौ, वा गतिगन्धनयोः, इण् गतौ)? Where is the knowledge of the essence of things? Where are four words formed with primany suffixes) with the successive elision of one letter (भाविः=भवस्य अपत्यम्, आविः=अवस्य अपत्यम्, विः=वस्य अपत्यम्, इः=अस्य अपत्यम्)? What is the rule of Pāṇini (भावे iii. 3. 18) which does not shine even in the resplendent sunlight even when uttered a thousand times (which shines even in *bhāsvare* without its *s*, *v* and *r*)?

क्रियाकारकसंज्ञाध्वा विना वाक्येन दुर्घटः ।
विभक्तिद्वययोगेन यत्तद्दीमदुर्घटम् ॥

पदसूर्यप्रक्रिया

स्वौजसां पूरितः सिन्धुः शब्दसिन्धुरिह स्थितः ।
पठितव्यो विवेकाढ्यैर्मन्दैरपि पुनः पुनः ॥

समस्यार्णवः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

TECHNICAL TERMS AND TECHNIQUE OF

Sanskrit Grammar

A Critical, Comparative and Historical Study

BY

Kshitish Chandra Chatterji, Sastri, M.A., D. Litt

Lecturer, Calcutta University ;
Formerly Editor, Calcutta Oriental Journal,
Surabharati Oriental Literary Digest, etc., etc.

The Modern Review (December, 1950) **says :**

"Honour to whom honour is due. Dr. Chatterji has broken entirely new ground in his **Technical Terms and Technique of Sanskrit Grammar** and demonstrated clearly that Bengal, though fallen on evil days, can even now produce works on Indology that invite and bear comparison with the best work produced in any part of the world. Who ever thought that all the technical terms admitted of satisfactory explanation and who ever imagined that a work on grammatical terminology could be made as delightful as a novel ? In this volume of nearly 350 pages the technical terms of Sanskrit grammar from the Brahmanas, Nirukta, Pratishakhyas, Panini, Katyayana, Patanjali, down to Prayogaratnamala and Harinamamrita have been considered critically and historically in all their bearings and apparently arbitrary technical terms like *gha*, *bha*, *lat*, *lit*, etc., have been traced to their sources. **We have nothing but admiration for this masterpiece of scholarship and warmly recommend it to our readers."**

Price Rupees Twelve only. *Foreign Rs. 14/-*

Postage Extra.

VISVANATH CHATTERJI

81, Shyambazar Street,

CALCUTTA—4

Phone : B. B. 4049

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

MANJUSHA (Sanskrit Monthly Magazine)
Registered No. C. 3278

CANDRA VYAKARANA

Part I (Chapters 1—3).

Critically edited with Vṛtti, corresponding rules of Pāṇini, Bhoja and others, Introduction etc.

By

KSHITISH CHANDRA CHATTERJI, SASTRI, M. A., D. LITT.

Lecturer, Calcutta University ;
Formerly Editor, Calcutta Oriental Journal, Surabharati, Oriental Literary Digest, etc., etc.

Price Rupees Twelve only. *Foreign Rs. 15/-*

A No Bhadriyam

Hymn 1. 89 of the Rigveda with the critically edited commentaries of (1) Veṅkaṭamādhava (2) Skandasvāmin (3) Mahīdhara (4) Sāyaṇa (5) Kās'yapa Kṣitīsacandra unfolding the significance of each word and expression, and extracts from the commentaries of Uvaṭa, Haradatta and others, English translations, critical and explanatory notes, comparisons from other languages etc. etc. Price 2/8/-

MAHABHASHYA

(First Ahnika)

Edited with

English translation, exhaustive critical and explanatory notes, extracts from other commentaries, full Sanskrit explanation of the Vedic mantras etc. etc.

Rupees Three and Annas Twelve only.

VISVANATH CHATTERJI

81, Shyambazar Street, Calcutta—4

Printed and published by Sri Jyotish Chandra Chatterjee, B.A. from 81, Shyambazar Street, Calcutta—4. Printed at the Elm Press 63, Beadon Street, Calcutta—6.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Approved by the Directors of Public Instruction, Madras, Bihar and Mysore.

श्रीशिवः शरणम्

अष्टम-वर्षे] September, 1953 [प्रथमा संख्या

मञ्जूषा

सम्पादकः—श्रीक्षितीशचन्द्र-चट्टोपाध्यायः

Next Month.

As'oka Inscription. Rasamañjarī.
Rabindranath's Short story.

Just Out ! **Just Out !!**

Patanjali's MAHABHASHYA (Paspasha) with English translation, exhaustive critical and explanatory notes, commentaries. Rs. 3/12/-

A boon to students of languages is **Greek Proverbs** in Roman character with their Latin and English analogues and parallel proverbs and sayings from Sanskrit, Marathi and Bengali. All the grammatical forms have been clearly explained and the student of Sanskrit will not only acquire some knowledge of the glorious Greek language but will be struck with the resemblance it bears to Sanskrit. *Price Rupees : Two only.*

Office : 81, Shyambazar Street, Calcutta—4
Annual Subscription : Rupees Three only.
This number—Annas Eight
Foreign—Rupees Four

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मञ्जूषाया नियमावली

मञ्जूषाया वार्षिकं मूल्यं रूपकत्रितयम्। आश्विनमासतो वर्षारम्भः। ग्राहकैर्वर्षस्य प्रथमसंख्यात एव ग्रहीतव्यम्।

२। प्रतिसौरमासं दशमदिने (आङ्लमासस्य चतुर्विंशे दिवसे) 81, Shyambazar Street, Calcutta 4 इत्यतो मञ्जूषा प्रकाश्यते।

काव्यालङ्कारसूत्रवृत्तिः (वामनविरचिता ५।१)

অভিনববিগ্রহবিস্তৃতটীকোপেতা Rs. 2/-

Convocation Address in Ancient India -12-

Popular Etymology— Re. 1/-

শব্দকথা— ২৲

ইহাতে সরল ও সরসভাবে বাঙ্গালা ভাষায় চলতি ভুলগুলির আলোচনা করা হইয়াছে, **সংস্কৃত ব্যাকরণের দিক্ দিয়া, বাঙ্গালা ভাষার দিক্ দিয়া, ভাষাতত্ত্বের দিক দিয়া,** বঙ্গদর্শন প্রভৃতি হইতে ভূরি ভূরি উদাহরণ উদ্ধৃত করিয়া শব্দ ও শব্দসৃষ্টির শুদ্ধি ও অশুদ্ধি বিবেচিত হইয়াছে। ওতপ্রোতশব্দে বিসর্গ আছে কি না, যদি থাকে প্রথম 'ত'র পরে আছে, না দ্বিতীয় 'ত'র পর আছে, না উভয় 'ত'র পরে আছে, 'সঠিক' শব্দ ঠিক কি না, 'ব্যবহারিক' ব্যবহারযোগ্য কি না, আবশ্যক ও আবশ্যকতায় প্রভেদ কি, প্রভৃতি আলোচিত হইয়াছে। "সোনার পাথরবাটি" প্রবন্ধে সংস্কৃত, বাঙ্গালা, ইংরাজী প্রভৃতি নানা ভাষার সোনার পাথর বাটী জাতীয় শব্দগুলি সন্নিবিষ্ট হইয়াছে। ক্রিয়াবিশেষণ প্রবন্ধে বাঙ্গালা, ইংরাজী ও ফরাসী ক্রিয়াবিশেষণগুলির মূল অর্থ বিবেচিত হইয়াছে। "সন্ধির কথায়" সন্ধির বৈজ্ঞানিক ব্যাখ্যা ও বাঙ্গালা ইংরাজী লাটিন প্রভৃতি ভাষার সন্ধি প্রদর্শিত হইয়াছে। সন্ধি, ষত্ব ও ণত্ব সম্বন্ধীয় নিয়মগুলি সরলভাবে বোঝান হইয়াছে ও বাঙ্গালা উপন্যাসাদি হইতে শত শত দৃষ্টান্ত সন্নিবিষ্ট হইয়াছে।

ঊষার আলো—ছোট ছোট হাসির গল্পের সমষ্টি— ৷৶০

নক্ষত্রমালা—ধর্মবিষয়ক শ্লোক, সরল ব্যাখ্যা ও অনুবাদ ১৷০

Several complete sets of Vols. IV, V, VI and VII (450 pp. each) **of the Manjusha are still available for Rs. 6/8/- per volume and only a few sets of Vols. I-III are available at Rs. 5/12/- for the lot.**

श्रीविश्वनाथ-चट्टोपाध्यायः।

৮১ শ্যামবাজার ষ্টীট, কলিকাতা ৪

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शरणं तरुणेन्दुशेखरः शरणं मे गिरिराजकन्यका ।
शरणं पुनरेव तावुभौ शरणं नान्यदुपैमि दवतम् ॥

अष्टम-वर्षे **मञ्जूषा** प्रथमा संख्या

आभाणकादि

Greek. Ho sophos en autōi peripherei tēn ousian.

The wise man carries his possessions within him.

प्राज्ञस्तावत् स्वस्मिन्नेव सर्वं स्वं सम्भरति ।

Latin. Omnia mecum porta mea.

I carry all my possessions with me.

ज्ञानिनस्तावदात्मारामाः । प्रज्ञैव तेषां सर्वस्वम् । अत एव न किमपि तेषां बाह्यैर्विभवैः प्रयोजनम् । अत एव मिथिलाया ज्वलन-वार्त्तामुपलभ्य राजर्षिणा जनकेनोक्तम्—मिथिलायां प्रनष्टायां न मे नश्यति किञ्चनेति । अत एव नौव्यसते विपन्नः Simonides-महोदयः अहो, मय्येव तिष्ठति सर्वस्वं मदीयम् इत्युक्त्वा नावस्तटमुत्-पतितवान् । तस्य सहचरा द्रव्यादिरक्षणव्याकुला द्रव्यभारेण सीदन्तः समुद्रे स्खलिताः पञ्चत्वमापन्नाः ।

प्रथमतस्तावद् खीस्तजन्मनः पूर्वं षष्ठे शतके ग्रीसभिजनेन Bias-महोदयेनैतदुक्तम् । स खलु ग्रीसीयानां सप्तमनीषिणामन्यतम एवासीत् । ततश्च व्यतीतेषु सुबहुषु वर्षेषु Fanny Bias-समाख्यया गायिकया स्वीयं वदनकमलं शरीरयष्टिं च निर्दिश्योक्तम्, मदीयः पूर्वज इवाहमपि सर्वस्वं मयैव साकं वहामि । इति ।

Greek. To mē kakōs phroneīn theou megiston dōron.

To think no folly is Heaven's best gift.

इदं तावद्देवस्य महिष्ठं दानं यन्मौर्ख्यस्यामननम् ।

महत्तमोऽयं प्रसादो देवस्य यज्जनो मनसा मौर्ख्यं न मनते ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

The fly sat upon the axletree of the chariot wheel and said, What a dust do I raise ?

अक्षधुरि सुखासीना मक्षिकैकावदत् पुरा ।
उत्थाप्यते मया मार्गे पांशुराशिरहो कियान् ।।

रथयात्रा लोकारण्य महा धुमधाम—
भक्तेरा लुटाये पथे करिछे प्रणाम ।
पथ भावे 'आमि देव', रथ भावे 'आमि',
मूर्त्ति भावे 'आमि देव', हासे अन्तर्यामी ।

रवीन्द्रनाथ ठाकुर ।

रथयात्रा प्रवृत्ताद्य डम्बरेण महीयसा ।
जनाश्च लुठिता मार्गे प्रणमन्ति सभक्तिकम् ।।
अहं देव इति वर्त्म मन्यते च तथा रथः ।
तथैव मन्यते मूर्त्तिः स्वयं देवश्च कक्खति ।।

नाणकोत्कीर्णा लिपयः

१ । पन्तलेवस्य ताम्रमुद्रासु लेखाः (१६०—१५५ खृः पूः)

Basileo:s Pantaleontos.

ततश्चापरपृष्ठे ब्राह्मया लिप्या—रजने पतलवस (राज्ञः पन्तलेवस्य) ।

Basileo:s—genitive singular of *basileus* king. Etymology uncertain. *Pantaleontos*—gen. s. of *Pantaleon*, सर्वसिंहः, सर्वदमनः

२ । एवुक्रतिदस्य राज्ञः (१७५-१५५ खृः पूः)

Basileo:s megalou Eukratidou.

अपरपृष्ठे—रजस महतकस एउक्रतिदस (राज्ञः महतः एवुक्रतिदस्य) ।

Megalou—gen. s. of *megas* great. *Eukratidou*—gen. s. of *Eukratides*, son of Eukratos well-tempered, temperate, mild,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हुविष्कस्य[1] शिलालेखः

सिद्धम् । संवत्सरे अष्टाविंशे गुर्पिये[2] (Gorpiaios समाख्ये मासे) दिवसे प्रथमे इयं पण्यशाला प्राचीनीकेन सरुकमाणपुत्रेण खरासलेर-पतिना वकनपतिना अक्षयनीविः[3] दत्ता । ततः वृद्धितः मासानुमासं शुद्धस्य चतुर्दश्यां पुण्यशालायां ब्राह्मणशतं परिवेष्टव्यम् । दिवसे दिवसे च पुण्यशालाया द्वारमूले धार्यं खाद्यसक्तूनाम् आढकाः[4] त्रयः, लवणप्रस्थ एकः, शुक्तप्रस्थ[5] एकः, हारितकलापकघटकाः त्रयः, मल्लकाः पञ्च । एतत् अनाथानां कृते दातव्यं बुभुक्षितानां पिपासितानाम् । यत् अत्र पुण्यं तत् देवपुत्रस्य षाहेः[6] हुविष्कस्य । येषां च देवपुत्रः प्रियः तेषामपि पुण्यं भवतु । सर्वस्याश्च पृथिव्याः पुण्यं भवतु । अक्षयनीविः दत्ता,......श्रेण्यां [7] पुराणशतानि सार्धपञ्च समिताकरश्रेण्यां च पुराणशतानि सार्धपञ्च ।

---

[1] कुशनसम्राट् हुविष्कः प्रायेण खृस्तीये द्वितीये शतके भारतस्य कञ्चन भागं शशासेत्यैतिहासिकाः ।

[2] गुर्पिये —ho Gorpiaios (mēn) मासीदनीयमासविशेषस्य संज्ञा गुर्पिय इति । प्रायेणास्माकं भाद्रपदः ।

[3] अक्षयनीविः—यद् धनं कथमपि प्रत्यादातुं न शक्यते, यस्य च मूलं सर्वथा परिरक्षितव्यं वृद्धिरेवोपयोक्तव्या । Permanent endowment.

[4] आढकः—"षट्पञ्चाशदधिकद्विशतमुष्टिः । व्यवहारे षोडशसेरो विंशतिसेरो वा । वैद्यकमतेऽष्टशरावपरिमाणम् ।" प्रस्थः—आढकचतुर्थांशः ।

[5] मृन्मयादिशुचौ भाण्डे सगुडं क्षुद्रकाञ्जिकम् । धान्यराशौ त्रिरात्रस्थं शुक्तं चुक्रं तदुच्यते ॥

[6] षाहेः—राज्ञः, Persian *Shah* king, ruler, Skt. *kṣi* to rule. Skt. *kṣatram* rule.

[7] पुराणः—कार्षापणपर्यायः ३२ रत्तिकासमितः रजतमुद्राविशेषः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पाठ-विमर्शः

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

कथासरित्सागरे ७१-तमे तरङ्गे दृश्यते—

भ्रमंश्च तत्र केनापि पुंसा मार्गगतेन सः ।
अपश्यता मार्गवशादंसेनांसेऽभ्यहन्यत ।।
ततः सोऽभ्यभवत् क्रुद्धो युद्धायाह्वयति स्म तम् ।
स चाहतः पुमान् प्रौढस्तत्कालोचितमभ्यधात् ।।
किं ताम्यस्यविचार्यैव विचारयसि चेत्ततः ।
वाच्यो निशापतिर्येन निशैषा न प्रकाशिता ।।
धाता वा येन पूर्णोऽस्य नाधिकारोऽत्र निर्मितः ।
येन वैराणि जायन्ते तमसीदृश्यकारणात् ।। इति ।

अत्र आह्वयतीति पदमशुद्धम्, स्पर्धायामाङः [१।३।३१] इति सूत्रणात्मनेपदविधानात् । अतः "ततः सोऽप्यभवत् क्रुद्धो युद्धायाह्वयते च तम्" इति पठनीयमिति प्रतिभाति ।

विचित्रो विपाकः

धनिकधुरीणः । वैद्यराज, भृशमस्वस्थशरीरा मे दुहिता । यथा सा शीघ्रं रोगमुक्ता स्यात् तथा विधीयताम् ।

भिषक्श्रेष्ठः । (रोगिणीं निरीक्ष्य) भद्रमुख, arthritic psoriasis समाख्येन चिरस्थायिना प्रदाहिना चर्मरोगेण समाक्रान्ता भवतो दुहिता ।

धनिकः । कदा नु सा निरामया स्यात् ?

भिषक् । रोगमुक्तेः सम्भावना प्रायेण नास्त्येव । अचिरादेवासावत्यन्तायैव चलनशक्तिरहिता शय्याश्रयिणी भविष्यति । (निष्क्रान्तः)

धनिकः । अहो, न खलु सुकुमारीं कन्यकां निरानन्दां व्याधिक्षीणां द्रष्टुं पारयामि । दक्षिणं बाहुमपि मे दद्यां यदि सा रोगमुक्ता भवेत् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ततश्च कन्यायाश्चक्रास्यन्द्याः (wheeled chair) प्रवेशाय धूमशकटस्य पश्चाद्भागे द्वाराणि योजितानि। एकदा च पत्न्या दुहित्रा च साकं धूमशकटेनावकाशं यापयन् धनिकोऽसौ धूमशकटे समाहतः सशब्दं निपतितः, तस्य च दक्षिणो बाहुः स्कन्धाद् विच्छिन्नः। क्षतरोहणाच्च पूर्वमेव दुहिता तस्योल्लाघतामापन्ना। देवैराकर्णितं तस्य करुणं प्रार्थनमिति प्रतिभाति।

महाभाष्यरत्नमञ्जूषा

व्यक्तवाचां समुच्चारणे ॥ १।३।४८

[व्यक्तवाचां समुच्चारणम् सहोच्चारणम्। तत्र वर्तमानाद् वदतेरात्मनेपदं भवति। काशिका।]

व्यक्तवाचामिति किमर्थम्?

वरतनु संप्रवदन्ति कुकुटाः।

व्यक्तवाचामित्युच्यमानेऽप्यत्र प्राप्नोति। एतेऽपि हि व्यक्तवाचः। आतश्च व्यक्तवाचः—कुक्कुटेनोदिते उच्यते कुक्कुटो [1]वदतीति।

एवं तर्हि व्यक्तवाचामित्युच्यते सर्व एव हि व्यक्तवाचस्तत्र प्रकर्षगतिर्विज्ञास्यते—साधीयो ये व्यक्तवाच इति। के च साधीयः[2]? येषां वाच्यकारादयो वर्णा व्यज्यन्ते। न चैतेषां वाच्यकारादयो वर्णा व्यज्यन्ते। आतश्च व्यज्यन्ते, एवं ह्याहुः कुक्कुटाः—कुक्कुडिति। नैवं त आहुः। अनुकरणमेतत् तेषाम्।

अथवा नैवं विज्ञायते व्यक्ता वाग् येषां त इमे व्यक्तवाच इति। कथं तर्हि? व्यक्ता वाचि वर्णा येषां त इमे व्यक्तवाच इति।

[अत्रत्यायां पदमञ्जर्यां भाषायां सङ्करस्य सुमनोहरमुदाहरणमुपलभ्यते। तथाहि हरदत्तेनोक्तम्—**यद्यपि** कुक्कुटादिरुतमपि स्वरूपेण

---

[1] **अत्र वदतीत्यौपचारिकं वेदितव्यम्। तुरीयं वाचो मनुष्या वदन्तीति श्रुतेर्मनुष्या एव व्यक्तवाचः।**

[2] **व्यक्तवाचः इति शेषः।**

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्यक्तम्—अस्येदं रूपमस्येदमिति, मनुष्यवाक् तु व्यक्ततरा भवति वर्णात्मकत्वाद् अर्थावगतिहेतुत्वाच्च। अतस्त एवं गृह्यन्ते। शुकशारिकादीनां तु पुरुषप्रयत्नवशेन क्वाचित्कं व्यक्तवाक्त्वं न स्वाभाविकमिति न तेषां ग्रहणम्। इति।

अत्रेदमवधेयम्। यद्यपीत्यस्यानन्तरं तथापीत्यपेक्ष्यते, अत एव यद्यपीति पदं वा निष्कासनीयं तुस्थाने वा तथापीति पठनीयम्।]

वर्तन्त एव बहवः

"अहो नीचाशयत्वमस्य नरस्य! अहं तावद् विपदि पतितः पञ्चरूप्यकमात्रं ऋणरूपेण प्रार्थितवान्, स कथमपि दातुं न सम्मतोऽभवत्। ईदृशः पाषण्डो जगत्यपरो विद्यते वा?"

"बहवः खलु विद्यन्ते। दृश्यतां तावद्, अहमेव तथाविधोऽपरो भवतः पुरत एव तिष्ठामि।"

सर्वोर्णा

भद्र आपणिक, त्वया तावदुक्तमिदं प्रावरणं सर्वोर्णामयमिति। मया पुनरेतस्याभ्यन्तरे पत्रखण्डमुपलब्धम्, तत्र सर्वकार्पासमिति विलिखितं वर्तते। किमत्र रहस्यम्? परमार्थत इदं सर्वथोर्णामयं वा कार्पासं वा?

आर्य, सर्वथोर्णामयमेवैतत्। केवलं कीटानां निवारणार्थं सर्वकार्पासम् इति तत्र विलिखितम्। कीटाः प्रायेणोर्णामयान्येव वस्त्राणि दशन्ति, कार्पासेषु तेषां विशेषतः प्रीति र्नास्तीति।

धूर्ततरः

धरणीधरोऽतीव धूर्त इति पल्ल्यां प्रसिद्धिरासीत्। एकदासौ व्यवहाराजीवस्य सकाशं गतः। तञ्चापृच्छत्, "बालकेनैकेनोपलखण्डं निक्षिप्य मम वातायनं भग्नम्। किमत्र प्रतिविधानम्?" इति।

व्यवहाराजीवेनोक्तम्, तस्य पित्रा वातायनस्य संस्कारार्थं मुद्राः प्रदेया इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"तर्हि त्वमेव तावद् रूप्यकचतुष्टयं मे प्रयच्छ, तवैव पुत्रेण वातायनस्य विकृतिर्विहितेति।"

"एवं ननु ? सरलोऽयं मार्गः। ममोपदेशस्य मूल्यं दश रूपकाः। ततो रूप्यकचतुष्टयं गृहीत्वा शिष्टं रूप्यकषट्कं मे प्रदीयताम्।"

सावधानतायाः परा काष्ठा

प्रियनाथेन प्रभोः समीपमागत्योक्तम्—आर्य, यस्यां पेटिकायामत्यावश्यकानि पत्राणि संरक्ष्यन्ते तस्याः कुञ्चिका नष्टेति।

द्वितीयापि कुञ्चिका मया ते दत्ता। कच्चित् सापि हारिता त्वया।

नहि नहि, आर्य। जानाम्येव कुत्र सा वर्तते।

तर्हि तयैवोद्घाट्यतां पेटिका।

मर्षयतु मर्षयतु, आर्य। यथा सा द्वितीया कुञ्चिका न नश्येत् तथा सा पेटिकायामेव रक्षिता।

सायणभाष्य-पाठविमर्शः

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

सायणभाष्ये लिपिकरप्रमादादन्तरान्तरा पदानां स्थानविपर्यासः परिदृश्यते। तथाहि—

दिव्या अङ्गारा इरिणे न्युप्ताः।
शीताः सन्तो हृदयं निर्दहन्ति॥

[ऋ० सं० १०।३४।९] इत्यर्धर्चस्य भाष्ये दृश्यते—

"दिव्या दिवि भवा अपकृता अङ्गारा अङ्गारसदृशा अक्षा इरिणे इन्धनरहिते आस्फारे न्युप्ताः शीताः शीतस्पर्शाः सन्तोऽपि हृदयं कितवानामन्तःकरणं निर्दहन्ति पराजयजनितसन्तापेन भस्मीकुर्वन्ति इति।

टिप्पण्याम् MaxMüller-महोदयेन विलिखितम्—अपकृताः A. CA. B$_4$. C$_2$. B$_1$. अपा क्षताः CB. म-ग्रन्थे यद् दृष्टं पुण्यपत्तन-ग्रन्थेऽत्र तदेव मुद्रितम्, पाठान्तरं पुनरवज्ञयैवोपहृतम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अत्रैदमवधेयम्। भाष्ये "दिवि भवा" इत्येतस्मादनन्तरम् अपकृताः इति हस्तलिखितेषु पुस्तकेषु वर्तते, क्वचिच्च अपा क्षताः इति वर्तते। अङ्गारा इत्यस्याकारे परेऽपि शब्दयोरनयोर्विसर्जनीयस्य लोपो न विहित इत्यपि विशेषतो दृष्टिमाकर्षति। न्युप्ता इति मूलस्थस्य कठिनशब्दस्य प्रतिशब्दोऽपि भाष्ये नोपलभ्यते। हस्तलिखितद्राविडलिपिमयपुस्तकेषु पवयोर्विशेषोऽध्यवसातुं दुष्कर इति न खल्वेतन्न विदितं लिपिकुशलानाम्। इकारश्च (ि) त्वरया विलिखितोऽस्पष्टोपरिभागो वा आकाररूपं (ा) परिगृह्णाति। अत एव यत् साम्प्रतम् अपकृताः इति वा अपा क्षता इति वा दृश्यते तन्मूलतः अवक्षिप्ताः इत्येव। तच्च 'न्युप्ताः'-शब्दस्य प्रतिशब्दत्वेन प्रयुक्तं भाष्यकृद्भिः, तस्य चानन्तरं शीता इति पदस्य शकारस्य सद्भावाद् विसर्गस्य लोपो न विहितः। १०।२७।१७-भाष्ये 'न्युप्ताः'-शब्दस्य प्रतिशब्दो दृश्यते निक्षिप्ताः इति, अस्य च सूक्तस्य [१०।३४] पञ्चममन्त्रभाष्ये दृश्यते न्युप्ताः कितवैरवक्षिप्ताः इति। अत एव "दिव्या दिवि भवा अङ्गारा अङ्गारसदृशा अक्षा इरिणे इन्धनरहिते आस्फारे न्युप्ता अवक्षिप्ताः शीताः" इति पठनीयमिति प्रतिभाति।

मुग्धपथिककथा

कश्चिन्मुग्धोऽध्वगस्तीर्त्वा कृच्छ्रात्तृष्णातुरोऽटवीम्।
नदीं प्राप्यापि न पपौ वीक्षाञ्चक्रे परं जलम्॥
तृषितोऽपि पिबस्यम्भः किं नेत्युक्तोऽत्र केनचित्।
इयत् कथं पिबामीति मन्दबुद्धिरुवाच तम्॥
किं दण्डयति राजा त्वां सर्वं पीतं न चेत् त्वया।
इति तेनोपहसितोऽप्यम्बु मुग्धः स नापिबत्॥
एवं न शक्नुवन्तीह यद् यत् कर्तुमशेषतः।
यथाशक्ति न तस्यांशमपि कुर्वन्त्यबुद्धयः॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

A certain foolish traveller, tormented by thirst, having with difficulty got through a wood, reached a river; however he did not drink of it, but kept looking at the water. Some one said to him, "Why do you not drink water though you are thirsty?" But the blockhead answered, "How can I drink so much water as this?" The other person ridiculed him saying, "What! Will the king punish you if you do not drink it all up?" But still the foolish man did not drink the water. Thus fools do not perform all that they can of what they cannot do in its entirety.

नामरहस्यम्

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

कस्य वा न सुविदितं सत्यभामेति नाम भारतवर्षीयस्य? सा खलु भगवतः श्रीकृष्णस्य पत्न्येवासीत्। कदाचित् सा सत्येति कदाचिच्च भामेति च व्यपदिश्यते स्म। अत एव महाभाष्ये दृश्यते— "अथवा पूर्वपदलोपोऽत्र द्रष्टव्यः। अत्यन्तसिद्धः सिद्ध इति। तद् यथा देवदत्तो दत्तः सत्यभामा भामेति।" "अथवा दृश्यन्ते हि वाक्येषु वाक्यैकदेशान् प्रयुञ्जानाः पदेषु च पदैकदेशान्। वाक्येषु तावद्वाक्यैकदेशान्। प्रविश पिण्डीम्, प्रविश तर्पणम्। पदेषु पदैकदेशान्। देवदत्तो दत्तः, सत्यभामा भामेति।" इति च।

इदानीं सत्यभामाशब्दस्यार्थो विचार्यते। सत्यः भामः यस्याः सेति बहुव्रीहौ सत्यभामेति पदं निष्पन्नम्। भामशब्दश्च भाधातुनिष्पन्नो दीप्त्यर्थकः, भामधातुनिष्पन्नश्च क्रोधार्थकः। निघण्टौ च क्रुध्यतिकर्मसु धातुषु भामते इत्युपलभ्यते, क्रोधनामसु च भाम इति। अत एव (१) यस्याः शरीरशोभा न प्रसाधनादिकृता परं पारमार्थिकी सा सत्यभामा, (२) यस्याश्च अनिर्जयेन द्विषताममर्षो न प्रशाम्यति, या खल्ववन्ध्यकोपा सापि सत्यभामा। चण्डी भामिनीत्यादीनि[1] नामानि द्वितीयमर्थं समर्थयन्ते।

---

[1] "सुन्दरी रमणी रामा, कोपना सैव भामिनी" "चण्डस्त्वत्यन्तकोपनः" इति चामरः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भामधातुविषये पुनर्विप्रतिपद्यन्ते विपश्चितः। भ्रमधातोरेवेदं प्राकृतं रूपम्, तेन संक्षोभः क्रोध इत्यर्थ इति केचित। भी-धातु-निष्पन्न एवायं शब्दो भीम-शब्दस्यैव ज्ञातिरिति बहवः पाश्चात्त्याः शब्दार्थतत्त्वविदः। वयं तु मन्यामहे दीप्त्यर्थकभाधातुनिष्पन्नो भामशब्दः क्रोधार्थे पर्यवसितः। वदननयनलौहित्यादिकरणकश्चित्त-विकार एव क्रोध इति व्यपदिश्यते इति। अत एव वङ्गभाषायां राग-शब्दस्यार्थः क्रोध इति। (क्रमशः)

पण्डित-मूर्खयोः

[श्रीअनन्तकुमार शास्त्री ज्योतिषाचार्यः]

पुरा विक्रमपुरे सार्वभौम-तर्कालङ्कारौ भ्रातरौ पाण्डित्येन जगद्व-रेण्यावपि दारिद्र्यनिपीडितावास्ताम्। तयो र्वासगृहं तृणाच्छादित-जर्जर-वंशखण्डोपरि कथमपि दण्डायमानमिवासीत्। एकदा वायव्यां प्रलयघनमिव घनधूम्राभ-मेघजालमालोक्य उद्विग्नः सार्वभौमः पृच्छति, भ्रातः! वायव्यां प्रलयघन इव दृश्यते, आयात्येव प्रभञ्जनः, गृहस्तम्भाश्च जीर्णाः, अतः किमिदानीं कर्त्तव्यम्? तर्कालङ्कारः प्राह, आर्य्य! उपायश्चिन्त्यताम्। सार्वभौमः कथयति—अत्र बहिःस्तम्भ-निवेशनमेवोपायः। अत उभावेव दात्रमादाय वंशाटवीतो वंशमेकं छिन्नवन्तौ। ततश्च पृच्छति सार्वभौमः। अहो वंशोऽयं कुत्र सन्नि-धातव्यः? तर्कालङ्कारेणाभिहितम्—आर्य्य, जीर्णगृहे बहिःस्तम्भ-रोपणविधिः स्मृतिशास्त्रे नास्ति, न्यायशास्त्रेण चिन्त्यताम् इति। सार्वभौमेनोक्तं—न्यायशास्त्रेऽपि नैष विधिः परिलक्ष्यते, तत् सत्वरं चिन्त्यतामुपायः। समायाति प्रभञ्जनः। तर्कालङ्कारेण विचिन्त्याभि-हितम्—आर्य्य, शास्त्रे यत् कण्ठतो नोक्तम्, तत्तु युक्त्या विचार्य्यम्। दृश्यते हि "क्षतस्थाने औषधं प्रयुञ्जीत" इति। कण्ठे चेत् क्षतं तत्रैव प्रलेपो देयः, नतु पादे। अत्रापि वायव्यां मेघः समुदेति, प्रभञ्जनोऽपि तत एवागच्छति, अतो वंशा... तस्यामेव दिशि स्तम्भकण्ठलग्नच्छदकण

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

योजनीयमिति। तदाकर्ण्य सार्वभौमः सोच्छ्वासं ब्रूते—भ्रातः, सुष्ठु अभिहितं धीमता। उत्तिष्ठ सत्वरम्। इत्युक्त्वा उत्थाय उभावेव वायुकोणे स्तम्भकण्ठे वंशाग्रं बद्ध्वा तन्मूलन्तु भूमौ निधाय धृत्वा सावधानौ तिष्ठतः। यदा यदा प्रबलं वाति प्रभञ्जनः तदा तदवोभौ दुर्गा दुर्गेति व्याहरन्तौ तद्वंशं शक्त्या व्यचालयताम्। प्रबलवात-वेगेनोभयोर्बाहुबलेन च स्वल्पेनैव कालेन तद्गृहं पपात धरणीतले।

ततः सार्वभौमो निःश्वस्याह, भ्रातः! ईश्वरेण विरोधे को विजयते? श्रान्तोऽस्मि तदेहि, इदानीं ताम्रकूटं सेवनीयमिति।

रस-मञ्जरी

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

"परिहासविजल्पितं सखे परमार्थेन न गृह्यतां वचः।"

अध्यापकः। वत्स सुभाष, निर्धारणे का वा विभक्तिर्भवति?

सुभाषः। षष्ठी सप्तमी च।

अध्यापकः। सम्यक्। उदाहरणेन विशदीकुरु।

सुभाषः। आर्य, षष्ठ्या उदाहरणम्—पर्वतानां हिमालयः श्रेष्ठः। सप्तम्याः—कविषु कालिदासः श्रेष्ठः इति।

गवेन्द्रः। आर्य, क्व वा षष्ठी स्यात् क्व वा सप्तमी?

अध्यापकः। अरे मूढ, एतदपि न जानासि? उदाहरणत एव बहुषु स्थलेष्वाचार्याणामभिप्रायो विज्ञायते। पर्वताः प्राणैर्विहीना अतः तत्र षष्ठी; कवयः प्राणैः सम्पन्ना, अतः तत्र सप्तमी। अत एव प्राणिषु सप्तमी स्यात्, अप्राणिषु च षष्ठीति विभावनीयम्।

मनीषः। आर्य 'पुष्पेषु जाती' इति पठितमस्माभिः। अत्राप्राणिनि पुष्पशब्दे कथं सप्तमी?

अध्यापकः। वत्स, पुष्पाणामपि प्राणा वर्तन्ते। उक्तञ्च मनुना—

तमसा बहुरूपेण वेष्टिताः कर्महेतुना।
अन्तःसंज्ञा भवन्त्येते सुख-दुःखसमन्विताः॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इति। अस्यार्थः—एते वृक्षादयः बहुरूपेण विचित्र-दुःखफलेन कर्म-हेतुना अधर्मकर्महेतुकेत तमसा तमोगुणेन वेष्टिता व्याप्ताः सुखदुःख-समन्विताः सूर्यस्य सन्तापाधिक्याद् दुःखं जलधरजलसम्पर्कात् सुखमनुभवन्तः अन्तःसंज्ञा भवन्ति। बहिः कथनादिकार्यस्याभावात् अन्तःसंज्ञा इत्युच्यन्ते। जगदीशचन्द्र-वसुमहोदयेनापि सुसूक्ष्मयन्त्रादि-साहायकेन प्रतिपादितं वृक्षादीनामपि प्राणा वर्तन्त एव। अत एव "पुष्पेष जाती" इत्यत्र सप्तमी निराबाधैव।

पुस्तकपरिचयः

श्रीरामदासचरितम्। पण्डितया क्षमा रावदेव्या विरचितं संस्कृतभाषामयं महाकाव्यम्। N. M. Tripathi Ltd., Princess Street, Bombay 2 इत्यतः प्रकाशितम्। मूल्यं रूपकपञ्चकमात्रम्।

विरलाः खलु पण्डितक्षमादेवीसदृशाः कविप्रवराः साम्प्रतं भारते वर्षे। बहुशः खलु समास्वादितानि मञ्जूषाया वाचकमहाभागैरमृतमयान्येतस्या आख्यानानि। इदानीं श्रीमतः साधो रामदासस्य चरितमवलम्ब्य विरचितमिदं त्रयोदशसर्गकं महाकाव्यं पण्डितवर्यया क्षमादेव्या। प्रथमतस्तावत् साधोश्चरित्रम्, तत्रापि क्षमादेव्याः संग्रथनम्, तत्रापि निर्णयसागरे मुद्रणम्, तत्रापि राधाकृष्णन्-महोदयस्याभाषणम्, तत्रापि सुललिताङ्लभाषामयानुवादः इत्यहो सौभाग्यतोऽस्माकं महतीयमुत्सवपरम्परा। अवश्यं संग्राह्यमिदं पुस्तकं संस्कृत-साहित्य-रसिकैः, अध्येयतया चेदं निदष्टव्यं पाठशालासु। मुक्ताफल-सदृशैरक्षरैः कदलीदलकल्पेषु सुश्लक्ष्णेषु पत्रेषु मुद्रितस्य साङ्लानुवादस्य राधाकृष्णनलिखिताङ्लभाषामयोपोद्घातसमन्वितस्य त्रयोदशसर्गात्मकस्य परमरमणीयस्य संस्कृतभाषामयस्य काव्यस्यास्य मूल्यं रूप्यकपञ्चकमात्रमिति सर्वैरपि क्रेतु शक्यं पुस्तकमिदं क्रेष्यते च।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

TECHNICAL TERMS AND TECHNIQUE OF

Sanskrit Grammar

A Critical, Comparative and Historical Study

BY

Kshitish Chandra Chatterji, Sastri, M.A., D. Litt

Lecturer, Calcutta University ;
Formerly Editor, Calcutta Oriental Journal,
Surabharati Oriental Literary Digest, etc., etc.

The Modern Review (December, 1950) **says :**

"Honour to whom honour is due. Dr. Chatterji has broken entirely new ground in his **Technical Terms and Technique of Sanskrit Grammar** and demonstrated clearly that Bengal, though fallen on evil days, can even now produce works on Indology that invite and bear comparison with the best work produced in any part of the world. Who ever thought that all the technical terms admitted of satisfactory explanation and who ever imagined that a work on grammatical terminology could be made as delightful as a novel ? In this volume of nearly 350 pages the technical terms of Sanskrit grammar from the Brahmanas, Nirukta, Pratishakhyas, Panini, Katyayana, Patanjali, down to Prayogaratnamala and Harinamamrita have been considered critically and historically in all their bearings and apparently arbitrary technical terms like *gha*, *bha*, *lat*, *lit*, etc., have been traced to their sources. **We have nothing but admiration for this masterpiece of scholarship and warmly recommend it to our readers."**

Price Rupees Twelve only. *Foreign Rs. 14/-*

Postage Extra.

VISVANATH CHATTERJI

81, Shyambazar Street,

CALCUTTA—4

Phone : B. B. 4049

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

MANJUSHA (Sanskrit Monthly Magazine)
Registered No. C. 3278

MAHABHASHYA

(First Ahnika)

EDITED WITH

English translation, exhaustive critical and explanatory notes, extracts from other commentaries, full Sanskrit explanation of the Vedic mantras etc. etc.

Rupees Three aad annas Twelve only.

CANDRA VYAKARANA

Part I (Chapters 1—3).

Critically edited with Vṛtti, corresponding rules of Paṇini, Bhoja and others, Introduction etc.

By

KSHITISH CHANDRA CHATTERJI, SASTRI, M. A., D. LITT.

Lecturer, Calcutta University ;
Formerly Editor, Calcutta Oriental Journal,
Surabharati, Oriental Literary Digest, etc., etc.

Price Rupees Twelve only. *Foreign Rs. 15/-*

A No Bhadriyam

Hymn 1. 89 of the Rigveda with the critically edited commentaries of (1) Veṅkaṭamādhava (2) Skandasvāmin (3) Mahīdhara (4) Sāyaṇa (5) Kās'yapa Kṣitīsacandra unfolding the significance of each word and expression, and extracts from the commentaries of Uvaṭa, Haradatta and others, English translations, critical and explanatory notes, comparisons from other languages etc. etc. Price : Rs. 2/8/-

VISVANATH CHATTERJI

81, Shyambazar Street, Calcutta—4

Printed and published by Sri Jyotish Chandra Chatterjee, B.A. from 81, Shyambazar Street, Calcutta—4. Printed at the Elm Press 63, Beadon Street, Calcutta—6.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Approved by the Directors of Public Instruction, Madras, Bihar and Mysore.

श्रीशिवः शरणम्

अष्टम-वर्षे] October, 1953 [द्वितीया संख्या

मञ्जूषा

सम्पादकः—श्रीक्षितीशचन्द्र-चट्टोपाध्यायः

Next Month.

As'oka Inscription. Rasamañjarī.
Rabindranath's Short story.

Just Out ! **Just Out !!**

Patanjali's MAHABHASHYA (Paspasha) with English translation, exhaustive critical and explanatory notes, commentaries. Rs. 3/12/-

A boon to students of languages is **Greek Proverbs** in Roman character with their Latin and English analogues and parallel proverbs and sayings from Sanskrit, Marathi and Bengali. All the grammatical forms have been clearly explained and the student of Sanskrit will not only acquire some knowledge of the glorious Greek language but will be struck with the resemblance it bears to Sanskrit. *Price Rupees : Two only.*

Office : 81, Shyambazar Street, Calcutta—4
Annual Subscription : Rupees Three only.
This number—Annas Eight
Foreign—Rupees Four

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मञ्जूषाया नियमावली

मञ्जूषाया वार्षिकं मूल्यं रूपकत्रितयम्। आश्विनमासतो वर्षारम्भः। ग्राहकैर्वर्षस्य प्रथमसंख्यात एव ग्रहीतव्यम्।

२। प्रतिसौरमासं दशमदिने (आङ्‌लमासस्य चतुर्विंशे दिवसे) 81, Shyambazar Street, Calcutta 4 इत्यतो मञ्जूषा प्रकाश्यते।

काव्यालङ्कारसूत्रवृत्तिः (वामनविरचिता ५।१)

अभिनवविस्तृतटीकोपेता — Rs. 2/-

Convocation Address in Ancient India — -12-

Popular Etymology— Re. 1/-

শব্দকথা— ২\

ইহাতে সরল ও সরসভাবে বাঙ্গালা ভাষায় চলতি ভুলগুলির আলোচনা করা হইয়াছে, **সংস্কৃত ব্যাকরণের দিক্ দিয়া, বাঙ্গালা ভাষার দিক্ দিয়া, ভাষাতত্ত্বের দিক দিয়া,** বঙ্গদর্শন প্রভৃতি হইতে ভূরি ভূরি উদাহরণ উদ্ধৃত করিয়া শব্দ ও শব্দসমষ্টির শুদ্ধি ও অশুদ্ধি বিবেচিত হইয়াছে। ওত-প্রোতশব্দে বিসর্গ আছে কি না, যদি থাকে প্রথম 'ত'র পরে আছে, না দ্বিতীয় 'ত'র পর আছে, না উভয় 'ত'র পরে আছে, 'সঠিক' শব্দ ঠিক কি না, 'ব্যবহারিক' ব্যবহারযোগ্য কি না, আবশ্যক ও আবশ্যকতায় প্রভেদ কি, প্রভৃতি আলোচিত হইয়াছে। "সোনার পাথরবাটি" প্রবন্ধে সংস্কৃত, বাঙ্গালা, ইংরাজী প্রভৃতি নানা ভাষার সোনার পাথর বাটী জাতীয় শব্দগুলি সন্নিবিষ্ট হইয়াছে। ক্রিয়াবিশেষণ প্রবন্ধে বাঙ্গালা, ইংরাজী ও ফরাসী ক্রিয়ার বিশেষণগুলির মূল অর্থ বিবেচিত হইয়াছে। "সন্ধির কথায়" সন্ধির বৈজ্ঞানিক ব্যাখ্যা ও বাঙ্গালা ইংরাজী লাটিন প্রভৃতি ভাষার সন্ধি প্রদর্শিত হইয়াছে; সন্ধি, ষত্ব ও ণত্ব সম্বন্ধীয় নিয়মগুলি সরলভাবে বোঝান হইয়াছে ও বাঙ্গালা উপন্যাসাদি হইতে শত শত দৃষ্টান্ত সন্নিবিষ্ট হইয়াছে।

ঊষার আলো—ছোট ছোট হাসির গল্পের সমষ্টি— ৸০

নক্ষত্রমালা—ধর্মবিষয়ক শ্লোক, সরল ব্যাখ্যা ও অনুবাদ ১৷০

Several complete sets of Vols. IV, V, VI and VII (450 pp. each) of the Manjusha are still available for Rs. 6/8/- per volume and only a few sets of Vols. I-III are available at Rs. 5/12/- for the lot.

श्रीविश्वनाथ-चट्टोपाध्यायः।

८१ श्यामबाजार ष्ट्रीट्, कलिकाता ४

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शरणं तरुणेन्दुशेखरः शरणं मे गिरिराजकन्यका ।
शरणं पुनरेव तावुभौ शरणं नान्यदुपैमि दैवतम् ॥

मञ्जूषा

October, 1953 | १८७५-शकीयकार्त्तिकस्य ८म-वर्षस्य द्वितीया संख्या | Vol. VIII No. 2

श्रीश्रीदुर्गास्तोत्रम्

नमस्ते शरण्ये शिवे सानुकम्पे
नमस्ते जगद्व्यापिके विश्वरूपे ।
नमस्ते जगद्वन्द्यपादारविन्दे
नमस्ते जगत्तारिणि त्राहि दुर्गे ॥१॥

नमस्ते जगच्चिन्त्यमानस्वरूपे
नमस्ते महायोगिनि ज्ञानरूपे ।
नमस्ते सदानन्दरूपस्वरूपे
नमस्ते जगत्तारिणि त्राहि दुर्गे ॥२॥

अनाथस्य दीनस्य तृष्णातुरस्य
क्षुधार्तस्य भीतस्य बद्धस्य जन्तोः ।
त्वमेका गतिर्देवि निस्तारकर्त्री
नमस्ते जगत्तारिणि त्राहि दुर्गे ॥३॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अरण्ये रणे दारुणे शत्रुमध्ये-
ऽनले सागरे प्रान्तरे राजगेहे ।
त्वमेका गतिर्देवि निस्तारहेतु-
र्नमस्ते जगत्तारिणि त्राहि दुर्गे ॥४॥
अपारे महादुस्तरेऽत्यन्तघोरे
विपत्सागरे मज्जतां देहभाजाम् ।
त्वमेका गतिर्देवि निस्तारनौका
नमस्ते जगत्तारिणि त्राहि दुर्गे ॥५॥
नमश्चण्डिके चण्डदोर्दण्डलीला-
समुत्खण्डिताखण्डलाशेषभीते ।
त्वमेका गतिर्विघ्नसन्दोहहन्त्री
नमस्ते जगत्तारिणि त्राहि दुर्गे ॥६॥
त्वमेकाजिताराधिता सत्यवादि-
न्यमेयाजिता क्रोधना क्रोधनिष्ठा ।
इडा पिङ्गला त्वं सुषुम्णा च नाडी
नमस्ते जगत्तारिणि त्राहि दुर्गे ॥७॥
नमस्ते नमस्ते शिवे भीमनादे
सरस्वत्यरुन्धत्यमोघस्वरूपे ।
विभूतिः शची कालरात्रिः सती त्वं
नमस्ते जगत्तारिणि त्राहि दुर्गे ॥८॥
शरणमसि सुराणां सिद्धविद्याधराणां
मुनिदनुजनराणां व्याधिभिः पीडितानाम् ।
नृपतिगृहगतानां दस्युभिर्वा वृतानां
त्वमसि शरणमेका देवि दुर्गे प्रसीद ॥९॥
इदं स्तोत्रं मया प्रोक्तमापदुद्धारहेतुकम् ।
त्रिसन्ध्यमेकसन्ध्यं वा पठनादेव सङ्कटात् ।
मुच्यते नात्र सन्देहो भुवि स्वर्गे रसातले ॥१०॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्तवराजमिमं देवि संक्षेपात् कथितं मया।
समस्तं श्लोकमेकं वा पठेद् यस्तु समाहितः।
स सर्वं दुष्कृतं त्यक्त्वा प्राप्नोति परमां गतिम् ॥११॥

इति विश्वसारतन्त्रे आपदुद्धारकल्पे श्रीदुर्गास्तवराजः समाप्तः।

भारतरत्नमञ्जूषा

शीलस्य तत्त्वम्।

अद्रोहः सर्वभूतेषु कर्मणा मनसा गिरा।
अनुग्रहश्च दानञ्च शीलमेतत् प्रशस्यते ॥
यदन्येषां हितं न स्यादात्मनः कर्म पौरुषम्।
अपत्रपेत वा येन न तत् कुर्यात् कथञ्चन ॥
तत् तु कर्म तथा कुर्याद् येन श्लाघ्येत संसदि।
शीलं समासेनैतत् ते कथितं कुरुसत्तम ॥
यद्यप्यशीला नृपते[1] प्राप्नुवन्ति श्रियं क्वचित्।
न भुञ्जते श्रियं तात समूलाश्च न सन्ति ते ॥

रामायणरत्नमञ्जूषा

अनिर्वेदः श्रियो मूलम्

दृष्टमन्तःपुरं सर्वं दृष्टा रावणयोषितः।
न सीता दृश्यते साध्वी वृथा जातो मम श्रमः॥
किं नु मां वानराः सर्वे शतं वक्ष्यन्ति सङ्गताः।
गत्वा तत्र त्वया वीर किं कृतं तद् वदस्व[2] नः॥
अदृष्ट्वा किं प्रवक्ष्यामि तामहं जनकात्मजाम्।
ध्रुवं प्रायमुपैष्यन्ति कालस्य व्यतिवर्तने ॥
किं वा वक्ष्यति वृद्धश्च जाम्बवानङ्गदश्च सः।
गतं पारं समुद्रस्य वानराश्च समागताः॥

---

[1] नृपते इति दुर्योधनसम्बोधनम्। [2] आर्षोऽयं प्रयोगः। वद इति साधु।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनिर्वेदः श्रियो मूलमनिर्वेदः परं सुखम् ।
अनिर्वेदो हि सततं सर्वार्थेषु प्रवर्तकः ॥
करोति सफलं जन्तोः कर्म यत्तत् करोति सः ।
तस्मादनिर्वेदकृतं यत्नं चेष्टेऽहमुत्तमम् ॥

अनुरूपोक्तयः

न तादृशा आकृतिविशेषा गुणविरोधिनो भवन्ति । शकुन्तला ३ ।

'Such fine forms are never opposed to sterling qualities.'

यदुच्यते पार्वति पापवृत्तये
न रूपमित्यव्यभिचारि तद्वचः ।
तथाहि ते शीलमुदारदर्शने
तपस्विनामप्युपदेशतां गतम् ॥

कुमारसम्भवः ५।३६

'The saying, O Pārvatī, that a fair form is incompatible with vicious conduct, admits of no exception. Thus your conduct, O beautiful one, has become a lesson even to ascetics.'

प्रायो विरूपासु भवन्ति दोषा
यत्राकृतिस्तत्र गुणा वसन्ति ॥ बृहत्संहिता

'Generally defects are found in the ugly, where there is a (fair) form, there dwell (sterling) qualities.'

यत्राकृतिस्तत्र गुणा वसन्ति
नैतद्धि सम्यक् कविना प्रणीतम् ।
येनातिचार्वङ्ग्यपि मे हृदिस्था
दुनोति गात्रं विरहे प्रियासौ ॥

'Where there is a fair form there dwell sterling qualities —this has not been rightly stated by the poet, for that most beautiful beloved of mine, residing in my heart, afflicts my limbs on separation.'

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

घोणोन्नतं मुखमपाङ्गविशालनेत्रं
नैतद्धि भाजनमकारणदूषणानाम्।
नागेषु गोषु तुरगेषु तथा नरेषु
न ह्याकृतिः सुसदृशं विजहाति वृत्तम्॥

मृच्छकटिकम् ९।१६

'The face with the nose erect and eyes broad at the two ends—this can never be the object of groundless slander. In elephants and cattle and horses, a fair form never gives up becoming conduct.'

Therefore whenever that thou dost behold,
A comely corpse, with beauty fair endow'd,
Know this for certain, that the same doth hold
A beauteous soul……
For all that fair is, is by nature good.

SPENSER, *An Hymn in Honour of Beauty.*

सेयमाकृतिर्न व्यभिचरति शीलम्। दशकुमार ६।

'So fair a form never runs counter to good conduct.'

आकृतिमनुगृह्णन्ति गुणाः। विद्धसालभञ्जिका।

भिद्यते वा सद्वृत्तमेतस्य निर्माणस्य। उत्तररामचरित ४

बालिके! कल्याणिनी तवाविसंवादिन्यचपला बालभावेऽप्याकृतिरियम्। कादम्बरी।

आकृतिविशेषप्रत्ययादेनामनूनगुणकां सम्भावयामि। मालविकाग्निमित्रम्।

आकृतिगुणयोर्व्याप्तौ शास्त्रोक्तायां विशङ्कते कतमः।
दाक्षिण्यगुणाभावं युष्मासु नितान्तशोभनाकृतिषु॥ रससदनभाणः।

There's nothing ill can dwell in such a temple [i. e. body];
If the ill spirit have so fair a house,
Good things will strive to dwell with 't.

The Tempest, i. 2. 457

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

For of the soul the body form doth take ;
For soul is form, and doth the body make.

SPENSER, *An Hymn in Honour of Beauty.*

There is a fair behaviour in thee, captain ;
And though that nature with a beauteous wall
Doth oft close in pollution, yet of thee
I will believe thou hast a mind that suits
With this thy fair and outward character.

Twelfth Night, i. 2.

"Why Providence so often arranges a combination of good looks and more than doubtful morals it is hard to say."

The devil hath power,
To assume a pleasing shape. *Hamlet*, ii. 2.

Was ever book, containing such vile matter,
So fairly bound ? O that deceit should dwell
In such a gorgeous palace ! *Romeo and Juliet*, iii, 2.

Rarely do great beauty and great virtue dwell at the same hearth. PETRARCH.

A worthless woman ! mere cold clay,
As all false things are, but so fair
She takes the breath of men away
Who gaze upon her unaware.

E. B. BROWNING, *Bianca.*

अशोकस्य शिलालिपिः

(१)

इयं धर्मलिपिः देवानां प्रियेण प्रियदर्शिना राज्ञा लेखिता। इह न कश्चिज्जीव आलभ्य प्रहोतव्यः। न च समाजः कर्तव्यः। बहुकं हि दोषं पश्यति समाजे देवानां प्रियः प्रियदर्शी राजा। सन्त्यपि एकत्याः समाजाः साधुमताः देवानां प्रियस्य प्रियदर्शिनो

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राज्ञः। पुरा महानसे देवानां प्रियस्य प्रियदर्शिनो राज्ञः अनुदिवसं बहूनि प्राणशतसहस्राणि आलभ्यन्त सूपार्थाय। तद् अद्य यदेयं धर्मलिपिर्लिखिता त्रय एव प्राणा आलभ्यन्ते सूपार्थाय—द्वौ मयूरौ एकश्च मृगः। सोऽपि मृगो न ध्रुवः। एतेऽपि त्रयः प्राणाः पश्चान्नालप्स्यन्ते।

[इयं धंमलिपी देवानं पियेन पियदशिना राञा लेखापिता। इध न किंचि जीवं आरभित्पा पंजूहितव्यं। न च समाजो कतव्यो। बहुकं हि दोषं समाजम्हि पसति देवानं पियो पियदसी राजा। अस्ति पि तु एकचा समाजा साधुमता देवानं पियस पियदसिनो राञो। पुरा महानसम्हि—देवानं पियस पियदसिनो राञो अनुदिवसं बहूनि पाणसतसहस्राणि आरभिसु सूपाथाय। से अज यदा इयं धंमलिपी लिखिता ती एव पाणा आरभरे सूपाथाय द्वो मोरा एको मगो, सोऽपि मगो न धुवो। एते पि ती पाणा पछा न आरभिसरे।]

मार्जारचरित्रम्

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

समागतः शारदोत्सवः। हरिचरणमहोदयेन पुत्रस्य दुहितुश्च कृते कोऽप्यभिनव उपहारः संग्रहीतव्यः। कृष्णापण-(black market)-प्रसादेन तेन भूयानर्थ उपार्जितः, इदानीं स्वजनानां परितोषाय किञ्चिद् व्ययितुमिष्यते। पुत्रेणोक्तम्, पितः, मया क्यामेरासमाख्यं चित्रनिर्माणयन्त्रमपेक्ष्यते। दुहित्रा चोक्तम्, तात, मया तावत् सङ्गीतार्थं तन्त्रीयन्त्रमपेक्ष्यते। सर्वं पत्रे विलिख्य हरिचरण-महोदयो बहिर्गन्तुं प्रवृत्तः। परं चलनाय यावत् पादौ प्रसारयति तावत् कस्यचन क्षुतस्य शब्दस्तस्य श्रवणपथमापतितः। अहो प्रारम्भ एवापशकुनमित्युक्त्वा विररामासौ चलनात्। उक्तं च

यो न मन्येत बाधां च क्षुतं च गृहगोधिकाम्।
विपत् सन्निहिता तस्य गर्दभः स न संशयः॥ इति।

तेन खलु बहवो वणिजो गर्दभीकृताः, स तु लेशतोऽपि गर्दभत्वं नेच्छति। अत एव सभक्तिकमुच्चारयामासासौ देवानां देवीनां च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुण्यानि नामानि। ततः पुनरपि यावद् गमनाय प्रवर्तते तावत् काष्ठखण्डमेकं चरणयोर्लग्नम्। परं "पुरतः पतिता बाधा कार्यससिद्धिकृद् भवेत्" इति शास्त्रं संस्मृत्यासौ प्राचलदेव। बहिर्द्वारे च पदमर्पयतो हरिचरणमहोदयस्य श्रुतिपथमनुप्राप्तम्—अरे हरे इति। तेन खलु सर्वासु दिक्षु दृष्टिः पातिता परं कोऽपि न क्वापि प्रत्यक्षीकृतः। ततः पुनरपि "अरे हरे" इति शब्दद्वयं तस्य कर्णविवरं प्रविष्टम्। स च पुरतः जाज्वल्यमानपीतनयनयुगलं मार्जारमेकम् अपश्यत्। उक्तञ्च तेन—किम्? इति। मार्जारिणोक्तम्, क्व प्रस्थितोऽसि? इति। तेनोक्तम्—पूजार्थं पुत्रादीनामुपहारक्रयणायेति। मार्जारिण पृष्टम्, मह्यं तावत् किं क्रेष्यसि? इति।

प्रथमतस्तावन्मार्जारमुखे मानुषीं भाषां समाकर्ण्य नितरां बिभाय हरिचरणमहोदयः, इदानीं तु व्यपगतं तस्य भयम्। तेनोक्तम्, तव कृते—तव कृते मत्स्यमेकमानेष्यामि इति। मार्जारस्तु रोषस्य परां काष्ठामधिरूढोऽवदत्, अनभिज्ञोऽसि शिष्टजनसमाचारस्य। विरम त्वं त्वङ्कारात्। "भवतः कृते" इति वक्तव्यं न पुनः "तव कृते" इति। इतः परं ब्रूहि—अत्रभवतः कृते। अलं च मत्स्येन। यदा तावन्मत्स्यभक्षणस्पृहा समुदेति मम मानसे तदा तव महानसादेव मत्स्यं गृह्णामि इति। हरिचरणमहोदयोऽवदत्, अहो बुद्धं मयेदानीं कथं वा प्रतिदिनमेव मत्स्यानां न्यूनता सन्दृश्यते महानसे। तर्हि अत्रभवतः कृते किं वा क्रयम्? इति। मार्जारिणोक्तम्—सुरम्यमुपानद्युगलमिति। हरिचरणेन तथेति प्रतिश्रुत्य प्रस्थितम्।

उच्चावचानि द्रव्याणि क्रीणानो हरिचरणो विस्मृतवान् मार्जारवृत्तान्तम्। सायं प्रत्यावर्तमानो यावद्देहल्यां पदमर्पयति तावन्मार्जारिणोक्तम्, अरे रे हरिचरण, आनीतं ननु? इति। हरिचरणेनोक्तम्, अहो विस्मृतं खलु मया इति। मार्जारिणोक्तम्, विस्मृतमिति! भोजने तु विस्मृतिः कदापि ते न भवति। श्वस्तावदवश्यम् आनेयम्। अन्यथा पश्य मे सुतीक्ष्णं नखरम्। अनेन नखरेण त्वां खण्डशः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कल्पयित्वा भक्षयिष्यामि इति। हरिचरणमहोदयः "अवश्यं श्व आनेष्यामि" इति प्रतिश्रुत्यान्तःपुरं प्रविवेश।

परेद्यवि यावद्धरिचरणो बहिर्गच्छति तावन्मार्जारराजेनोक्तम्—अरे रे हरिचरण, स्मर्यते वा? इति। हरिचरणेनोक्तम् - अथ किमिति। मार्जारेणोक्तम्, अवश्यमद्यानेयं ममोपानद्युगलम्, अन्यथा त्वां खण्डशः कल्पयित्वा भक्षयिष्यामि इति। हरिचरणमहोदयस्तथेति प्रतिज्ञाय प्रचलितः।

मार्गे च यं यमुपानदापणं पश्यति तमेव प्रविश्य पृच्छति—वर्तते वा मार्जारस्योपानदिति। केनचिदापणिकेनोच्यते—नास्तीति, केनापि विहस्यते, केनापि वा नर्मवचनान्युच्यन्ते। ततश्चातिमात्रं विषण्णः शनैः शनैर्गच्छन् पथिकेन केनचनोक्तः, अयि भो महोदय, किं ते वृत्तम्? अपि ग्रन्थिभेदकेनार्थस्तेऽपहृतः? किमिति विषादस्य प्रतिमूर्त्तिरिव सन्दृश्यसे? इति। तेनोक्तम्, भद्र, मार्जारेणैकेनोक्तम्, खण्डशः कल्पयित्वा त्वां भक्षयिष्यामीति। ततश्चा मूलात् सर्वं विवृतम्। भद्रमहोदयेनोक्तम्, वर्तते वार्थो भवतः सविधे? इति। तेनोक्तं बाढं वर्तते इति। ततश्च भद्रमहोदयेन स आपणमेकं नीतः। तत्र च तस्योपदेशेन हरिचरणमहोदयो भस्त्रिकामेकां क्रीतवान्। ततश्च स भद्रपुरुषो हरिचरणस्य कर्णे किमपि कथितवान्।

हरिचरणोऽपि महता हर्षेण गृहमागच्छन् द्वारि मार्जारेण पृष्टः, आनीतं वा? इति। हरिचरणेनोक्तम्, बाढमानीतम् इति। मार्जारेणोक्तम्, तर्हि किमिति मे न ददासि? इति। हरिचरणेनोक्तं भस्त्रिकायामेतस्यां वर्तते इति। ततश्चासौ मञ्चोपरि भस्त्रिकां स्थापितवान्। मार्जारोऽप्युत्प्लुत्य यावद् भस्त्रिकाभ्यन्तरं प्राविशत् तावन्निरुद्धं हरिचरणमहोदयेन भस्त्रिकामुखम्। मार्जारश्च भस्त्रिकाभ्यन्तरे पुनः पुनर्नखराघातं कुर्वन्नवदत्, अरे रे हरे, सत्वरमुद्घाटय भस्त्रिकाम्, नो चेत् तवास्थीनि भक्षयिष्यामि, मांसानि भक्षयिष्यामि, चर्मणा च पटहं विनिर्माय वादयिष्यामि इति। हरिचरणस्तु तूष्णीं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्थितः। ततः पुनरपि मार्जारिणोक्तम्, भद्र, कृपयोद्घाटय भस्त्रिकाम्, नाहं पुनरपि त्वां किमपि वदिष्यामि, न वा भाययिष्यामि। कृपां कुरु, भद्र इति।

तथापि हरिचरणो जोषमेवावतस्थे। तदानीं मार्जारेण यावच्छक्ति भस्त्रिकागात्रं नखरैर्विलेखितुमारब्धम्। भस्त्रिका छिन्ना चेन्मार्जारोऽयं नखराघातेन मां खण्डशः कल्पयित्वा भक्षयिष्यतीत्याशङ्क्य हरिचरणमहोदयो भस्त्रिकां गृहीत्वा गङ्गातीरमासाद्य नौकामधिरुह्य मध्येगङ्गं समार्जारां भस्त्रिकां न्यपातयत्। ततश्च शान्तेन मनसा गृहान् प्रत्यावर्तत।

कान्दवम् (पाँउरुटि, bread)

[श्रीरमाप्रसाद-मुखोपाध्यायः, आयुर्वेदाचार्यः]

सहृदयाः, पर्तुगीजानामधिकारकालत एव भारते वर्षे पाँउरुटिसमाख्यानां रोटिकानां प्रचलनमिति बहवो मन्यन्ते। परं बहोः कालात् पूर्वं वृन्दग्रन्थस्य कृतान्नवर्गे लिखितम्—

वारिणा कोमलां कृत्वा समितां लवणान्विताम्।
विनीय सन्धानं किञ्चित् स्थापयेद्भाजने नवे॥
चण्डातपे तावद्रक्षेद् यावदम्लत्वमाप्नुयात्।
उद्धृत्य च पुनः पश्चात् सन्नयेद् दृढपाणिना॥
ततोऽपूपाकृतिं कुर्याद् घनमूर्छितया तया।
भूयंङ्गारप्रतप्ते तु कन्दुगर्भे निवेश्य च।
पङ्केन रन्ध्रमालिप्य स्वेदयेत्तां यथाविधि॥
कान्दवं मलकृद् वृष्यं त्रिषु दोषेषु पूजितम्।
सद्यो रुचिकरं हृद्यं शीघ्रमिन्द्रियतर्पणम्॥
दुग्धे मांसरसे वापि कान्दवं भक्षयेन्नरः।
श्वासकासज्वरच्छर्दिमेहकुष्ठक्षयापहम्॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इति। कान्दवं च निःशङ्कं द्विजैरप्युपयोक्तुं शक्यते। तथा च तिथ्यादितत्त्वधृतं कूर्मपुराणम्—

कन्दुपक्वानि तैलानि पायसं दधिशक्तवः।
द्विजैरेतानि भोज्यानि शूद्रगेहकृतान्यपि ॥ इति।

लक्षण-संग्रहः

(१)

[श्रीफटिकलालदासः]

अक्षौहिणी— एकेभैकरथा त्र्यश्वा पत्तिः पञ्चपदातिका।
पत्त्यङ्गैस्त्रिगुणैः सर्वैः क्रमादाख्या यथोत्तरम् ॥
सेनामुखं गुल्मगणौ वाहिनी पृतना चमूः।
अनीकिनी दशानीकिन्यक्षौहिणी.... ॥

अग्नयः [त्रयः]—दक्षिणाग्निर्गार्हपत्याहवनीयौ त्रयोऽग्नयः।

अतिथिः—(१) एकरात्रं तु निवसन्नतिथिर्ब्राह्मणः स्मृतः।
अनित्यं हि स्थितो यस्मात्तस्मादतिथिरुच्यते ॥
—मनुसंहिता।

(२) यस्य न ज्ञायते नाम न च गोत्रं न च स्थितिः।
अकस्माद् गृहमायातः सोऽतिथिः प्रोच्यते बुधैः ॥

अर्घः— (१) आपः क्षीरं कुशाग्राणि दधि सर्पिश्च तण्डुलाः।
यवः सिद्धार्थकश्चैव अष्टाङ्गोऽर्घः प्रकीर्त्तितः ॥
—तन्त्रम्।

(२) रक्तबिल्वाक्षतैः पुष्पैर्दधिदूर्वाकुशैस्तिलैः।
सामान्यः सर्वदेवानामर्घोऽयं परिकीर्त्तितः ॥
—देवीपुराणम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(३) आपः क्षीरं कुशाग्राणि घृतं मधु तथा दधि।
रक्तानि करवीराणि तथा रक्तञ्च चन्दनम्।
अष्टाङ्ग एष ह्यर्घो वै भानवे परिकीर्त्तितः॥
—काशीखण्डः।

अलङ्काराः— काव्यशोभाकरान् धर्मानलङ्कारान् प्रचक्षते।
अलङ्करिष्णवस्ते च शब्दमर्थमुभौ त्रिधा॥

अवताराः (दश)—मत्स्यः कूर्मो वराहश्च नरसिंहोऽथ वामनः।
रामो रामश्च कृष्णश्च बुद्ध-कल्की च ते दश॥
—वराहपुराणम्।

नामरहस्यम्

[श्रीक्षितीशचन्द्रचट्टोपाध्यायः]

(१)

कस्य वा न परिचितो वैशम्पायन इति नाम पौराणिकस्य वा कादम्बरीरसास्वादविह्वलस्य वा? अर्थः पुनरस्य पञ्चाक्षरस्य शब्दस्य सर्वथा न सुबोधः। (२) विशं मनुजं पातीति विशम्पः। विशाम्पतिरित्यर्थः। आतोऽनुपसर्गे कः [३।२।३] इति कर्तरि कः। बाहुलकाद् विभक्तेरलुक्। विशम्पशब्दश्चायमश्वादिषु पठ्यते। अत एव विशम्पस्य गोत्रापत्यं पुमान् इत्यर्थे अश्वादिभ्यः फञ् [४।१।११०] इति फञि वैशम्पायन इति पदं निष्पन्नम्।

(२) शम्पाशब्दो विद्युदर्थे सुप्रसिद्धः। विगता शम्पा यस्मात् स इति वा, यस्य स इति वा विशम्पः। विद्युच्छब्दोऽत्रोपचारात् प्रज्ञाया वा प्रतिभाया वा शारीरकान्तेर्वा बोधकः। अत एव निष्प्रज्ञो वा निष्प्रतिभो वा निष्प्रभो वा विशम्पशब्दस्यार्थः। तस्य गोत्रापत्यं वैशम्पायनः।

(३) वैयाकरणप्रवरेण वर्धमानेनोक्तम्—विविधं शं सुखं पातीति विशम्पः। तस्य वैशम्पायन इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

महाभाष्यपाठविमर्शः

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

अथैतस्मिन्नेकार्थीभावकृते विशेषे किं स्वाभाविकं शब्दैरर्थाभिधानम्, आहोस्विद् वाचनिकम् ?

स्वाभाविकमित्याहुः ।

कुत एतत् ?

अर्थानादेशात् । न ह्यर्था आदिश्यन्ते ।

कथं पुनरर्थान् आदिशन्नेवं ब्रूयान्नार्था आदिश्यन्त इति । यदाह भगवान्—अनकम् अन्यपदार्थे [२।२।२४], चार्थे द्वन्द्वः [२।२।२९], अपत्ये, रक्ते, निर्वृत्त इति ।

नैतान्यर्थादेशनानि । स्वभावत एतेषां शब्दानाम् एतेष्वर्थेष्वभिनिविष्टानां निमित्तत्वेनान्वाख्यानं क्रियते । तद् यथा—कूपे हस्तदक्षिणः पन्थाः, अभ्र चन्द्रमसं पश्येति । स्वभावतस्तत्रस्थस्य पथश्चन्द्रमसश्च निमित्तत्वेनान्वाख्यानं क्रियते । एवमिहापि चार्थे यः स द्वन्द्वसमासः, अन्यपदार्थे यः स बहुव्रीहिरिति ।

किं पुनः कारणम् अर्था नादिश्यन्ते ?

तच्च लघ्वर्थम् । लघ्वर्थं ह्यर्था नादिश्यन्ते, अवश्यम् अनेनार्थान् आदिशता केनचिच्छब्देन निर्देशः कर्तव्यः स्यात् । तस्य च तावत् केन कृतो येनासौ क्रियते । अथ तस्य केनचित् कृतः, तस्य केन कृत इत्यनवस्था ।

अत्रान्तिमे वाक्ये केनचित् इत्यत्र केन इति पठितव्यम् इति प्रतिभाति ।

मा भैषीः ।

रोगी । वैद्यराज, निरन्तरं मनसि मे भीतिर्वर्तते सावशेषेष्वेव प्राणेषु शरीरं मेऽग्निसात् करिष्यत इति ।

भिषक् । अलम् आर्य भयेन । मदीयस्य कस्यापि रोगिणस्तादृशी शङ्का नास्त्येव ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जिज्ञासा मीमांसा च

(१)

कश्चन जिज्ञासुः पृच्छति—गृहे गृहे साम्प्रतं सलिलरक्षार्थम् अवस्कारादीनां धावनार्थं च tank दृश्यते। संस्कृतभाषायामस्य कः प्रतिशब्दः ? इति।

देवभाषायां tank-समानार्थकः शब्दः वारिधानीति। देशभाषासु आतरदान-दोयातदान-प्रभृतयो ये तावद् दान-भागान्ताः शब्दाः सन्दृश्यन्ते तेष्वपि दानशब्दः संस्कृतधानशब्दस्यैव पारसीकोऽपभ्रंश इति बोद्धव्यम्।

रसमञ्जरी

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

"परिहासविजल्पितं सखे परमार्थेन न गृह्यतां वचः।"

अध्यापकः। अरे रामदास, ह्योऽपराह्णे गृहं प्रत्यावर्तमानो मध्येमार्गम् उपाहारभवने त्वामपश्यम्।

रामदासः। आर्य, चा-रसो मे प्रियं पानीयम्। प्रतिदिनं चतुर्वादनकाले यदा विद्यालयस्यावकाशो भवति तदा "वसन्तनिकेतनं" गत्वा चा-रसः पीयते।

अध्यापकः। वत्स, विषवत् परित्याज्यं चा-पानीयम्। अपि न श्रुतं त्वया "हालाहलो नैव विषं विषं हि चा" इति।

रामदासः। आर्य, चा-रसस्यामृतमयत्वं प्रत्यक्षत एवानुभूयते। सर्वथा वञ्चितास्ते ये चापानीयस्य हालाहलकल्पत्वम् अभिजल्पन्ति। अत एव 'नामृतमुत्थितं सिन्धोश्चा खल्वत्रामृतं परम्' इति वक्तव्यम्।

अध्यापकः। वत्स, आमुखे यानि सुस्वादूनि तानि प्रायेण पर्यन्ते विरसतमानि भवन्ति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रामदासः। आर्य, भगवता पाणिनिना स्वस्याम् अष्टाध्याय्यां चापानं विहितम्।

अध्यापकः। वत्स, आ बाल्यात् परिशील्यते मया पाणिनीयं व्याकरणम्, चापानस्य समर्थनं तु कदापि न श्रुतम्।

रामदासः। स्मर्यतां तावत् "चादयोऽसत्त्वे" इति सूत्रम्।

अध्यापकः। बाढं स्मर्यते। किं तेन सूत्रेण ?

रामदासः। आर्य, चादयो नाम चाप्रभृतयः। आदिशब्देनात्र कोको-कफ्योः संग्रहः। सत्त्वं नाम बलम्। असत्त्वं बलाभावः। अत एव सूत्रस्यायमर्थः—शारीरे मानसे वा दौर्बल्ये अवसादे वा समुपजाते चाप्रभृतिकं निषेवणीयमिति।

अध्यापकः। "सर्वत्रौदरिकस्याभ्यवहार्यमेव विषयः" इति सुष्ठु खलूक्तं कालिदासेन।

रामदासः। आर्य, मा मैवम्। यद्यपि "वेदा विभिन्नाः स्मृतयो विभिन्ना नासौ मुनिर्यस्य मतं न भिन्नम्", तथापि चाविषये स्मृतिकाराणाम् ऐकमत्यं संलक्ष्यते। तथाहि गीतायामुक्तं भगवता—न चायुक्तस्य भावना इति। अस्यार्थः—यो हि नियमेन चारसमास्वादयति तस्य जीवनरणाङ्गणे किमपि चिन्ताकारणं नोपनमति इति।

अध्यापकः। अपरं किमपि वचनं वर्तते वा ?

रामदासः। बाढं वर्तते। गीतायां श्रीभगवतोक्तम्—

अनाश्रितः कर्मफलं कार्यं कर्म करोति यः।
स सन्न्यासी च योगी च न निरग्नि र्न चाक्रियः॥

इति। चाकरणार्थमग्निरपेक्ष्यते, योऽत्र निरग्निः अत एव यश्चाक्रियः (चा-अक्रियः) चापानीयं निष्पादयितुं न पारयति स कदापि योगी वा सन्न्यासी वा भवितुं नार्हति। किञ्च,

यं लब्ध्वा चा परं लाभं मन्यते नाधिकं ततः।
यस्मिन् स्थितो न दुःखेन गुरुणापि विचाल्यते॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तं विद्याद् दुःखसंयोगवियोगं योगसंज्ञितम् ।
स निश्चयेन योक्तव्यो योगो निर्विण्णचेतसा ।।

इति । अत्र चा इति लुप्तद्वितीयाकं पदम् । यं चां लब्ध्वा ततोऽधिकं परं लाभं न मन्यते, यस्मिन् चारसे स्थितः गुरुणापि दुःखेन न विचाल्यते, तं दुःखसंयोगवियोगं योगसंज्ञितं विद्यात्, स योगः चापानलक्षणः निर्विण्णचेतसा अवसादग्रस्तमनसा निश्चयन अवश्यमेव योक्तव्यः निषेवणीय इत्यर्थः ।

अध्यापकः । वत्स रामदास, परमार्थत एव परमपुरुषस्य रामचन्द्रस्यानुग्रहभाजनमसि । अघटनसङ्घटनपटीयसी ते मनीषा। वत्स, चिरं जीव ।

पुस्तकपरिचयः

महाभाष्यम् (पस्पशाह्निकम)। श्रीक्षितीशचन्द्र-चट्टोपाध्यायेन संस्कृतम् । 81 Shyambazar Street, Calcutta 4 इत्यतः प्रकाशितम् । मूल्यं द्वादशाणकोत्तरं रूप्यकत्रितयम् ।

कस्य वा न विदितं भारतवर्षीयस्य पतञ्जलिविरचितं महाभाष्यं नाम ? सत्स्वपि परःसहस्रेषु भाष्येष्विदमेव महाभाष्यमित्यन्वर्थं नाम बिभर्ति । न केवलमत्र नीरसानां वैयाकरणविषयाणां विचारो वर्तते, प्रसङ्गक्रमेण बहूनि विषयान्तराण्यप्यवतारितानि । भाषा चास्य महाभाष्यस्यातीव मनोहरा प्राणवती च । अत्रत्यं च प्रथममाह्निकं पस्पशेति व्यपदिश्यते, एतेन समग्रं व्याकरणं सम्यक् सन्दृश्यत इति । इदं च पस्पशाह्निकं प्रायेणाधीयते छात्रैश्चाध्यापकैश्च । अत एव तेषां कृते आङ्लभाषामयीं भूमिकाम् , आङ्लानुवादम् , आङ्लभाषया विस्तीर्णं व्याख्यानम्, मुद्रितानाम् अमुद्रितानां च प्राचीनव्याख्यानानाम् अंशविशेषान् परिशिष्टानि च संयोज्य मञ्जूषायां पूर्वं मुद्रितमिदानीं पुस्तकरूपेण प्रकाशितम् । त्वरन्तां वाचक-महोदया अस्य संग्रहणायेति शिवम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

TECHNICAL TERMS AND TECHNIQUE OF

Sanskrit Grammar

A Critical, Comparative and Historical Study

BY

Kshitish Chandra Chatterji, Sastri, M.A., D. Litt

Lecturer, Calcutta University;
Formerly Editor, Calcutta Oriental Journal,
Surabharati Oriental Literary Digest, etc., etc.

The Modern Review (December, 1950) **says:**

"Honour to whom honour is due. Dr. Chatterji has broken entirely new ground in his **Technical Terms and Technique of Sanskrit Grammar** and demonstrated clearly that Bengal, though fallen on evil days, can even now produce works on Indology that invite and bear comparison with the best work produced in any part of the world. Who ever thought that all the technical terms admitted of satisfactory explanation and who ever imagined that a work on grammatical terminology could be made as delightful as a novel? In this volume of nearly 350 pages the technical terms of Sanskrit grammar from the Brahmanas, Nirukta, Pratishakhyas, Panini, Katyayana, Patanjali, down to Prayogaratnamala and Harinamamrita have been considered critically and historically in all their bearings and apparently arbitrary technical terms like *gha*, *bha*, *lat*, *lit*, etc., have been traced to their sources. **We have nothing but admiration for this masterpiece of scholarship and warmly recommend it to our readers."**

Price Rupees Twelve only. *Foreign Rs. 14/-*

Postage Extra

VISVANATH CHATTERJI

81, Shyambazar Street,

CALCUTTA—4

Phone: B. B. 4049

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

MANJUSHA (Sanskrit Monthly Magazine)
Registered No. C. 3278

MAHABHASHYA

(First Ahnika)

EDITED WITH

English translation, exhaustive critical and explanatory notes, extracts from other commentaries, full Sanskrit explanation of the Vedic mantras etc. etc.

Rupees Three and annas Twelve only.

CANDRA VYAKARANA

Part I (Chapters 1—3).

Critically edited with Vṛtti, corresponding rules of Pāṇini, Bhoja and others, Introduction etc.

BY

KSHITISH CHANDRA CHATTERJI, SASTRI, M. A., D. LITT.

Lecturer, Calcutta University ;
Formerly Editor, Calcutta Oriental Journal, Surabharati, Oriental Literary Digest, etc., etc.

Price Rupees Twelve only. *Foreign Rs. 15/-*

A No Bhadriyam

Hymn 1. 89 of the Rigveda with the critically edited commentaries of (1) Veṅkaṭamādhava (2) Skandasvāmin (3) Mahīdhara (4) Sāyaṇa (5) Kās'yapa Kṣitīsacandra unfolding the significance of each word and expression, and extracts from the commentaries of Uvaṭa, Haradatta and others, English translations, critical and explanatory notes, comparisons from other languages etc. etc. Price : Rs. 2/8/-

VISVANATH CHATTERJI

81, Shyambazar Street, Calcutta—4

Printed and published by Sri Jyotish Chandra Chatterjee, B.A. from 81, Shyambazar Street, Calcutta—4. Printed at the Elm Press 63, Beadon Street, Calcutta—6.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Approved by the Directors of Public Instruction, Madras, Bihar and Mysore.

श्रीशिवः शरणम्

अष्टम-वर्षे] November, 1953 [तृतीया संख्या

मञ्जूषा

सम्पादकः—श्रीक्षितीशचन्द्र-चट्टोपाध्यायः

Next Month.

As'oka Inscription. Rasamañjarī. Partitive Genitive. Rabindranath's Short Story.

Just Out ! **Just Out !!**

Patanjali's MAHABHASHYA (Paspasha) with English translation, exhaustive critical and explanatory notes, commentaries. Rs. 3/12/-

A boon to students of languages is **Greek Proverbs** in Roman character with their Latin and English analogues and parallel proverbs and sayings from Sanskrit, Marathi and Bengali. All the grammatical forms have been clearly explained and the student of Sanskrit will not only acquire some knowledge of the glorious Greek language but will be struck with the resemblance it bears to Sanskrit. *Price : Rupees Two only.*

Office : 81, Shyambazar Street, Calcutta—4

Annual Subscription : Rupees Three only.

This number—Annas Eight.

Foreign—Rupees Four.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मञ्जूषाया नियमावली

मञ्जूषाया वार्षिकं मूल्यं रूपकत्रितयम्। आश्विन (September) नमासतो वर्षारम्भः। ग्राहकैर्वर्षस्य प्रथमसंख्यात एव ग्रहीतव्यम्।

२। प्रतिसौरमासं दशमदिने (आङ्‌ग्लमासस्य चतुर्विंशे दिवसे) 81, Shyambazar Street, Calcutta 4 इत्यतो मञ्जूषा प्रकाश्यते।

काव्यालङ्कारसूत्रवृत्तिः (वामनविरचिता ५।१)

अभिनवविग्रद्विरचितटीकोपेता — Rs. 2/-

Convocation Address in Ancient India — -12-

Popular Etymology— Re. 1/-

শব্দকথা— ২৲

ইহাতে সরল ও সরসভাবে বাঙ্গালা ভাষায় চলতি ভুলগুলির আলোচনা করা হইয়াছে, **সংস্কৃত ব্যাকরণের দিক্ দিয়া, বাঙ্গালা ভাষার দিক্ দিয়া, ভাষাতত্ত্বের দিক দিয়া,** বঙ্গদর্শন প্রভৃতি হইতে ভূরি ভূরি উদাহরণ উদ্ধৃত করিয়া শব্দ ও শব্দসমষ্টির শুদ্ধি ও অশুদ্ধি বিবেচিত হইয়াছে। ওতপ্রোতশব্দে বিসর্গ আছে কি না, যদি থাকে প্রথম 'ত'র পরে আছে, না দ্বিতীয় 'ত'র পর আছে, না উভয় 'ত'র পরে আছে, 'সঠিক' শব্দ ঠিক কি না, 'ব্যবহারিক' ব্যবহারযোগ্য কি না, আবশ্যক ও আবশ্যকতায় প্রভেদ কি, প্রভৃতি আলোচিত হইয়াছে। "সোনার পাথরবাটি" প্রবন্ধে সংস্কৃত, বাঙ্গালা, ইংরাজী প্রভৃতি নানা ভাষার সোনার পাথর বাটী জাতীয় শব্দগুলি সন্নিবিষ্ট হইয়াছে। ক্রিয়াবিশেষণ প্রবন্ধে বাঙ্গালা, ইংরাজী ও ফরাসী ক্রিয়ার বিশেষণগুলির মূল অর্থ বিবেচিত হইয়াছে। "সন্ধির কথায়" সন্ধির বৈজ্ঞানিক ব্যাখ্যা ও বাঙ্গালা ইংরাজী লাটিন প্রভৃতি ভাষার সন্ধি প্রদর্শিত হইয়াছে; সন্ধি, ষত্ব ও ণত্ব সম্বন্ধীয় নিয়মগুলি সরলভাবে বোঝান হইয়াছে ও বাঙ্গালা উপন্যাসাদি হইতে শত শত দৃষ্টান্ত সন্নিবিষ্ট হইয়াছে।

ঊষার আলো—ছোট ছোট হাসির গল্পের সমষ্টি— ৸৹

নক্ষত্রমালা—ধর্মবিষয়ক শ্লোক, সরল ব্যাখ্যা ও অনুবাদ ।৹

Several complete sets of Vols. IV, V, VI and VII (450 pp. each) of the Manjusha are still available for Rs. 6/8/- per volume and only a few sets of Vols. I-III are available at Rs. 5/12/- for the lot.

শ্রীবিশ্বনাথ-চট্টোপাধ্যায়ঃ।

৮১ শ্যামবাজার ষ্ট্রীট্, কলিকাতা ৪

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शरणं तरुणेन्दुशेखरः शरणं मे गिरिराजकन्यका ।
शरणं पुनरेव तावुभौ शरणं नान्यदुपैमि दैवतम् ॥

अष्टम-वर्षे मञ्जूषा तृतीया संख्या

श्रीमच्छङ्कराचार्यविरचितम्

चिदानन्दसिन्धुस्तोत्रम्

तदा नैव बालो न वा भोगलोभ-
स्तथा नैव वृद्धः समासन्नकालः ।
न वा साधुशीलोऽथवाऽसाधुशील-
श्चिदानन्दसिन्धौ यदाहं निमग्नः ॥१॥

तदा नैव जीवः शिवो नाऽपि कर्ता
तथा नैव भोक्ता न भर्त्ताऽनुमन्ता ।
तथा नो विरिञ्चिर्न विष्णुर्न रुद्र-
श्चिदानन्दसिन्धौ यदाहं निमग्नः ॥२॥

तदा नाऽपि बद्धो न मुक्तो न रागी
विरागी न सङ्गी तथा नो वियोगी ।
न भोगी न संसाररोगी चिदात्मा
चिदानन्दसिन्धौ यदाहं निमग्नः ॥३॥

तदा नाऽपि जाग्रत्सुषुप्तिर्न चास्ते
न वा स्वप्नलेशस्तुरीयाऽपि काचित् ।
न वा चोन्मनी नो गतायातनाम्नी
चिदानन्दसिन्धौ यदाहं निमग्नः ॥४॥

तदा नैव सूक्ष्मं महास्थूलमेकं
न वा जङ्गमाजङ्गमं चाऽपि किञ्चित् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न कर्माणि धर्मोऽप्यधर्मो न कश्चि-
च्चिदानन्दसिन्धौ यदाहं निमग्नः ॥५॥

तदा कामिनी नैव कामी न कामो
न वा क्लीबमल्पो न वर्णाश्रमादिः ।
न वा शिष्यवर्गो गुरुर्वा न चास्ते
चिदानन्दसिन्धौ यदाहं निमग्नः ॥६॥

तदा नासनं प्राणरोधो निरोधो
न वा कारकाणां तथा धारणानाम् ।
तथा ध्यानमेकं समाधिर्न कश्चि-
च्चिदानन्दसिन्धौ यदाहं निमग्नः ॥७॥

तदा नाऽप्यभेदो न भेदो न बोधो
न चाऽबोधजोऽसौ विनोदो न खेदः ।
अहो नो मुकुन्दो न चानन्दकन्द-
श्चिदानन्दसिन्धौ यदाहं निमग्नः ॥८॥

तदा न स्मृतिर्विस्मृति र्नो बहिर्नो
तथा नान्तरं साधको नाऽपि सिद्धः ।
असिद्धो न शुद्धो न चाऽशुद्ध एष
चिदानन्दसिन्धौ यदाहं निमग्नः ॥९॥

तदा नैव तूष्णीमतूष्णीं न किञ्चिन्
न वाऽकिञ्चिदेवेति कोटिद्वयं नः ।
यथावत्स्थितोऽहं तथैवाऽस्मि कश्चि-
च्चिदानन्दसिन्धौ यदाहं निमग्नः ॥१०॥

चिदानन्दं सिन्धुमेकं परं ब्रह्म महत्तरम् ।
पद्यैर्दशमितैर्ध्येयं सहजानन्दसिद्धये ॥११॥

इति श्रीमच्छङ्कराचार्यविरचितं चिदानन्दसिन्धुस्तोत्रं संपूर्णम् ॥

एतदनन्तरं पद्यद्वयम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अहं हि सर्वं न च किञ्चिदन्यन्निरूपणायामनिरूपणायाम् ।
इयं हि वेदस्य परा हि निष्ठा ययानुभूतिश्च न संशयश्च ॥१॥
दुःखं जन्म जरा दुःखं दुःखं मृत्युः पुनः पुनः ।
संसारमण्डलं दुःखं पच्यन्ते यत्र जन्तवः ॥२॥ इति

[चिदानन्दसिन्धुस्तोत्रं शङ्करनिर्मितम् ।
नामनिर्देशनाभावाच्छैल्या प्रायेण कल्प्यते ॥
जीवब्रह्मैकत्वस्तोत्रसांनिध्यो दृश्यते यतः ।
न क्वाऽप्यन्यत्र तद् दृष्टमपूर्वत्वं विलोक्यते ॥

* * * *

परेद्यवि हि संवृष्टस्तं भौमवारे भयानकः ।
झञ्झावातः संप्रवृत्तो विद्युत्स्तनितसंयुतः ॥
याममात्रं, महापूरो वासरत्रितयं च यः ।
"प्र वेपयन्ति पर्वतान् वि विञ्चन्ति वनस्पतीन् ।
प्रो आरत मरुतो दुर्मदाय इव देवासः सर्वथा विशा ॥"
ऋग्वेदाद्ये मण्डले यन्मरुतां वर्णनं स्थितम् ।
प्रत्यक्षं ह्यनुभूतं तत् कोशपञ्चकमात्रकम् ॥
उन्मूलिता महावातादसंख्याता महीरुहः ।
नदीतटस्था मनुजा आपदावर्तभाजिनः ॥
अहो ईशस्य सामर्थ्यं प्रसादो निग्रहस्तथा ।
को अद्धा वेद मनुजो यत्र श्रुतिरवाग्भवेत् ॥

रघुनाथशर्मा]

आभाणकादि

अञ्जनस्य क्षयं दृष्ट्वा वल्मीकस्य च सञ्चयम् ।
अवन्ध्यं दिवसं कुर्याद्दानाध्ययनकर्मभिः ॥

Latin. Nulla dies sine linea.
No day without a line.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

["It was Apelles' constant habit never to allow a day to be so fully occupied that he had not time for the exercise of his art, if only to the extent of one stroke of the brush."]

Latin. Nullam hodie lineam duxi.

Greek. Tēmeron oudemian grammēn ēgagon.

I have drawn no line today.

यवन-(Greek)-चित्रकराणां धुरि कीर्तनीय आपेल्लसोऽनुदिवसं स्वनैपुण्यस्योत्कर्षसाधनाय प्रायतिष्ट। कार्यान्तरव्यापृतेनापि तेन प्रतिदिनमवरतश्चित्रेष्वेका रेखा योज्यते स्म। न खलु रेखामेकामन्तरेण दिनमेकमपि तेन व्ययितम्। महावीरस्यालीकसुन्दरस्यापि चित्रकरेऽस्मिन् बहुमान आसीत्, अनेनैव च तस्य चित्रमङ्कितम्—वज्रधरोऽलीकसुन्दर इति।

स्वर्णमृगः

[कवीन्द्ररवीन्द्रनाथठाकुरस्य]

आद्यानाथ-वैद्यनाथचक्रवर्तिनौ द्वौ दायादौ। तयोश्च वैद्यनाथस्यैवार्थिकी परिस्थितिः कथञ्चित् निकृष्टा। वैद्यनाथस्य पितुर्महेशचन्द्रस्य लेशतोऽपि वित्तविषया बुद्धिर्नासीत्, ज्येष्ठस्य शिवनाथस्योपरि सर्वथा तस्य निर्भरोऽवर्तत। शिवनाथोऽपि भ्रात्रे पुष्कलानि स्निग्धवचनानि प्रदाय विनिमयेन तस्य समग्रां सम्पदमात्मसादकरोत्। केवलं कतिचन राजकीयार्थपत्राण्यवावाशिष्यन्त। जीवनसागरे तानि पत्राण्येव तस्यैकमालम्बनम्।

शिवनाथः खलु बहुशोऽन्विष्य पुत्रस्याद्यानाथस्य धनिकतनयया विवाहं विनिर्वर्त्य वित्तवर्धनस्य सौकर्यान्तरं संसाधितवान्। महेशचन्द्रः पुनः सप्तकन्याभारग्रस्तं दरिद्रं द्विजं दयमानः वराटिकामात्रमपि शुल्कमगृहीत्वा तस्य ज्येष्ठया दुहित्रा स्वतनयस्य परिणीयत्सवं सम्पादितवान्। यत् स सप्तैव दुहितॄः गृहं नानीतवान् तत्र तस्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुत्रस्यैकत्वं ब्राह्मणस्य च तद्गतनिर्बन्धाभाव एव निदानम्। तथापि तासां विवाहेषु शक्तितोऽप्यतिरिक्तमर्थसाहाय्यमकरोत्।

पितुर्मरणादनन्तरं वैद्यनाथस्तस्य राजकीयार्थपत्रकतिपयेनैव सर्वथा निश्चिन्तः सन्तुष्टचित्तश्चासीत्। कर्मादिकस्य वार्त्तापि तस्य मनसि कदापि नोदयमविन्दत। कर्म तस्यैकमेवासीत्, स खलु वृक्षस्य शाखा भङ्क्त्वा सुखासीनो महता यत्नेन यष्टीनिर्मिमीते स्म। राष्ट्रस्य बालका युवानश्च यष्ट्यर्थं तं शरणं जग्मुः, सोऽपि तास्तेभ्यः प्रददौ। किञ्च वदान्यतायाः सन्धुक्षणेन बडिशं वियच्चारिपत्रक्रीडनकं काष्ठमय सूत्रधानं च निर्मिमाणो भूयांसं कालं व्ययितवान्। यत्र महता यत्नेन सुचिरं तक्षणनिर्लेखनादिकम् अपेक्ष्यते अथच यद्धि तावन्तं परिश्रमं कालव्ययं नार्हति तथाविधं किञ्चिद्धस्तसाध्यं कार्यं चेदलभ्यत तर्हि स उत्साहस्य परां काष्ठामधिरोहति स्म।

प्रायेणैवादृश्यत यद् यदा तावत् पल्ल्यां विभिन्नपक्षाणां सङ्घर्षेण कुमन्त्रणेन च सुबृहन्तः पवित्रा वङ्गीयाश्चण्डीमण्डपा धूमाच्छन्नाः सञ्जायन्ते स्म, तदा वैद्यनाथः कलमकर्तनिकामेकां वृक्षशाखिकां चैकां गृहीत्वा प्रातरारभ्य मध्याह्नं यावत्, आहारान्निद्रायाश्चोर्ध्वं सायाह्नं यावत् स्वाङ्गनमण्डपे एकाक्येवातिवाहयति।

षष्ठीदेव्याः प्रसादेन शत्रूणां मुखेषु भस्म प्रदाय क्रमेण वद्यनाथस्य द्वौ पुत्रौ दुहिता चैकाजायन्त। भवनान्तरगृहिण्या विन्ध्यवासिन्या यथा भूषणालङ्कारादीनि काशिका शाटिका, वार्तालापयोर्भङ्गिः, आचार-व्यवहारयोगौ एवं न खलु तथाविधं मोक्षदायाः सम्भवति—को वेतोऽसमीचीनतरो व्यतिकरः स्यात्! परिवारस्त्वेक एव। भ्रातुर्वित्तस्य वञ्चनामूलकलाभेनैव तेषामीदृशी समुन्नतिः। यथा यथा मोक्षदा-कर्णयति वार्तामुन्नतेः तथा तथा न माति स्म तस्या मानसे श्वशुरं प्रति श्वशुरस्य चैककं तनयं प्रत्यश्रद्धा चावज्ञा च। स्वगृहस्थं किमपि तस्यै न रोचते। सर्वमेवासौकर्यकरं सम्मानहानिसम्पादकं च। शयनपर्यङ्कं शवोद्वहनस्याप्ययोग्यम्, यस्य खलु सप्तकुलेषु कोऽपि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नास्ति तथाविधश्चर्मचटिकाशावकोऽप्यस्मिञ् जीर्णप्राचीरे वस्तुं न समीहते, गृहोपकरणसन्दर्शनेन ब्रह्मचारिणः परमहंसस्यापि प्रवर्ततेऽश्रुधारा नयनयोः। न खलु पुरुषेणेव कापुरुषजातीयेन केनाप्यासामत्युक्तीनां प्रतिवदनं सम्भवति। अत एव वै नाथो बहिर्द्वारवेदिकायामुपविष्टः द्विगुणेन मनोयोगेन यष्टितक्षणे प्रवृत्तोऽभवत्।

परं न खलु मौनव्रतमेव विपदस्तारकम्। अन्तरान्तरा पत्युः शिल्पकर्म प्रतिघ्नती गृहिणी तमन्तःपुरम् आजुहाव। गाम्भीर्यातिरेकेण चान्यत्र दृष्टिं पातयित्वावदत्, मा तावद् गोपालकोऽस्मद्गृहे दुग्धं दात्। इति।

वैद्यनाथः कञ्चित् कालं तूष्णीमवस्थाय सप्रश्रयमवदत्, पयसो निरोधः समीचीनः स्याद्वा ? किं तावद् बालकाः पिबेयुः ? इति।

गृहिणी प्रत्यवदत्, काञ्जिकम् इति।

कदापि वा विपरीत एव भावः प्रत्यक्षीक्रियते स्म। गृहिणी वैद्यनाथमाहूयावदत्, नाहं किमपि जानामि। यत् कर्तव्यं त्वमेव तत् कुरु इति।

वैद्यनाथो म्लानमुखेनापृच्छत्, किं वा मया कर्तव्यमिति।

पत्न्यवदत्, मासस्यास्य कृते सर्वं द्रव्यादिकं क्रीणीहि इति। इत्युक्त्वा तथाविधां द्रव्यतालिकां प्रायच्छत् यया किल राजसूययागोऽपि महता डम्बरेणानुष्ठातुं सुशकः स्यात्। (क्रमशः)

महाभाष्यपाठविमर्शः

[श्रीरामशंकरभट्टाचार्यः]

अचः कर्तृयकि [६।१।१९५] इति सूत्रस्य भाष्ये पठ्यते—"यकि रपर उपसंख्यानं कर्तव्यम्, स्तीर्यते स्वयमेव" इति। कीलहर्णमहोदयेन नात्र किमपि पाठान्तरादिकं विलिखितम्।*

* वस्तुतस्तु "स्तीर्यते स्वयमेव" इत्यस्यानन्तरं "जीर्यते स्वयमेव" इति पुस्तकद्वये पाठ इति कीलहर्ण-महोदयेन विलिखितम्। मञ्जूषा-सम्पादकः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पाठोऽयमपूर्ण इति प्रतीयते। न्याय्यः पाठस्त्वयमेव स्यात्—"यकि... कर्तव्यम्, स्तीर्यते स्वयमेव स्तीर्यते स्वयमेव"; अर्थात् उदाहरणं द्विः पठनीयम्। अत्र हेतवः—

(१) अनेन सूत्रेण विकल्पेनोदात्तत्वं विधीयते, अत उदाहरणद्वित्वं संभाव्यते।

(२) अत्रास्ति वार्त्तिकम्—'उपदेशवचने जनादीनाम्' इति तत्रोदाहरणद्वयमुपन्यस्तम् "जायते स्वयमेव, जायते स्वयमेवेति" (द्वितीयोदाहरणे यक्स्वरेण मध्योदात्तत्वम्)। यद्यस्मिन् वार्त्तिके उदाहरणद्वयं स्वरभेददर्शनार्थं भाष्यकृतोपान्यासि, तर्हि आदिमवार्त्तिकोदाहरणेऽपि द्विरुदाहरणं दर्शितमिति व्यक्तमेव इति भाष्यकारशैलीदर्शनेन प्रतीयते।

(३) अत्रत्योपदेशवचनविषये भाष्यकृतोपसंहारः कृतः—"उपदेशे चाजन्तानां कर्तृयकि वाऽदिरुदात्तो भवति। स्तीर्यत स्वयमेव, स्तीर्यते स्वयमेव" इति सोदाहरणेन वाक्येन। एतेन प्रतीयते यदाद्योदाहरणेऽपि 'स्तीर्यते स्वयमेव' इत्यंशो द्विः पठितः, उपक्रमोपसंहारयोः समानार्थकत्वात्, समानशब्दप्रयोगस्य भाष्यकारशैलीसिद्धत्वाच्च।

(४) गुरुप्रसादशास्त्रिमुद्रितभाष्यपुस्तकेऽस्माभिः आदिमोदाहरणस्थले सन्दृष्टम् 'स्तीर्यते स्वयमेव, जीर्यते स्वयमेव' इति (कादाचित्कः पाठः)। द्वितीयोदाहरणे काललुप्ते सति तस्यात्यन्तावश्यकत्वात् केनचिद् भिन्नोदाहरणप्रदर्शनार्थं 'जीर्यते स्वयमेव' इति पूरितम्*। तत्तु अयुक्तम्, स्वर-विकल्पोदाहरणस्थले एकस्मिन्नेव शब्दे स्वरभेदप्रदर्शनस्यैव न्याय्यत्वात्। भिन्नशब्देन यद्युदाहरणं दीयेत, तर्हि स्वरभेदप्रतीतिस्तत्र न सुकरा स्यात् इति।

---

* अत्र "जीर्यते" पदं स्तीर्यतेपदस्यैवापभ्रंश इति प्रतीयते। मञ्जूषा-सम्पादकः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्व मे कञ्चुकम्

दृष्टं वा केनापि मदीयं कञ्चुकम्? न हि कञ्चुकमन्तरेण बहिर्गन्तुं प्रभवामि।

अरे, कञ्चुकं तव गात्र एव वर्तते।

सम्यक्। वर्तत एव। दिष्ट्या दृष्टं त्वया, अन्यथा कञ्चुकमन्तरेणैव मया बहिरगंस्यत।

यो हि कण्ठगतं हारं विस्मृत्य व्याकुलीभवन्।
इतस्ततोऽनुसन्धत्ते तदवस्थं गतोऽसि भोः॥

सम्यक्

कस्तावद् दूरतरः—चन्द्रो वा चीनो वा?

चीन एव।

कथं वैवं मन्यसे?

यस्यां कस्यामपि प्रसन्नायां निशायां प्रभवामो वयं द्रष्टुं चन्द्रमसम्। चीनं तु पुनः कथमपि द्रष्टुं न प्रभवामः।

अस्वस्थः कथं वा भिषजं पश्येत्?

भृत्यः। आर्य, समागतो भिषक्।

शून्यमनस्कोऽध्यापकः। भृशम् अस्वस्थशरीरोऽहम्, नालमस्मि तं द्रष्टुम्।

लक्षणसंग्रहः

[श्रीफटिकलाल-दासः]

आकृतिः—इङ्गितं हृद्गतो भावो बहिराकार आकृतिः।

आदिशाब्दिकाः—इन्द्रश्चन्द्रः काशकृत्स्नापिशली शाकटायनः।
पाणिन्यमरजैनेन्द्रा जयन्त्यष्टादिशाब्दिकाः॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आततायिनः—(१) अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः ।
क्षेत्रदारापहारी च षडेते ह्याततायिनः ॥
—वशिष्ठः ।

(२) उद्यतासिविषाग्निं च शापोद्यतकरं तथा ।
आथर्वणेन हन्तारं पिशुनञ्चैव राजसु ॥
भार्यातिक्रमिणञ्चैव विद्यात् सप्ताततायिनः ।
यशोवित्तहरानन्यानाहुर्धर्मार्थहारकान् ॥
—विष्णुसंहिता ।

आनद्धम्— तालभेदो द्रष्टव्यः ।

आयुर्वेदः— अनेन पुरुषो यस्मादायुर्विन्दति वेत्ति वा ।
तस्मान्मुनिवरैरेष आयुर्वेद इति स्मृतः ॥
—भावमिश्रः ।

आर्यः— (१) कुलं शीलं दया दानं धर्मः सत्यं कृतज्ञता ।
अद्रोह इति येष्वेतत् तानार्यान् संप्रचक्षते ॥

(२) कर्तव्यमाचरन् काममकर्तव्यमनाचरन् ।
तिष्ठति प्रकृताचारे स वा आर्य इति स्मृतः ॥

आशीः— वात्सल्याद् यत्र मान्येन कनिष्ठस्याभिधीयते ।
इष्टावधारकं वाक्यमाशीः सा परिकीर्तिता ॥

आश्रमाः— ब्रह्मचारी गृहस्थश्च वानप्रस्थो यतिस्तथा ।
एते गृहस्थप्रभवाश्चत्वारः पृथगाश्रमाः ॥
—मनुसंहिता ।

अशोकस्य शिलालेखः

(२)

सर्वत्र विजिते देवानां प्रियस्य प्रियदर्शिनो राज्ञः, एवमपि प्रत्यन्तेषु यथा चोलाः[1] पाण्ड्याः[2], सत्यपुत्रः[3], केरलपुत्रः[4], आताम्रपर्णि[5]

[1] Tanjore-Trichinopoly region. [2] Ramnad-Madura-Tinnevelly region. [3] Norh Malabar. [4] South Malabar [5] Up to

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अन्तियोको[6] यवनराजः[7], ये वा अपि तस्यान्तियोकस्य समीपा राजानः सर्वत्र देवानां प्रियस्य प्रियदर्शिनो राज्ञोः [मते] द्वे चिकित्से कृते—मनुष्य-चिकित्सा च पशुचिकित्सा च। औषधानि च यानि मनुष्योपगानि[8] च पशूपगानि च यत्र न सन्ति सर्वत्र हारितानि च रोपितानि च। मूलानि च फलानि च यत्र यत्र न सन्ति, सर्वत्र हारितानि च रोपितानि च। पथिषु कूपाश्च खानिताः, वृक्षाश्च रोपिताः, परिभोगाय पशुमनुष्याणाम्।

[सर्वत विजितम्हि देवानंपियस पियदसिनो राञो एवमपि पंचंतेसु यथा चौडा पाडा सतियपुतो केतलपुतो आ तंबपंणी अंतियोको योनराजा ये वा पि तस अंतियोकस सामीपा राजानो सर्वत देवानं पियस पियदसिनो राञो द्वे चिकीछा कता मनुसचिकीछा च पसुचिकीछा च। ओसुढानि च यानि मनुसोपगानि च पसोपगानि च यत यत नास्ति सर्वत हारापितानि च रोपापितानि च। पंथेसू कूपा च खानापिता, वंछा च रोपापिता परिभोगाय पसुमनुसानं।] (क्रमशः)

नामरहस्यम्

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

(४)

महाभारते सुदेष्णेति संज्ञोपलभ्यते। विराटस्य महिष्या नाम सुदेष्णेति। बलिराजस्यापि महिषी सुदेष्णानाम्न्यासीत्। हरिवंशे कृष्णस्य तनयः सुदेष्णनाम्ना विराजति, असमञ्जसोऽपि दत्तकः पुत्रस्तथव व्यपदिश्यते। इदानीं नामधेयस्यास्यार्थो विव्रियते।

देष्णशब्दो दानार्थको देयार्थकश्च वेदेषूपलभ्यते। अत एव सु शोभनं देष्णम् यस्याः सा सुदेष्णेति विगृह्य यस्या दानानि शोभनानि

Ceylon. [6]Antiokhos II of Syria (261-245 B. C.) [7]Greek King.
[8]मनुष्येभ्यः हितानि।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

या हि वदान्या, या हि सुदानुः सैव सुदेष्णेत्यर्थः सिध्यति। ऋग्वेदस्याष्टममण्डले श्रूयते—

विद्मा हि त्वा तुविकूर्मिं तुविदेष्णं तुवीमघम्।
तुविमात्रमवोभिः ॥

इति। व्याख्यातञ्चैतद् भाष्यकृता—हे इन्द्र त्वा त्वां विद्म हि जानीमः खलुः। कीदृशमिति ? तुविकूर्मिं बहुकर्माणं **तुविदेष्णं बहुप्रदेयं** तुविमघं बहुधनं तुविमात्रं बहुप्रमाणम् अवोभिः युक्तम् इति।

अक्षसूक्तेऽपि कुमारदेष्णा जयतः पुनर्हण इति श्रूयते, प्रथममण्डलेपि [१।१६६।७] स्कम्भदेष्णा इति पदमुपलभ्यते।

महाभारते चारुदेष्ण इति कृष्णपुत्रस्य नाम, हरिवंशे च गण्डूषपुत्रस्य नाम।

दशपाद्युणादिसूत्रेषु गादाभ्याञ्चेष्णच् [५।४८] इति सूत्रमुपलभ्यते।

रसमञ्जरी

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

"परिहासविजल्पितं सखे परमार्थेन न गृह्यतां वचः"

अध्यापकः। वत्स, महाभाष्यं पठ्यताम्।

छात्रः। (पठति) वक्ता कश्चिदाश्वभिधायी भवति—आशु वर्णानभिधत्ते, कश्चिच्चिरेण, कश्चिच्चिरतरेण। तद् यथा—तमेवाध्वानं कश्चिदाशु गच्छति, कश्चिच्चिरेण गच्छति, कश्चिच्चिरतरेण गच्छति। रथिक आशु गच्छति, आश्विकश्चिरेण, पदातिश्चिरतरेण। इति।

अध्यापकः। बुद्धं न वा ?

छात्रः। पदातिश्चिरतरेण गच्छतीति बुद्धम्। रथिक आशु गच्छति, आश्विकश्चिरेण इति न बुद्धम्। यदा पुरुषो रथेन सञ्चरते

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तदाश्वेन रथोऽप्यूह्यते रथिकोऽपि, एवञ्च तस्य समधिको भारो भवति। यदा पुनरश्वेन सञ्चरते, तदाश्वेन पुरुष एवोह्यते न पुनरन्यदपि किञ्चित्। अत एव आश्विक आशु गच्छति रथिकश्चिरेण पदातिश्चिरतरेण इति वक्तुं युक्तम्।

अध्यापकः। अरे मूढ, रथिको नाम यो धूमशकटेन (motor-car इत्यनेन) सञ्चरते यश्च बाष्पशकटेन (train इत्यनेन) सञ्चरते। एतस्मादेव पतञ्जलिवचनतो विष्पष्टमेव प्रतीयते यत् प्राचीनेऽप्यस्माकं भारते वर्षे धूमशकट-बाष्पशकटादयो बाहुल्येनावर्तन्तेति।

मेधाविरुद्रः। कदाचिदेवमपि स्यात् अश्वद्वितयम् अश्वचतुष्टयम् अश्वाष्टकं ततोऽप्यधिका वा अश्वा रथं वहेयुः, आश्विकं तु नियमेनैक एवाश्वा वहेत्। अत एव रथिक आशु गच्छति, आश्विकः पुनश्चिरेण।

अध्यापकः। अरे रे मेधाविरुद्र, पाषण्डस्त्वम्, तस्करस्त्वम्, देशद्रोही त्वम्। प्राचीनस्य भारतवर्षस्य गौरवं न विषहसे। सर्वत्रैव स्वदेशस्यानुकूल एव तर्कः प्रवर्तनीयो न पुनः प्रतिकूलः।

सन्देहकः। आर्य, रथिकशब्दे दीर्घत्वं न दृश्यते, किमित्याश्विकशब्दे दीर्घत्वमागतम्? अपि नाम अश्विकैरिति पठनीयम्?

अध्यापकः। आशुशब्दात् अश्वः सञ्जातः। निरुक्ते दृश्यते— "अश्वः कस्मात्? अश्नुतेऽध्वानम्, महाशनो भवतीति वा।" इति। एतच्चोपलक्षणम्। आशु गच्छतीति वा इत्यपि वक्तव्यम्। आशुशब्दनिष्पन्ने आश्विकशब्दे आशुशब्दस्याकारः सन्दृश्येत इत्यत्र किमिवाश्चर्यम्? कारणगुणा हि कार्यगुणानारभन्ते इति न्यायविद आचक्षते। नीचर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण इति न्यायेन अश्वशब्दे विलयमधिगतः स आकार आश्विकशब्दे पुनरप्यभ्युद्यतः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

TECHNICAL TERMS AND TECHNIQUE OF

Sanskrit Grammar

A Critical, Comparative and Historical Study

BY

Kshitish Chandra Chatterji, Sastri, M.A., D. Litt

Lecturer, Calcutta University ;
Formerly Editor, Calcutta Oriental Journal,
Surabharati. Oriental Literary Digest, etc., etc.

The Modern Review (December, 1950) **says :**

"Honour to whom honour is due. Dr. Chatterji has broken entirely new ground in his **Technical Terms and Technique of Sanskrit Grammar** and demonstrated clearly that Bengal, though fallen on evil days, can even now produce works on Indology that invite and bear comparison with the best work produced in any part of the world. Who ever thought that all the technical terms admitted of satisfactory explanation and who ever imagined that a work on grammatical terminology could be made as delightful as a novel ? In this volume of nearly 350 pages the technical terms of Sanskrit grammar from the Brahmanas, Nirukta, Pratishakhyas, Panini, Katyayana, Patanjali, down to Prayogaratnamala and Harinamamrita have been considered critically and historically in all their bearings and apparently arbitrary technical terms like *gha*, *bha*, *lat*, *lit*, etc., have been traced to their sources. **We have nothing but admiration for this masterpiece of scholarship and warmly recommend it to our readers."**

Price Rupees Twelve only. *Foreign Rs. 14/-*
Postage Extra.

VISVANATH CHATTERJI

81, Shyambazar Street,

CALCUTTA—4

Phone : B. B. 4049

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

MANJUSHA (Sanskrit Monthly Magazine)

Registered No. C. 3278

MAHABHASHYA

(First Ahnika)

EDITED WITH

English translation, exhaustive critical and explanatory notes, extracts from other commentaries, full Sanskrit explanation of the Vedic mantras etc. etc.

Rupees Three and annas Twelve only.

CANDRA VYAKARANA

Part I (Chapters 1—3).

Critically edited with Vṛtti, corresponding rules of Pāṇini, Bhoja and others, Introduction etc.

BY

KSHITISH CHANDRA CHATTERJI, SASTRI, M. A., D. LITT.

Lecturer, Calcutta University ;

Formerly Editor, Calcutta Oriental Journal, Surabharati, Oriental Literary Digest, etc., etc.

Price Rupees Twelve only. *Foreign Rs. 15/-*

A No Bhadriyam

Hymn 1. 89 of the Rigveda with the critically edited commentaries of (1) Veṅkaṭamādhava (2) Skandasvāmin (3) Mahīdhara (4) Sāyaṇa (5) Kās'yapa Kṣitīsacandra unfolding the significance of each word and expression, and extracts from the commentaries of Uvaṭa, Haradatta and others, English translations, critical and explanatory notes, comparisons from other languages etc. etc. Price : Rs. 2/8/-

VISVANATH CHATTERJI

81, Shyambazar Street, Calcutta—4

Printed and published by Sri Jyotish Chandra Chatterjee, B.A. from 81, Shyambazar Street, Calcutta—4. Printed at the Elm Press 63, Beadon Street, Calcutta—6.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Approved by the Directors of Public Instruction, Madras, Bihar and Mysore.

श्रीशिवः शरणम्

अष्टम-वर्षं] December, 1953 [चतुर्थी संख्या

मञ्जूषा

सम्पादकः—श्रीक्षितीशचन्द्र-चट्टोपाध्यायः

Principal Contents

1. Is the relevance of the grammatical term Samprasāraṇa clear? 2. What is the term for the partitive genitive in Sanskrit grammar? 3. The true meaning of devānāmpriyao

Just Out! **Just Out!!**

Patanjali's MAHABHASHYA (Paspasha) with English translation, exhaustive critical and explanatory notes, commentaries. Rs. 3/12/-

A boon to students of languages is **Greek Proverbs** in Roman character with their Latin and English analogues and parallel proverbs and sayings from Sanskrit, Marathi and Bengali. All the grammatical forms have been clearly explained and the student of Sanskrit will not only acquire some knowledge of the glorious Greek language but will be struck with the resemblance it bears to Sanskrit. *Price : Rupees Two only.*

Office : 81, Shyambazar Street, Calcutta—4

Annual Subscription : Rupees Three only.

Foreign—Rupees Four.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मञ्जूषाया नियमावली

मञ्जूषाया वार्षिकं मूल्यं रूपकत्रितयम्। आश्विन (September) मासतो वर्षारम्भः। ग्राहकैर्वर्षस्य प्रथमसंख्यात एव ग्रहीतव्यम्।

२। प्रतिसौरमासं दशमदिने (आङ्‌लमासस्य चतुर्विंशे दिवसे) 81, Shyambazar Street, Calcutta 4 इत्यतो मञ्जूषा प्रकाश्यते।

काव्यालङ्कारसूत्रवृत्तिः (वामनविरचिता ५।१)

अभिनवविग्रहविस्तृतटीकोपेता Rs. 2/-

Convocation Address in Ancient India -12-

Popular Etymology— Re. 1/-

শব্দকথা— ২\

ইহাতে সরল ও সরসভাবে বাঙ্গালা ভাষায় চলতি ভুলগুলির আলোচনা করা হইয়াছে, **সংস্কৃত ব্যাকরণের দিক্ দিয়া, বাঙ্গালা ভাষার দিক্ দিয়া, ভাষাতত্ত্বের দিক্ দিয়া**, বঙ্গদর্শন প্রভৃতি হইতে ভূরি ভূরি উদাহরণ উদ্ধৃত করিয়া শব্দ ও শব্দসমষ্টির শুদ্ধি ও অশুদ্ধি বিবেচিত হইয়াছে। ওতপ্রোতশব্দে বিসর্গ আছে কি না, যদি থাকে প্রথম 'ত'র পরে আছে, না দ্বিতীয় 'ত'র পর আছে, না উভয় 'ত'র পরে আছে, 'সঠিক' শব্দ ঠিক কি না, 'ব্যবহারিক' ব্যবহারযোগ্য কি না, আবশ্যক ও আবশ্যকতায় প্রভেদ কি, প্রভৃতি আলোচিত হইয়াছে। "সোনার পাথরবাটি" প্রবন্ধে সংস্কৃত, বাঙ্গালা, ইংরাজী প্রভৃতি নানা ভাষার সোনার পাথর বাটী জাতীয় শব্দগুলি সন্নিবিষ্ট হইয়াছে। ক্রিয়াবিশেষণ প্রবন্ধে বাঙ্গালা, ইংরাজী ও ফরাসী ক্রিয়ার বিশেষণগুলির মূল অর্থ বিবেচিত হইয়াছে। "সন্ধির কথায়" সন্ধির বৈজ্ঞানিক ব্যাখ্যা ও বাঙ্গালা ইংরাজী লাটিন প্রভৃতি ভাষার সন্ধি প্রদর্শিত হইয়াছে; সন্ধি, ষত্ব ও ণত্ব সম্বন্ধীয় নিয়মগুলি সরলভাবে বোঝান হইয়াছে ও বাঙ্গালা উপন্যাসাদি হইতে শত শত দৃষ্টান্ত সন্নিবিষ্ট হইয়াছে।

ঊষার আলো—ছোট ছোট হাসির গল্পের সমষ্টি— ৸৹

নক্ষত্রমালা—ধর্মবিষয়ক শ্লোক, সরল ব্যাখ্যা ও অনুবাদ ।৹

Several complete sets of Vols. IV, V, VI and VII (450 pp. each) of the Manjusha are still available for Rs. 6/8/- per volume and only a few sets of Vols. I-III are available at Rs. 5/12/- for the lot.

শ্রীবিশ্বনাথ-চট্টোপাধ্যায়ঃ।

৮১ শ্যামবাজার স্ট্রীট, কলিকাতা ৪

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शरणं तरुणेन्दुशेखरः शरणं मे गिरिराजकन्यका ।
शरणं पुनरेव तावुभौ शरणं नान्यदुपैमि दैवतम् ॥

मञ्जूषा

December, 1953	१८७५-शकीयपौ स्य ८म-वर्षस्य चतुर्थी संख्या	Vol. VIII No. 4

पारमार्थिको योगः

सुखेनैव भवेद् यस्मिन्नजस्रं ब्रह्मचिन्तनम् ।
आसनं तद् विजानीयान्नेतरद् दुःखनाशनम् ॥१॥
दृष्टिं ज्ञानमयीं कृत्वा पश्येद् ब्रह्ममयं जगत् ।
सा दृष्टिः परमोदारा न नासाग्रावलोकिनी ॥२॥
चित्तादिसर्वभावेषु ब्रह्मत्वेनैव भावनात् ।
निरोधः सर्ववृत्तीनां प्राणायामः स उच्यते ॥३॥
निरोधनं प्रपञ्चस्य रेचकाख्यः समीरणः ।
ब्रह्मैवास्मीति प्रवृत्तिः पूरको वायुरीरितः ॥४॥
ततस्तद्वृत्तिनैश्चल्यं कुम्भकः प्राणसंयमः ।
अयं चापि प्रबुद्धानामज्ञानां प्राणपीडनम् ॥५॥
विषमेऽप्यात्मतां दृष्ट्वा मनसश्चितिचिन्तनम् ।
समाहारः स विज्ञेयोऽभ्यसनीयो मुमुक्षुभिः ॥६॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यत्र यत्र मनो याति ब्रह्मणस्तत्र वर्तनम् ।
मनसो धारणं चैव धारणास्य परा मता ॥७॥
ब्रह्मैवास्मीति यद्वृत्त्या निरालम्बतया स्थितिः ।
ध्यानशब्देन विख्याता परमानन्ददायिनी ॥८॥
निर्विकारतया वृत्त्या ब्रह्माकारतया पुनः ।
वृत्तिविस्मरणं सम्यक् समाधिर्ज्ञानसंज्ञकः ॥९॥
[न नामधेयं स्तोत्रस्य ज्ञायतेऽस्य कथञ्चन ।
तथापि शङ्कराचार्यकृतिरेषेति कल्प्यते ॥
यमनियमरहितोऽत्राष्टाङ्गो योग ईरितः ।
याथातथ्येन मुनिना पारमार्थ्येन मञ्जुलः ॥ रघुनाथः]

आभाणकादि

अनन्तरत्नप्रभवस्य यस्य
हिमं न सौभाग्यविलोपि जातम् ।
एको हि दोषो गुणसन्निपाते
निमज्जतीन्दोः किरणेष्विवाङ्कः ॥ [कुमार० १।३]

'A mine of gems unnumbered, its loveliness has not been impaired by snow. For one single fault merges in a myriad of excellences, like the spot of the moon in her rays.'

एको हि दोषो गुणसन्निपाते
निमज्जतीन्दोरिति यो बभाषे ।
[1]नूनं न दृष्टः कविना हि तेन[2]
दारिद्र्यदोषो गुणराशिनाशी ॥ [घटकर्परः]

'The poet who said, One single fault merges in a myriad of excellences, like the spot of the moon in her (myriad) rays, did not certainly see that the fault of poverty lays the axe to the root of all good qualities.'

---

[1] न तेन दृष्टं कविना समस्तं (=सम्यक्) दारिद्र्यमेकं गुणकोटिहारि ॥ इति पाठान्तरम् । [2] कविनापि तेन (=कविनापितेन) इति पा०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Chill penury repressed their noble rage
And froze the genial current of the soul.
Armut ist die grösste Plage
Reichtum ist das höchste Gut.
"Poverty's the greatest curse,
Riches are the highest good."

तरुकुलसुषमापहरां जनयन्तीं जगति जीवजातार्तिम् ।
केन गुणेन भवानीतात हिमानामिमां वहसि ॥

भामिनीविलासः १।२४

'O father of the spouse of S'iva, for what good do you bear the burden of this mass of snow which robs the vegetable kingdom of all its glories and which causes affliction to all creatures in this world ?'

तदल्पमपि नोपेक्ष्यं काव्ये दुष्टं कथञ्चन ।
स्याद्वपुः सुन्दरमपि श्वित्रेणैकेन दुर्भगम् ॥

काव्यादर्शः १।७

'So even a slight blemish should not be overlooked in a poem. Even a single white spot (of leprosy) is enough to convert a beautiful form into an ugly one.'

अमितगुणोऽपि पदार्थो दोषेणैकेन निन्दितो भवति ।
निखिलरसायनमहितो गन्धेनोग्रेण रसोन इव ॥

भामिनीविलासः १।७६

'A thing though possessed of ever so many excellences becomes blameworthy on account of a single fault, like garlic, the prince of elixirs, because of its offensive odour.'

सौरभ्यं भुवनत्रयेऽपि विदितं शैत्यं नु लोकोत्तरं
कीर्तिः किं च दिगङ्गनाङ्गनगता किं त्वेतदेकं शृणु ।
सर्वानेव गुणानियं निगिरति श्रीखण्ड ते सुन्दरान्
उज्झन्ती खलु कोटरेषु गरलज्वालां द्विजिह्वावली ॥

भामिनीविलासः १।७६

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'Your fragrance is known throughout the length and breadth of the three worlds, your cooling power is extraordinary. Further, your fame has spread to the courtyards of the damsels of the quarters of space. Still listen to this one thing : All these sterling qualities of yours, O sandal tree, are devoured by this host of serpents emitting the flames of poison into your hollow trunks.'

यैस्त्वं गुणगणवानपि सतां द्विजिह्वैरसेव्यतां नीतः ।
तानपि वहसि पटीरज किं कथयामस्त्वदीयमौन्नत्यम् ॥ ११९

'O sandal tree, you bear on your bosom even those serpents, by whom you, possessed of many qualities as you are, have been rendered unfit to be served by the good : how can we describe your greatness ?'

अशोकस्य शिलालेखः

(३)

देवानांप्रियः प्रियदर्शी राजैवमाह—द्वादशवर्षाभिषिक्तेन[1] मयेदमाज्ञप्तम् । सर्वत्र विजिते[2] मम युक्ताश्च[3] रज्जुकाश्च[4] प्रादेशिकाश्च[5] पञ्चसु पञ्चसु वर्षेषु अनुसंयानाय निर्यान्तु[6], एतस्या एवार्थायास्मै धर्मानुशस्तये यथान्यस्मा अपि कर्मणे । साधुर्मातरि च पितरि च शुश्रूषा, मित्र-संस्तुत-ज्ञातिभ्यो ब्राह्मणश्रमणेभ्यः साधु दानम्, प्राणानां साधुरनालम्भः,[7] अल्पव्ययता, अल्पभाण्डता[8] [च] साधुः । परिषदपि युक्तान् आज्ञापयिष्यति गणनायां[9] हेतुतश्च[10] व्यञ्जनतश्च[11] ।

---

[1] खुः पूः २५८ [2] राज्ये [3] राजकोषनियुक्ताः [4] रज्जुग्राहकामात्याः, करादिसम्प्रधारणार्थं रज्ज्वा भूमिपरिमाणादिकारिणः [5] प्रदेशशासकेभ्यः [6] परिदर्शनाय [7] अविनाशनम् [8] अल्पसञ्चयः [9] अनुसंयातॄणां यात्राया दूरत्वानुसारेण व्ययविशेषाणां परिगणने इति सरकारः [10] उद्देश्यानुसारेण—सः [11] अक्षरार्थानुसारेण यद्वा व्यङ्ग्यार्थानुसारेण—सः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

[देवानां पियो पियदसि राजा एवं आह। द्वादशवासाभिसितेन मया इदं आञ्ञापितं। सर्वत विजिते मम युता च राजूके च पदेसिके च पंचसु पंचसु वासेसु अनुसंयानं नियातु एतायेव अथाय इमाय धंमानुसस्टिय यथा अञ्ञाय पि कंमाय। साधु मातरि च पितरि च सुसूंसा मितासंस्तुतञातीनं बाम्हणसमणानं साधु दानं पाणान साधु अनारंभो अपव्ययता अपभांडता साधु। परिसा पि युते आञपयिसति गणनायं हेतुतो च व्यंजनतो च।]

देवानांप्रियः

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

अशोकानुशासनेषु देवानांप्रिय इति पदमुपलभ्यते। तस्यार्थोऽत्र विचिन्त्यते। "षष्ठ्या आक्रोशे" [६।३।२१] इत्यत्र वर्तन्ते पञ्च वार्त्तिकानि, तानि च यथा—

(१) षष्ठीप्रकरणे वाग्दिक्पश्यद्भ्यो युक्तिदण्डहरेषूपसंख्यानम्,
(२) आमुष्यायणामुष्यपुत्रिकेत्युपसंख्यानम्,
(३) देवानांप्रिय इति च,
(४) शेपपुच्छलाङ्गूलेष शुनः संज्ञायाम्,
(५) दिवश्च दासे,

इति।

अत्रोपक्रमे "षष्ठीप्रकरणे" इति सन्दर्शनात् उपसंहारे च "दिवश्च दासे" इत्यस्यावलोकनान् मूलसूत्र आक्रोशे इति पदस्य जाज्वल्यमानत्वेऽपि वार्त्तिकेषु तस्य नानुवृत्तिरिति सम्भाव्यते। भाष्यकृतापि इतराभ्योऽपि दृश्यन्ते [५।३।१४] इति सूत्रस्य व्याख्याने प्रयुक्तम्—भवान् दीर्घायुः देवानांप्रियः आयुष्मान् इति। अत्र पूर्वोत्तरसाहचर्यात् देवानांप्रिय इति पदं प्रशंसावचनमेवेति प्रतीयते। अजेर्व्यघञपोः [२।४।५६] इति सूत्रभाष्ये दृश्यते—

"एवं हि कश्चिद् वैयाकरण आह—कोऽस्य रथस्य प्रवेतेति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूत आह—अहमायुष्मन्नस्य रथस्य प्राजितेति।

वैयाकरण आह—अपशब्द इति।

सूत आह—प्राप्तिज्ञो देवानांप्रियो न त्विष्टिज्ञः। इष्यत एतद्रूपमिति।

अत्र देवानांप्रिय इति सोल्लुण्ठनोक्तिरिति प्रतीयते। अत एव कैयटेनोक्तं—देवशब्दो मूर्खवाची। मूर्खाणाञ्च प्रिया मूर्खा एव भवन्ति। अथवा सुखासक्तस्य शास्त्रेऽनभियोगोऽनेन प्रतिपाद्यत इति।

वस्तुतस्तु विपरीतलक्षणात्र बोद्धव्या—

उपकृतं बहु तत्र किमुच्यते
सुजनता प्रथिता भवता परम्।
विदधदीदृशमेव सदा सखे
सुखितमास्स्व ततः शरदां शतम्॥

इत्यत्र यथा। उक्तञ्च तत्र दर्पणकारेण—अपकारिणं प्रत्युपकारादि-प्रतिपादनान् मुख्यार्थबाधो वैपरीत्यलक्षणः सम्बन्धः, फलमपकारातिशयः इति। एवमेवाङ्गलभाषायामपि blessed-blest-प्रभृतयः शब्दाः प्रकरणादिवशादन्तरान्तरा विपरीतार्थबोधका उपलभ्यन्ते। यः खलु कथमपि कमपि कार्यविशेषं कर्तुं नेच्छति तेनोच्यते—I am blest if I will do it इति। महाब्राह्मणशब्दस्याप्येषैव गतिः। (क्रमशः)

लक्षणसंग्रहः

[श्रीफटिकलाल-दासः]

(३)

आश्रमलक्षणानि—मेखलाजिनदण्डेन ब्रह्मचारीति लक्ष्यते।
गृहस्थो दानवेदाद्यैर्नखलोम्ना वनाश्रिताः॥
त्रिदण्डेन यतिश्चैव लक्षणानि पृथक् पृथक्।
यस्यैतल्लक्षणं नास्ति प्रायश्चित्ती न चाश्रमी॥

—दक्षसंहिता।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आसनम्— अनायासेन येन स्यादजस्रं ब्रह्मचिन्तनम् ।
आसनं तद् विजानीयाद् योगिनां सुखदायकम् ॥

आसवः— शीधुरिक्षुरसैः पक्वैरपक्वैरासवो भवेत् ।
मैरेयं धातकीपुष्पैर्गुडधानाम्लसंहितम् ॥
—माधवः ।

इङ्गितम्— इङ्गितं हृद्गतो भावो बहिराकार आकृतिः ।
[आकृति] —सज्जनः ।

इतिहासः— धर्मार्थकाममोक्षाणामुपदेशसमन्वितम् ।
पूर्ववृत्तकथायुक्तमितिहासं प्रचक्षते ॥
—महाभारतम् ।

इन्द्रियाणि— श्रोत्रं त्वक् चक्षुषी जिह्वा नासिका चैव पञ्चमी ।
पायूपस्थं हस्तपादं वाक् चैव दशमी स्मृता ॥
बुद्धीन्द्रियाणि पञ्चैषां श्रोत्रादीन्यनुपूर्वशः ।
कर्मेन्द्रियाणि पञ्चैषां पाय्वादीनि प्रचक्षते ॥
एकादशं मनो ज्ञेयं स्वगुणेनोभयात्मकम् ।
यस्मिञ्जिते जितावेतौ भवतः पञ्चकौ गणौ ॥
—मनुसंहिता ।

ईतयः— अतिवृष्टिरनावृष्टिः शलभा मूषिकाः खगाः ।
प्रत्यासन्नाश्च राजानः षडेत ईतयः स्मृताः ॥
—कामन्दकः ।

सम्प्रसारणम्

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

इग् यणः सम्प्रसारणम् [१।१।४५] इति पाणिनीयं सूत्रम् । यकारस्थाने इकारः, वकारस्थाने उकारः, रेफस्थाने ऋकारः, लकारस्थाने च लृकारः सम्प्रसारणमिति व्यपदिश्यते । यजे र्निष्ठायामिष्टः,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वसतेर्निष्ठायाम् उषितः, ग्रहेर्निष्ठायां गृहीत इति भवति। किञ्च, इग् यण इति यो वाक्यार्थः स्थान्यादेशसम्बन्धलक्षणः स सम्प्रसारणसंज्ञो भवति। (काशिका)

यकारादष्विकारादयो निष्पिष्टाः सङ्कुचिता अवतिष्ठन्ते, सम्प्रसारणेन तेषां विस्पष्टतयोपलब्धिर्भवतीति हि वैयाकरणानां दर्शनम्। अत एवास्माभिः Technical Terms and Technique of Sanskrit Grammar ग्रन्थ उक्तम्—The idea is that ya, va, ra and la contain i, u, ṛ and ḷ in a condensed form; when they are fully spread out and i, u, ṛ and ḷ make their appearance, the phenomenon is known as samprasāraṇa.

न जानीमः कथं वा W. S. Allen महोदयेनोक्तम्—The relevance of the term is not clear. The form prasāraṇa is also found, and is used by the AP. to refer to the replacement of -bh- by -p- in dipsati < dabh.

अस्माकं पुस्तकं पठित्वापि अग्रालेन-महोदयोनेदमुक्तम् इत्यहो नायं स्थाणोरपराधो यदेनमन्धो न पश्यतीति न्याय आपतति। अथर्वप्रातिशाख्य यदि भकारस्थाने पकारादेशोऽपि प्रसारणशब्देन निर्दिष्टस्तथापि न क्षतिः। प्रातिशाख्यमतेन भकारे पकारो निष्पिष्टो निगूढोऽवतिष्ठते प्रसारणेनासौ स्फुटतयोपलभ्यते। अथर्वप्रातिशाख्यगतसूत्रस्यार्थस्तु अग्रालेन्महोदयेन नावबद्धः। (क्रमशः)

रामायणरत्नमञ्जूषा

वसेत् सह सपत्नेन[1] क्रुद्धेनाशीविषेण[2] च।
न तु मित्रप्रवादेन[3] संवसेच्छत्रुसेविना॥
जानामि शीलं ज्ञातीनां सर्वलोकेषु राक्षस।
हृष्यन्ति व्यसनेष्वेते ज्ञातीनां ज्ञातयः सदा॥

* प्रयतेत इति साधु। [1]शत्रुणा [2]सर्पेण [3]मित्रब्रुवेण। मित्रवदाभासमानेन।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रधानं[1] साधनं[2] वैद्यं[3] धर्मशीलं च राक्षस ।
ज्ञातयो ह्यवमन्यन्ते शूरं परिभवन्ति च ॥

श्रयन्ते हस्तिभिर्गीताः श्लोकाः पद्मवने क्वचित् ।
पाशहस्तान् नरान् दृष्ट्वा शृणु तान् गदतो मम ॥
नाग्निर्नान्यानि शस्त्राणि न नः पाला भयावहाः ।
घोराः स्वार्थप्रयुक्तास्तु ज्ञातयो नो भयावहाः ॥

उपायमेते वक्ष्यन्ति ग्रहणे नात्र संशयः ।
कृत्स्नाद् भयाज् ज्ञातिभयं सुकष्टं विदितं च नः ॥

विद्यते गोषु सम्पन्नं[4] विद्यते ब्राह्मणे दमः ।
विद्यते स्त्रीषु चापल्यं विद्यते ज्ञातितो भयम् ॥

ततो नेष्टमिदं सौम्य यदहं लोकसत्कृतः ।
ऐश्वर्यमभिजातश्च रिपूणां मूर्ध्न्यवस्थितः ॥
यथा पुष्करपर्णेषु पतितास्तोयबिन्दवः ।
न श्लेषमुपगच्छन्ति[5] तथानार्येषु सङ्गतम् ॥
[6]यथा मधुकरस्तर्षाद्रसं विन्दन्न विद्यते ।
तथा त्वमपि तत्रैव तथानार्येषु सौहृदम् ॥
यथा पूर्वं गजः स्नात्वा गृह्य[7] हस्तेन वै रजः ।
दूषयत्यात्मनो देहं तथानार्येषु सौहृदम् ॥

यथा शरदि मेघानां सिञ्चतामपि गर्जताम् ।
न भवत्यम्बुसंक्लेदस्तथानायषु सौहृदम् ॥

अन्यस्त्वेवंविधं ब्रूयाद् वाक्यमेतन्निशाचरः ।
अस्मिन् मुहूर्ते न भवेत्[8] त्वां तु धिक् कुलपांसनम् ॥

---

[1] स्वजातिश्रेष्ठम्　[2] कार्यसाधकम्　[3] विद्वांसम्　[4] सम्पद्　[5] न संश्लिष्टा भवन्ति, [6] तर्षात् अभिलाषेण, न विद्यते तत्र रसाधारे पुष्पे नावतिष्ठते, तथा त्वमपि ज्ञातीनां सम्पदं भुञ्जानोऽपि तत्पक्षे न तिष्ठसि ।　[7] गृहीत्वेति साधु । [8] विनश्येत् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

[एतदेवोपजीव्य भट्टिकविनोक्तम्—

अनिर्वृतं भूतिषु गूढवैरं
सत्कारकालेऽपि कृताभ्यसूयम् ।
विभिन्नकर्माशयवाक् कुले नो
मा ज्ञातिचेलं भुवि कस्यचिद् भूत् ॥]

स्वर्णमृगः

[कवीन्द्ररवीन्द्रनाथठाकुरस्य]

(२)

वैद्यनाथश्चेत् साहसमवलम्ब्यापृच्छत् , किमेतावन्तो द्रव्यसम्भारा अपेक्ष्यन्ते ? इति, स प्रत्युत्तरमाकर्णयत्, तर्हि पुत्राः सर्वेऽनाहारेण प्राणान् परित्यजन्तु, अहमपि प्रैमि, ततश्च त्वमेकाक्यवस्थायाल्पीयसैवार्थव्ययेन संसारयात्रां निर्वाहयितुं प्रभविष्यसि इति।

इत्थं क्रमेण वैद्यनाथोऽबुध्यत, न खल्वित ऊर्ध्वं यष्टितक्षणेन कार्यं सेत्स्यति । यः कोऽप्युपायोऽवश्यमेव विधातव्यः । दास्यं वा वाणिज्यं वा तस्य दुराशामात्रमेव स्यात् । अत एव कुबेरस्य कोषागारे प्रवेशस्य कश्चन पन्थाः स्वल्पप्रमाण आविष्करणीय इति ।

एकदासौ निशायां शय्यामधिशयानः कातरं प्रार्थयत, अयो मातर्जगदम्ब, यदि तावत् स्वप्ने दुःसाध्यस्य कस्यचन व्याध भैषजम् अनुशिष्यास्तर्हि वृत्तान्तपत्रेषु तस्य प्रकटनादिविलेखनस्य भारो मया ग्रहीष्यते इति ।

तस्यामेव रात्रौ स्वप्नो तेन दृष्टम्, पत्नी तदीयापरक्ता विधवाविवाहं निर्वर्त्स्यामीति कृतपणा तिष्ठतीति। विद्यमानेऽर्थाभावे कुतो वा तदुपयुक्तमलङ्करणं लभ्येत इत्युक्त्वा वैद्यनाथस्तत्र विप्रतिपद्यते। न खलु विधवाया अलङ्करणम् अपेक्ष्यत इत्युक्त्वा पत्नी तदीया तां विप्रतिपत्तिं निराकरोति। एतस्यापि किमप्यखण्डनीय-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मुत्तरं वतत इति तस्य मनस्युदेति, परमुत्तरं तु तत् कथमपि न प्रतिभाति। व्यतिकरे चास्मिंस्तस्य निद्राभङ्गः सञ्जातः। स चापश्यत् प्रभाता रजनीति। कथं च स्वपत्न्या विधवाविवाहो न सम्भवतीत्यत्र सदुत्तरं सद्य एव तस्य स्मृतिसरणिमुपारूढम्, तेन च मन्ये स कथञ्चिद् दुःखितोऽभवत्।

परेद्यवि प्रातःकृत्यं परिसमाप्य यावदसावेकक एव सुखासीनो वियच्चारिपत्रविहगस्य सूत्रं सन्नाहयति, तावत् कश्चन सन्न्यासी जयध्वनिमुच्चारयन् द्वारदेशमुपागतः। तस्मिन्नेव मुहूर्त्ते वैद्यनाथो विद्युत्स्फुरणमिव भाविन ऐश्वर्यस्य समुज्ज्वलां मूर्तिं प्रत्यक्षीचक्रे। सन्न्यासिने पुष्कलं समादरं स्वागतवचनादिकम् अभ्यवहार्यं च समुपानयत्। बहुतराच्चानुनयादूर्ध्वमबुध्यत, प्रभवत्येव सन्न्यासी सुवर्णं विनिर्मातुम् इति। स च तां विद्यां तस्मै प्रतिपादयितुं नासम्मतोऽभूत्।

गृहिण्यप्यसङ्गीतकमेवानृत्यत्। यथाहि समुपस्थिते यकृतो विकारे सर्वमेव हरिद्रावर्णं विलोकयति जनः, सोऽपि तथैव पृथिव्याः सर्वत्रैव सुवर्णं पश्यति स्म। कल्पनाकर्मारेण शयनपर्यङ्कं गृहसज्जां भवन-प्राकारमपि सुवर्णमण्डितं विधाय मनसा विन्ध्यवासिनीं न्यमन्त्रयत।

सन्न्यासी प्रतिदिनं दुग्धस्य शरावद्वयं मोहनभोगस्य च सार्द्धं शरावम् उपयुङ्क्ते स्म, वैद्यनाथस्य चार्थपत्राणि प्रदुह्याजस्रं रौप्यरसं निःसारितवान्।

यष्टि-बडिश-सूत्रधानप्रार्थिनः वैद्यनाथस्य रुद्धद्वारं वृथैव समाहत्य प्रतिष्ठन्ते। गृहे च पुत्रादयो यथाकालम् आहार्यं न लभन्ते, निपत्य च स्फीतललाटा भवन्ति, क्रन्दनेन गगनं विदारयन्ति, गृहपतेर्वा गृहिण्या वा कस्यापि तत्र लेशतोऽपि दृष्टिपातो वा भ्रुवोर्विक्षेपोऽपि वा नास्ति। निस्तब्धमेवाग्निकुण्डस्य पुरत उपविष्टयोः कटाहं च निरीक्षमाणयो-रुभयोश्चक्षुषि पल्लवो नास्ति, वदने च वचनं नास्ति। तृषितैकाग्र-नेत्रे निरन्तरमग्निशिखायाः प्रतिबिम्बनेन नेत्रमणिना स्पर्शमणेरिव

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुणः समासादितः। दृष्टिपथश्च सायन्तनसूर्यास्तपथ इव जाज्वल्यमानेन सुवर्णप्रलेपेन रक्तवर्णः सञ्जातः।

अर्थपत्रिकाद्वये समाहुतेऽस्मिन् स्वर्णानले, एकदा सन्न्यासी समाश्वासयत्—श्वो हिरण्ये वर्णः संक्रान्तो भविष्यति इति।

तस्मिंश्च दिवसे निशायां कस्यापि निद्रा नागता नयनयोः। स्त्रीपुंसौ मिलित्वा सुवर्णपुरीं निर्मिमाते स्म। तदधिकृत्यान्तरान्तरा मतभेदेन वितर्केण चोभयोर्मनसि कृतं पदम्, परमानन्दस्यावेगेनाचिरणैव मीमांसा सञ्जाता। न खलु परस्परानुरोधेन ताभ्यां स्वस्य स्वस्य मतस्य किञ्चित् परित्यागे लेशतोऽपि सङ्कोच आस्थितः—निशायां तस्यां दम्पत्योरेकीकरणं तथा घनीभूतं सञ्जातम्।

परेद्यवि सन्न्यासी क्वापि न दृष्टः। समन्ततश्च सुवर्णस्य वर्णम् अन्तर्हितम्, सूर्यकिरणा अपि तमोमया एवादृश्यन्त। इत ऊर्ध्वं शयनपर्यङ्को भवनोपकरणानि गृहप्राकाराश्च चतुर्गुणं दारिद्र्य च जीर्णतां च प्रकटयन्ति स्म। (क्रमशः)

नामरहस्यम्

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

(५)

नलनृपतेर्नामार्यैः प्रातः स्मर्यते—पुण्यश्लोको नलो राजेति। अर्थं पुनस्तस्य बहवो न विदन्ति। ऋग्वेदे मूर्धन्यलकारोपेतो नलशब्दः साक्षात्क्रियते, स्वरद्वयमध्यवर्तिनश्च डकारस्य मूर्धन्यलादेशो भवति। अत एवामरकोषे दृश्यते "नलस्तु धमनः पोटगलः" इति। आङ्गलभाषायां च reed इत्युच्यते। अत एव नैषधचरिते [१।३६] दृश्यते—

कथाप्रसङ्गेषु मिथः सखीमुखात्
तृणेऽपि तन्व्या नलनामनि श्रुते।
जनेन यूनः स्तुवता तदास्पदे
निदर्शनं नैषधमभ्यषेचयत्॥ इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तस्य च पत्नी दमयन्तीति। दमधातोर्णिचि शतरि दमयन्तीति रूपम्। यथा हि सत्त्वानां प्रसभदमनात् दौष्यन्तेः सर्वदमन (Cf. Greek *pandamato:r*) इति नामासीत्, एवमेव सर्वेषां पुरुषाणां दमनात्, रूपप्रभया निखिलसुन्दरीजनदमनाद्वा, आत्मनो दमनाद्वा दमयन्तीति नामधेयम्।

अत एव महाभारते दृश्यते—

विदर्भराज्ञो दुहिता दमयन्तीति विश्रुता।
रूपेण समतिक्रान्ता पृथिव्यां सर्वयोषितः॥ इति।
अतावरूपसम्पन्ना श्रीरिवायतलोचना।
न देवेषु न यक्षेषु तादृग् रूपवती क्वचित्॥
मानुषेष्वपि चान्येषु दृष्टपूर्वाथवा श्रुता।
चित्तप्रमाथिनी बाला देवानामपि सुन्दरी॥ इति च।

नैषधचरितेऽप्युक्तम् [२।१८]—

भुवनत्रयसुभ्रुवामसौ दमयन्ती कमनीयतामदम्।
उदियाय यतस्तनुश्रिया दमयन्तीति ततोऽभिधां दधौ॥ इति।

आङ्गलभाषायामनरूपं नाम Victoria इति।

कार्मुकशब्दस्य-निर्वचनम्

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

कर्मण उकञ् [५।१।१०३] इति सूत्रे काशिकायां दृश्यते—कर्मशब्दादुकञ् प्रत्ययो भवति, तस्मै प्रभवतीत्येतस्मिन्नर्थे। ठञोऽपवादः। कर्मणे प्रभवति कार्मुकं धनुः। धनुषोऽन्यत्र न भवत्यनभिधानात्। इति।

अत्र न्यासापरनाम्न्यां काशिकाविवरणञ्चिकायां सूत्रस्यास्य काशिकाया व्याख्यानं नोपलभ्यते। पदमञ्जर्यां कार्मुकं धनुरिति प्रतीकमादायोक्तम्—अन्यत्र न भवत्यनभिधानादिति। अत एव काशिकायाः संस्कर्त्रा बालशास्त्रिणा पादटीकायामुक्तम्—धनुषो-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ऽन्यत्रेत्यारभ्य अनभिधानादित्यन्तो ग्रन्थो बहुषु पुस्तकेषु नास्ति। अपपाठः पदमञ्जर्यां दर्शनात्। इति।

चान्द्रव्याकरणेऽपि—कर्मण उकञ् [४।१।१२२] इति सूत्रम्। तत्र च वृत्तिः—कर्मणश्चतुर्थ्यन्तात् प्रभवतीत्यस्मिन्नर्थे उकञ् भवति। कार्मुकम्। इति।

जैनेन्द्रव्याकरणे सूत्रम्—योग्यकार्मुके [३।४।१८८] इति। तत्र च लघुवृत्तिः—योग-कर्मन्-शब्दाभ्यां य उकञ् च निपात्यः। योगाय प्रभुः योग्यः। कार्मुकं धनुः। इति। यद्यपि मूलेऽर्थविषये विशेषतः किञ्चिन्नोक्तम्, तथापि "तस्मै प्रभुः" इति प्रकरणे पठितमिदं सूत्रम्।

शाकटायनव्याकरणेऽपि 'योग्यकार्मुके' [३।२।९२] इति सूत्रम्। तत्र च यक्षवर्मविरचिता वृत्तिः—योग्यकर्मभ्यां शक्तेऽर्थे य उकञ् इत्येतौ निपात्येते। योगाय शक्तः योग्यः।..कर्मणे शक्तम् कार्मुकम् इति। अत्र वृत्तिकृता धनुर्विषये किमपि नोक्तम्।

सरस्वतीकण्ठाभरणे कर्मण उकञ् [५।१।११४] इति पाणिनेरेव सूत्रं गृहीतम्। तत्र च हृदयहारिणी—कर्मन्-शब्दात् तस्मै प्रभवतीत्यर्थे उकञ् प्रत्ययो भवति। कर्मणे प्रभवति कार्मुकम् इति।

हैमशब्दानुशासने सूत्रम्—योगकर्मभ्यां योकञौ [६।४।९५] इति। तत्र च बृहद्वृत्तिः—आभ्यां चतुर्थ्यन्ताभ्यां शक्तेऽर्थे यथाक्रमं य उकञ् इत्येतौ प्रत्ययौ भवतः। योगाय शक्तः योग्यः। कर्मणे शक्तं कार्मुकम्। इति। यद्यप्यत्र हेमचन्द्रेणार्थोल्लेखो न विहितस्तथाप्यनेकार्थसङ्ग्रहे तेनोक्तम्—अथ कार्मुकः। वंशे, कार्मुकमिष्वासे कर्मठे। इति।

संक्षिप्तसारे सूत्रं--कर्मण उकञ् [त० ७१७] इति। तत्र च व्याख्यानं—कर्मण इत्यस्मात् तस्मै शक्ते वाच्ये टिकण् भवति। इति।

मुग्धबोधस्य ४३७तम-सूत्रस्य रामतर्कवागीशटीकायां वार्त्तिकम्—कर्मणो णुकः। च्यन्तात् [चतुर्थ्यन्तात्] कर्मशब्दात् प्रभवत्यर्थे णुकः स्यात्। ण इत्। कर्मणे प्रभवति। कार्मुकं धनुः। इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुपद्मे कर्मण उकण् [५।३।२६७] इति सूत्रम्। तत्र च ग्रन्थकारस्य वृत्तिः—कर्मणे प्रभवति कार्मुकं धनुः इति।

काशिकाविरचनतः पूर्वमपि किराताजनीयकाव्ये भारविणोक्तम्—

स क्षत्रियस्त्राणसहः सतां य-
स्तत् कार्मुकं कर्मसु यस्य शक्तिः

इति। (क्रमशः)

जिज्ञासा मीमांसा च

(२)

आङ्लादिव्याकरणेषु partitive genitive इति दृश्यते। को वास्यार्थः? संस्कृते एवंविधं किमपि वर्तते वा? इति पृच्छति कश्चन जिज्ञासुः।

अत्रोत्तरम्। यया षष्ठ्या समुदायस्यैकदेशो गम्यते समुदायादेकदेशो वा पृथक् क्रियते सा partitive genitive इति व्यपदिश्यते। संस्कृते अवयवोपजनितव्यतिरेके षष्ठीति वा भागव्यतिरेकजनिता षष्ठीति वोच्यते। सर्पिषोऽपि स्यात्, न माषाणामश्नीयात्, पर्वतानां हिमालयः श्रेष्ठः इत्यादीन्युदाहरणानि।

रसमञ्जरी

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

अभ्यागतः। आर्य, भवान् गोत्रेण काश्यप इति श्रुत्वाहमागतः।

गृहस्वामी। बाढमहं काश्यपगोत्रीयः। किं तावता?

अभ्यागतः। आर्य, क्यास्पीयान् सी (Caspian Sea) इति यदुच्यते तस्य नाम नूनं स्याद् भवता श्रुतमेव।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गृहस्वामी। अथ किम् ? केन वाक्षरमुखेण न श्रुतं काश्यप-सागरस्य नाम ?

अभ्यागतः। एतदपि भवेद् विदितं विदितवेदितव्यस्य भवतो यत् सागरोऽयं ३७५-क्रोशान् दीर्घः, १५०-क्रोशांश्चायतः। अन्तः-प्रदेशीयेषु सागरेष्वयमेव बृहत्तमः। अस्यैव च प्रसादेन रोषायणीयानां (Russians) समुन्नतिः। विज्ञायते वा भवता केन निर्मितोऽयं सागर इति।

गृहस्वामी। केन वापरेण निर्मीयेत ? येन खलु समग्रमिदं भुवो मण्डलं विनिर्मितं तेनैव परमेश्वरेण निर्मितोऽयं सागरः।

अभ्यागतः। नहि नहि। न खलु भवता भाषातत्त्वे परिश्रमः कृत इति प्रतिभाति। अस्मद्गोत्रप्रवर्तकेन ब्रह्मणो मानसपुत्रेण कश्यपेनैवायं निर्मितः। अस्य नामैवेदमुच्चैरुद्घोषयति। नामरूपात्मकेऽस्मिञ्जगति नाम्नः साक्ष्यं हातुं न युज्यते।

गृहस्वामी। अहो, मूढेन मया कदाप्येतन्न चिन्तितम्। भवद्भिः कृपया ज्ञानाञ्जनशलाकयाज्ञानतिमिरं मे निर्भिन्नमिति नितरां कृतज्ञोऽस्मि।

अभ्यागतः। अस्माभिश्च काश्यपगोत्रीयैः समितिरेका संस्थापिता। रोषायणीयानां हस्तात् समाच्छिद्य पुनरप्यस्माकं पैतृकं रिक्थमस्माभिरेव भोक्तव्यम्। एतदर्थं च भूयानर्थोऽपेक्ष्यते।

गृहस्वामी। गृह्यतामद्य रूपकसहस्रम्। सति प्रयोजने पुनरप्यागन्तव्यम्।

अभ्यागतः। अनुगृहीतोऽस्मि। विद्याया विभवस्य चानुरूपमेव भवताचरितम्। भगवान् भूतभावनो भद्रं भवतो विदधातु। कश्यपोऽप्यस्माकं कूटस्थः पुरुषः श्रेयसा भवन्तं योजयतु।

111125

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

TECHNICAL TERMS AND TECHNIQUE OF

Sanskrit Grammar

A Critical, Comparative and Historical Study

BY

Kshitish Chandra Chatterji, Sastri, M.A., D. Litt

Lecturer, Calcutta University ;
Formerly Editor, Calcutta Oriental Journal,
Surabharati Oriental Literary Digest, etc., etc.

The Modern Review (December, 1950) **says :**

"Honour to whom honour is due. Dr. Chatterji has broken entirely new ground in his **Technical Terms and Technique of Sanskrit Grammar** and demonstrated clearly that Bengal, though fallen on evil days, can even now produce works on Indology that invite and bear comparison with the best work produced in any part of the world. Who ever thought that all the technical terms admitted of satisfactory explanation and who ever imagined that a work on grammatical terminology could be made as delightful as a novel ? In this volume of nearly 350 pages the technical terms of Sanskrit grammar from the Brahmanas, Nirukta, Pratishakhyas, Panini, Katyayana, Patanjali, down to Prayogaratnamala and Harinamamrita have been considered critically and historically in all their bearings and apparently arbitrary technical terms like *gha*, *bha*, *lat*, *lit*, etc., have been traced to their sources. **We have nothing but admiration for this masterpiece of scholarship and warmly recommend it to our readers.**"

Price Rupees Twelve only. *Foreign Rs. 14/-*

Postage Extra

VISVANATH CHATTERJI

81 Shyambazar Street,

CALCUTTA—4

Phone : B. B. 1049

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

MANJUSHA (Sanskrit Monthly Magazine)
Registered No. C. 3278

GURUKUL KANGRI LIBRARY 4 JAN 1954 SAHARANPUR

MAHABHASHYA

(First Ahnika)
EDITED WITH
English translation, exhaustive critical and explanatory notes, extracts from other commentaries, full Sanskrit explanation of the Vedic mantras etc. etc. Rs. 3/12/-

A No Bhadriyam

Hymn 1. 89 of the Rigveda with the critically edited commentaries of (1) Veṅkaṭamādhava (2) Skandasvāmin (3) Mahīdhara (4) Sāyaṇa (5) Kās'yapa Kṣitīsacandra unfolding the significance of each word and expression, and extracts from the commentaries of Uvaṭa, Haradatta and others, English translations, critical and explanatory notes, comparisons from other languages etc. etc. Price : Rs. 2/8/-

VISVANATH CHATTERJI
81, Shyambazar Street, Calcutta—4

Candra Vyakarana

The first great revised edition of Panini.

Critically edited with Vṛtti, corresponding rules of Pāṇini, Bhoja and others, etc. etc.
By
KSHITISH CHANDRA CHATTERJI, SASTRI, M. A., D. LITT.
Lecturer, Calcutta University.
Part I (Chapters 1—3). *Price Rupees Twelve only.*
Deccan College Post Graduate and Research Institute, Poona 6.

Printed and published by Sri Jyotish Chandra Chatterjee, B.A. from 81, Shyambazar Street, Calcutta and Printed at the Elm Press 63, Beadon Street, Calcutta—6.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Compiled
1999-2000

111125

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri